
दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या


COMPILED

कलकता की प्रथम परीक्षा - १३-१४ फेब्रुअरी १९१४ ई०

काशीक मध्यमा प्रथम खंड १६ फेब्रुअरी १९१४ ई०



KIRÂTÂRJUNÎYA

of


BHARAVI

WITH ENGLISH TRANSLATION,

(CANTOS I-X)

BY

LAKSHMAN RAMCHANDRA PANGARKER, B.A;
Sanscrit Teacher, V. J. High School, Pandharpoor.



BOMBAY:

GOPAL NARAYEN & Co;


BOOKSELLERS & PUBLISHERS,

Price Rs. 2.

1902



BOMBAY: REGISTERED UNDER ACT XXV OF 1867.
PRINTED AT " GOPAL NARAYEN & Co's PRINTING PRESS".



PREFACE.

" भारवे रर्थ गौरवम् "

—:o:—

As is the case with most of our Sanskrit Poets, nothing precisely is yet known of Bhârawi, the author of 'Kirátárjuniya.' He is mentioned along with Kalidasa in an inscription dated 556 Sake or 634 A.D. The verse runs thus:—

येनायोजि न वेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥

It is therefore, clear that Bharawi was by the middle of the seventh century, recognised as a peer of Kâlidasa, and had so far made his name in the field of poetic literature in India that he was taken as the standard of comparison as Kalidása himself. But it is strange that Bâṇa Bhatta, whose date has been indisputably fixed by Dr Hall from Houen Tsang's travels (629-645 A. D.), does not mention him in the introductory verses to 'Harshacharita.' It may be as Prof. R. R. Bhâgwat supposes, that he is a poet of Southern India, especially of Maharashtra. At any rate Bharawi must have flourished before the first half of the seventh century.

Little is known of the poet himself but an anecdote about the celebrated verse 'सहसा विदधीत न क्रियाम्' (II-30). The anecdote is well known. Bharawi was ground by poverty and being ever emersed in poetic life, was often tronbled by the furious remarks of his wife. She once reproached him for his dullness in as much as he did not stir himself about money, and the poet, goaded by necessity and the constant reproaches of his wife, did set out to try his fortune to seek royal support. When he had gone a few miles, he saw a beautiful tank. Fatigued by the labours of the journey, he stopped there and wrote the verse (सहसा विदधीत न क्रियाम्, &c.) on a lotus leaf. The king, who happened to be on the very spot as he had left his palace for hunt, was so much delighted with it that he ordered the poet to see him in his palace at a particular time and then galloped off. The poet, mean looking and dressed in rags, found no admittance to the royal presence and had in despair to go back.

The King, however, had the verse painted in gold in his private chamber. A year silently passed when the king set out with his chosen few to hunt, declaring that he would return after a week. Second night, however, his camp not being far off he rode alone to his private chamber and to his extreme wonder and rage, found the queen lying with another person on his bed ! Suddenly he drew out his sword and was about to strike both dead, when the verse in golden letters attracted his

attention. His rage abated and he resolved to awaken both and tell them of their heinous offence and then to pass the sentence of capital punishment on them. But what was his surprise when, on awakening them, he was told that the youth was no other than his son, who, being stolen away by a nurse from his cradle, was discovered that very evening ! The king, immediately in tears, thanked God that he had not rashly murdered his wife and his only son, the sole heir to his throne. Need it be told that the king out of gratefulness for the author of the verse that saved his empire, soon discovered him and conferring the title of Poet Laureate on him, saw him in opulent circumstances ! !

Bhárawi has a rival in Magha with whom his name is inseparably associated Each has left a महाकाव्य. The 'Shishupala Wadha' of Mâgha may well challenge comparison with the 'Kiràtarjuniya' of Bhárawi. Both the poets have drawn their subject matter from 'Mahabhárata.' Besides the arrangement and order of description in both is generally on the same lines. We give below a rough * table to prove this:—

(1)	Kiràt I (1—25) Sishupàla. I	शत्रुवर्णनम्
(2)	Kirát I, II and III Sishupál. II	मंत्रवर्णनम्
(3)	Kiràt IV and VII Sishupàl. IV	प्रवासवर्णनम्
(4)	Kiràt V Sishupála. IV	पर्वतसौंदर्यवर्णनम्
(5)	Kirat VIII (1-26) Sishupàla. VII	पुष्पावचयवर्णनम्
(6)	Kirat VIII (27-37) Sishupála VIII	जलक्रीडावर्णनम्
(6)	Kirat IX (1-50) Sishupàla IX	सायंकालवर्णनम् , रात्रिवर्णनम्
(7)	Kiràt IX (51-78) Sishupála X	सुरतक्रीडावर्णनम्

Hereafter the stories run in different directions, still even then some resemblance in the manner and order of description can be traced. This is about external resemblance. If we go into the heart of the poems, it is still more striking. The first verse in the first canto of each begins with the word 'श्रियः'. While Bhârawi uses the word 'लक्ष्मीः' in the last verse of every canto, Magha uses the word 'श्रीः' in the same order. To show their love for a variety of meters and their skill in using rhymes, both have used one canto of their poems i. e. the fourth. Both are fond of alliterations and such other fanciful uses of words. In this case one has only to compare XVth canto of 'Kiràtàrjuniya' with the XIXth of 'Sishupàlawadha.' The various बंधाs such as the गोमूत्रिकाबंध the सर्वतोभद्रबंध, &c. are to be found in these cantos.

But above all there is some mystery in the names of these poets. The sole ambition

* Vividha Jnana Vistar, Vol. XXIII. No IX.

of Mâgha seems to eclipse the reputation of Bhārawi. Bharawi (the bright Sun) is known to loose much of his brightness or heat in the month of Magha and hence Magha assumed that name simply to indicate that Bharawi turned pale before him.

Both are masters of what is called artificial poetry, yet simple language, natural flow, lucidity of style and sentiment are easy to them. Màgha is more fantastic and digressive.

departing from the main subject   not real

Little more remains to be said of the poet himself. 'Kirâtarjuniya' is the only work he leaves behind, yet his reputation as a great Sanskrit poet is unimpeachable. We leave it to the reader to discuss the peculiarities of his style and sentiments. The political philosophy preached in the first three cantos is worthy of the greatest poet. The sublimity of the eleventh canto is unsurpassed in classical Sanskrit. His ideas are sometimes hard to appreciate i. e. out of the way, but that is rare. He has natural observation, tenderness of heart blended with true heroism. Like one of the Lake poets he seems to hold communion with Nature. The general truths interspersed throughout the whole work are themselves a treasure. 'हितं मनोहारि च दुर्लभंवचः', 'वसन्ति हि प्रेम्णि गुणा न वस्तुष' these and similar propositions pass as proverbs not only in Sanskrit, but in all Vernaculars of India.

As this edition was to be hurried through the press, several imperfections do remain in it. They will, however, be removed in the second edition if a call for it make it necessary. I must now conclude this short preface. But before so doing, I must express my obligations to the several editions of the book and particularly to my friend, Mr. Bapu Vaman Nagarkar, who helped me in revising the translation.

BOMBAY,
2nd July 1902.

The Author.

किरातार्जुनीये

प्रथमः सर्गः

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ॥
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

अन्वयः—कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्त वर्णिलिङ्गी स वनेचरः विदितः (सन्) द्वैतवने युधिष्ठिरं समाययौ ॥ १ ॥

1. The forester, whom (Yudhis'ṭhira) had appointed to ascertain what treatment the Lord of the Kurus gave to his subjects, treatment on which depended the existence of his rule—having learnt (everything) in the garb of a wandering celibate, returned to Yudhis'ṭhira (who was) in the penance grove called Dwaitawana.

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ॥
न विव्यथे तस्य मनो नहि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ २ ॥

अन्वयः—कृतप्रणामस्य सपत्नेन जितां महीं महीभुजे निवेदयिष्यतः तस्य मनः न विव्यथे, (तथाहि) हितैषिणः मृषा प्रियं प्रवक्तुं न इच्छन्ति ॥ २ ॥

2. His mind was not pained, while respectfully communicating to his Lord after due obeisance, (the unpleasant truth) that the world was won over by his rival (Suyodhana); for sincere well-wishers do not (even) wish to tell a falsehood however pleasant.

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ॥
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥ ३ ॥

अन्वयः—द्विषां विघाताय विधातुम् इच्छतः भूभृतः अनुज्ञाम् अधिगम्य सः रहसि सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थाम् इति वाचम् आददे ॥ ३ ॥

3. Having obtained permission of the king, who was desirous of devising schemes for the destruction of his foes, he made in secret the following speech which was impressive with appropriate words and noble sentiments, and which was well grounded or decisive.

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ॥
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

अन्वयः— (हे) नृप ! क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीयाः अतः साधु असाधु वा (मदुक्तं) क्षन्तुं अर्हसि (तथाहि) हितं मनोहारि च वचः दुर्लभम् ॥ ४ ॥

4. Rulers, my Liege! who observe through the medium of their spies, should never be deceived by their servants, entrusted with secret duties. It, therefore, becomes your Majesty to pardon (my words) whether agreeable or otherwise; for words both wholesome and agreeable are rare.

स किं सखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किं प्रभुः ॥
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः ॥ ५ ॥

अन्वयः—यः अधिपं साधु न शास्ति सः किंसखा; यः हिताद् न संशृणुते सः किंप्रभुः, (तथाहि) नृपेषु अमात्येषु च सदानुकूलेषु (सत्सु) सर्वसंपदः रतिं कुर्वते ॥ ५ ॥

5. He is a bad counsellor who does not give salutary advice to his master; he is a bad master who does not listen to the (advice of his) counsellor or well-wisher; for when both the king and his advisers act in concert, prosperity favours (the country).

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ॥
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥

अन्वयः—निसर्गदुर्बोधं भूपतीनां चरितं क्व अबोध विक्लवाः (मादृशाः) जन्तवः क्व, (तथापि) यत् मया विद्विषाम् निगूढतत्त्वं नयवर्त्म अवेदि अयं तव अनुभावः ॥ ६ ॥

6. How naturally unscrutable are the ways of kings ? how overcome by ignorance are insignificant men like myself ! It is your Majesty's greatness that I could comprehend the (sixfold) intricate policy of the enemies.

विशंकमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ॥
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

अन्वयः—सुयोधनः नृपासनस्थोपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते ॥ ७ ॥

7. Apprehensive of defeat from your Majesty who dwell in the forest (being dispossessed of your kingdom), Suyodhana though occupying the throne endeavours to maintain by rectitude the empire acquired (by fraud) under pretext of playing at dice.

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः ॥
समुन्नयन्भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः ॥ ८ ॥

अन्वयः—तथा जिह्मोपि सः भवज्जिगीषया गुणसंपदा शुभ्रं यशः तनोति, भूतिं समुन्नयन् महात्मभिः समं विरोधोऽपि अनार्यसंगमात् वरम् ॥ ८ ॥

8. Though so deceitful, he (now) diffuses spotless fame by the wealth of merits (such as charity, mercy, &c.) with a view to outshine your Majesty (even in them). Indeed enmity with the magnanimous, elevation as it brings on, is preferable to friendship with the pusillanimous.

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना ॥
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥ ९ ॥

अन्वयः—कृतारिषड्वर्गजयेन अगम्य रूपां मानवीं पदवीं प्रपित्सुना अस्ततन्द्रिणा तेन नक्तंदिवं विभज्य नयेन पौरुषं वितन्यते ॥ ९ ॥

9. Desirous of following rules laid down by Manu (for the protection of subjects), Suyodhana, subduing his six foes (passions) and shaking off all lethargy (becoming watchful) allotting different parts of night and day to different duties, ever extends his valour with due regard to justice.

सखीनिव प्रीतियुजोऽनुजीविनः समानमानान्सुहृदश्च बन्धुभिः ॥
स संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥ १० ॥

अन्वयः—गतस्मयः स अनुजीविनः प्रीतियुजः सखीनिव, सुहृदः बंधुभिः समानमानान्, बंधुतां कृताधिपत्यामिव साधु संततं दर्शयते ॥ १० ॥

10. Having foregone his (former) haughtiness he now purposely and candidly treats his servants as his confidential beloved friends, shows the same regard to his friends as he does to his relations and so treats his relations as to make them feel that they (along with him) are possessors of kingly power.

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ॥
गुणानुरागादिव सख्यमीयिवान्नबाधतेऽस्य त्रिगणः परस्परम् ॥ ११ ॥

अन्वयः—यथायथं विभज्य समपक्षपातया भक्त्या असक्तम् आराधयतः अस्य त्रिगणः गुणानुरागात् सख्यम् ईयिवान् इव परस्परं न बाधते ॥ ११ ॥

11. The three objects of worldly existence (Religious merit, Wealth and Enjoyment) which he seeks with due discrimination and with an unbiassed mind but to none of which he is particularly addicted, dwell (in him) on friendly terms, as if attracted by his virtues, and do not conflict with one another.

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ॥
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥ १२ ॥

अन्वयः—अस्य निरत्ययं साम दानवर्जितं न प्रवर्तते, सत्क्रियां विरहय्य भूरि दानं न (प्रवर्तते), गुणानुरोधेन विना विशेषशालिनी सत्क्रिया न (प्रवर्तते) ॥ १२ ॥

12. His policy of conciliation, though ever successful, never proceeds without gifts (is ever accompanied by gifts); his gifts, though liberal, never take place without high marks of respect (are always marked by feelings of respect,); and his well-becoming marks of respect are never shown unless accompanied by merit.

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः ॥
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥ १३ ॥

अन्वयः—सः वशी वसूनि न वाञ्छन्, नच मन्युना निवृत्तकारणः (सन्) स्वधर्म इत्येव गुरूपदिष्टेन दण्डेन रिपौ सुतेपि वा (स्थितं) धर्मविप्लवं निहन्ति ॥ १३ ॥

13. That self—controlled sovereign, not influenced by such considerations as lust for lucre or private grudge, chastises, from no personal motives but because it is his duty to do so, an offender, be he his son or foe, acting under instructions of the council of judges.

विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः ॥
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति संपदः ॥ १४ ॥

अन्वयः—शङ्कितः (सन्) परितः परेतरान् रक्षान् विधाय अशङ्किताकारम् उपैति, क्रियापवर्गेषु अनुजीविसात्कृताः संपदः अस्य कृतज्ञतां वदन्ति ॥ १४ ॥

14. Suspecting treachery, he keeps trusted men on all sides for his protection and assumes an unsuspecting air; when their (respective) duties are discharged (to his satisfaction) rewards showered (by him) on his servants proclaim (to the world) his generous appreciation.

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ॥
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसंपदः ॥ १५ ॥

अन्वयः—तेन पदेषु सम्यक् विभज्य विनियोगसत्क्रियाः लम्भिताः उपायाः संघर्षम् उपेत्य इव परिबृंहितायतीः अर्थसंपदः अनारतं फलन्ति ॥ १५ ॥

15. The four means of success (conciliation, bribery, sowing dissensions and punishment) being used by him in right places with due consideratión, produce ever-increasing prosperity, as if from a spirit of emulation.

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ॥
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥ १६ ॥

अन्वयः—नृपोपायनदन्तिनां अयुग्मछदगन्धिः मदः तदीयम् अनेकराजन्यरथाश्वसंकुलं आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति ॥ १६ ॥

16. The rut, smelling like the flower of the सप्तपर्ण tree, of the elephants presented to him by kings, ever floods the courtyard of his Imperial-council Hall, crowded with horses and chariots of numerous feudatory princes.

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसंपदः ॥
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥ १७ ॥

अन्वयः—चिराय तस्मिन् क्षेमं वितन्वति (सति) अदेवमातृकाः कुरवः अकृष्टपच्या इव कृषीवलैः सुखेन लभ्याः सस्यसंपदः दधतः सन्तः चकासति ॥ १७ ॥

17. Under his beneficent rule, the Kuru territories, which are ever dependant on irrigation, smile with abundant crops obtained by husbandmen as easily as if they were obtained without tillage (canals, wells, &c. being constructed by him).

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया ॥
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥ १८ ॥

अन्वयः—उदारकीर्तेः दयावतः अभिरक्षया प्रशान्तबाधम् उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्नुता मेदिनी वसूनि स्वयं प्रदुग्धे ॥ १८ ॥

18. The earth, nursed by merits of that Kuberlike wealthy monarch, yields of her own accord abundant wealth to him, who is illustrious and merciful and under whose universal protection the world enjoys uninterrupted prosperity.

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ॥
नसंहतास्तस्यनभिन्नवृत्तयः प्रियाणिवाञ्छन्त्यसुभिः समीहितुम् ॥ १९ ॥

अन्वयः—महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्तयः नसंहताःन भिन्नवृत्तयः धनुर्भृतः असुभिः तस्य प्रियाणि समीहितुं वाञ्छन्ति ॥ १९ ॥

19. Mighty, honourable, well-paid, distinguished on battlefields, neither forming conspiracies (against him) nor acting separately or wilfully, his soldiers are ever ready to further his interests even at the cost of their lives.

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ॥
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥ २० ॥

अन्वयः—अशेषितक्रियः सः सच्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद, धातुः इव तस्य ईहितं महोदयैः हितानुबंधिभिः फलैः प्रतीयते ॥ २० ॥

20. Pursuing his objects till they are accomplished, he learns all the plans of other kings through his faithful agents; but his own secret plans are like those of Providence, made known only by their magnificent and beneficial results.

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ॥
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥ २१ ॥

अन्वयः—तेन क्वचित् सज्यं धनुः न उद्यतम्, आननं वा कोपविजिह्मं न कृतम्, नराधिपैः अस्य शासनं गुणानुरागेण माल्यमिव शिरोभिः उह्यते ॥ २१ ॥

21. Never had he any occasion to raise his bow stringed (and hence ever ready for use if occasion for it arose) nor to assume an angry look. The feudatory kings attracted by his merits bear his commands round their necks like a fragrant garland interwoven in a string.

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ॥
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥ २२ ॥

अन्वयः—इद्धशासनः सः नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय पुरोधसा अनुमतः अखिन्नः मखेषु हव्येन हिरण्यरेतसं धिनोति ॥ २२ ॥

22. He, whose orders are unhesitatingly obyed, having appointed the yonthful and zealous Dusshasana as heir-apparent, propitiates untiringly the God of fire by offering oblations, acting under instructions of the family priest.

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ॥
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

अन्वयः—प्रलीनभूपालं स्थिरायति आवारिधि भुवो मण्डलं प्रशासदपि सः त्वदेष्यतीः भियः चिन्तयत्येव अहो ! बलवद्विरोधिता दुरन्ता ॥ २३ ॥

23. Though ruling this globular earth to the shores of the ocean, kings on which have all been subjected to his rule and which is therefore secure under him, he always apprehends dangers from your Majesty. *Oh !* how enmity with the mighty leads to evil consequences.

कथाप्रसंगेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः ॥
तवाभिधानाद्व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः ॥ २४ ॥

अन्वयः—कथाप्रसङ्गेन जनैः उदाहृतात् दुःसहात् तवाभिधानात् मन्त्रपदात् अनुस्मृताखण्डलसूनविक्रमः उरग इव सः नताननः (सन्) व्यथते ॥ २४ ॥

24. That Suyodhana hangs down his head with pain, at any accidental mention of your name by people in course of conversation, being suddenly reminded of the valour of Arjuna, as a serpent does at the incantation of some inviolable Mantras repeated by experts among snake-charmers at the recollection of the approach of (Garud) the bird of the younger brother of Indra (Vishnu).

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ॥
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥ २५ ॥

अन्वयः—तत् (तस्मात्) त्वयि जिह्मं कर्तुम् उद्यते तत्र (तस्मिन्) विधेयम् उत्तरम् आशु विधीयताम्, परप्रणीतानिवचांसि चिन्वतां मादृशां गिरः प्रवृत्तिसाराः खलु ॥ २५ ॥

25. Let therefore, counter-measures be speedily taken against him, who seeks opportunities to harm you ! Words of persons like myself, who gather news from the utterances of others, simply help to excite action.

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् ॥
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसंनिधौ वचः ॥ २६ ॥

अन्वयः—वनसंनिवासिनां पत्यौ इति गिरमीरयित्वा आत्तसत्क्रियेगते (सति) अथ महीभुजा कृष्णासदनं प्रविश्य अनुजसंनिधौ तत् वचः आचचक्षे अथवा सदनं प्रविश्य तत् वचः कृष्णा आचचक्षे ॥ २६ ॥

26. Thus concluding his speech, the chief of the foresters, having received his reward, went away. And the king (Yudhisthira) entering the apartment of Droupadi repeated the speech in the presence of his brother (भीम) or entering his house repeated the speech to Droupadi in the presence of his brothers.

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ॥
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥

अन्वयः—ततः द्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततस्त्याः अपाकृतीः विनियन्तुम् अक्षमा (सती) नृपस्य मन्युव्यवसायदीपिनीः गिरः उदाजहार ॥ २७ ॥

27. Droupadi, hearing of the prosperity of the enemies and unable to restrain (her wrath arising from) the insults received from them (वस्त्रहरणादि) made the following speech calculated to kindle his wrath as well as to encourage active efforts (towards retaliation).

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ॥
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥ २८ ॥

अन्वयः—भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेप इव भवति तथापि निरस्तनारीसमयाः दुराधयः मां वक्तुं व्यवसाययन्ति. ॥ २८ ॥

28. To (thoughtful) persons like your Majesty advice given by a woman (like myself) is verily an insult; but unbearable mental afflictions (caused by the recollection of insults such as वस्त्राहरणादि) force me to violate the rules of good conduct set down for females and prompt me to speak.

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ॥
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥ २९ ॥

अन्वयः—आखण्डलतुल्यधामभिः स्ववंशजैः भूपतिभिः चिरम् अखण्डम् धृता मही त्वया मदच्युता मतंगजेन स्रक् इव आत्महस्तेन अपवर्जिता ॥ २९ ॥

29. As an elephant in rut throws off with his trunk the garland (placed on his head) so you have thrown away with your own hands the (sovereignty of the) earth which was perpetually possessed entire by your ancestors who in valour vied with Indra.

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ॥
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥ ३० ॥

अन्वयः—ये मायाविषु मायिनः नभवन्ति ते मूढधियः पराभवं व्रजन्ति, शठाः तथाविधान् असंवृताङ्गान् निशिता इषवः इव प्रविश्य घ्नन्ति ॥ ३० ॥

30. Those who do not meet fraud by fraud are indeed dull-headed and (naturally) experience defeat (from foes); for rogues (ever ready to strike) first ingratiate themselves with and then ruin such (unwary people) as pointed arrows enter, merely to kill the bodies unprotected by armour.

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ॥
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥

अन्वयः—अनुरक्तसाधनः कुलाभिमानी त्वदन्यः क इव नराधिपः गुणानुरक्तां कुलजां मनोरमाम् आत्मवधूम् इव श्रियं परैः अपहारयेत् ॥ ३१ ॥

31. What king other than yourself, who has his servants and friends all attached to him and who takes pride in his noble heroic birth would allow his enemies to rob him of his royalty as of his wife, beautiful, devoted to his merits and come of a noble line.

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ॥
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ३२ ॥

अन्वयः— (हे) नरदेव ! एतर्हि मनस्विगर्हिते वर्त्मनि विवर्तमानं भवन्तम् उदीरितः मन्युः शुष्कं शमीतरुम् उच्छिखः अग्निरिव कथं न ज्वलयति ॥ ३२ ॥

32. While revolving round the path condemned by valiant persons, how even now does excited feeling of resentment, (the spirit of retaliation) not inflame you as blazing flames do a withered Shami tree.

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ॥
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ ३३ ॥

अन्वयः—अवन्ध्यकोपस्य आपदां विहन्तुः देहिनः स्वयमेव वश्याः भवन्ति, अमर्षशून्येन जन्तुना जातहार्देन (सता) जनस्य आदरः न, विद्विषा च (सता) दरः न. ॥ ३३ ॥

33. People easily yield to him of their own accord, whose wrath is not futile, and who is able to redress wrongs (done to friends). Neither friendship nor hatred of a man who is void of anger (pluck) is respected or feared by people.

परिभ्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ॥
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥ ३४ ॥

अन्वयः—(प्राक्) लोहितचंदनोचितः महारथः अयं वृकोदरः (संप्रति) रेणुरूषितः पदातिः (भूत्वा) अंतर्गिरि परिभ्रमन् सत्यधनस्य मानसं नो दुनोति कच्चित् ॥ ३४ ॥

34. Does not this Bhima, whose body once used to be besmeared with red sandal but is now covered with dust, who once used to drive in chariots but now roams about on foot on rocks and hills, pain your mind–you who prize truth as riches.

विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः ॥
स वल्कवासांसि तवाधुनाहरन्करोति मन्युं न कथं धनंजयः ॥ ३५ ॥

अन्वयः—वासवोपमः यः उत्तरान् कुरून् विजित्य प्राज्यं अकुप्यं वसु अयच्छत्, सः धनंजयः अधुना वल्कवासांसि आहरन् तव मन्युं कथं न करोति ॥ ३५ ॥

35. How are you not enraged at the spectacle that the same Indra–like Arjuna who once heaped (coins of) gold and silver before you on conquering the Northern Kurus now brings you bark—garments.

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ॥
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥ ३६ ॥

अन्वयः—वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ अगजौ गजौ इव एतौ यमौ विलोकयन् त्वं धृतिसंयमौ बाधितुं कथं न उत्सहसे ॥ ३६ ॥

36. How are you not incited to bid adieu to your patience and self—restraint looking at the compassionate state of the twins नकुल and सहदेव, whose tender bodies have become hard by sleeping on strong ground, whose hair have become dishevelled and (hence) who look like two wild elephants.

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ॥
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥ ३७ ॥

अन्वयः—इमां तावकीं धियम् अहं न वेद, चित्तवृत्तयः विचित्ररूपाः खलु (किन्तु) परां भवदापदं विचिन्तयन्त्याः मम चेतः आधयः प्रसभं रुजन्ति ॥ ३७ ॥

37. I do not understand what a strange mind you have ! (which thus rests contented in misery). Minds of different men are indeed differently cast. When I think of your extreme misery, my mind is convulsed with anguish (I wonder your temper callous to all pains).

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ॥
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥ ३८ ॥

अन्वयः—यः (त्वं) महाधनं शयनम् अधिरूढः (सन्) स्तुतिगीतमङ्गलैः पुरा (वैतालिकैः) विबोध्यसे, सः (त्वं) अदभ्रदर्भां स्थलीम् अधिशय्य अशिवैः शिवारुतैः निद्रां जहासि ॥ ३८ ॥

38. You, who sleeping on a costly couch were formerly roused from sleep by the eulogistic songs of bards, have now to lie down on ground covered with thick-grown दर्भ grass and to be roused from slumbers by the inauspicious howlings of jackals.

पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा ॥
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥ ३९ ॥

अन्वयः—(हे) नृप ! यत् एतत् वपुः पुरा द्विजातिशेषेण अंधसा रामणीयकम् उपनीतम् वन्यफलाशिनस्ते तत् वपुः अद्य यशसा समं परं कार्श्यं परैति ॥ ३९ ॥

39. This body of yours, which formerly looked handsome by (your partaking of) the food left by Brahmins after dinner, but which is now fed with wild fruits, is emaciated along with your fame.

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः ॥
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥ ४० ॥

अन्वयः— (प्राक्) राजशिरःस्रजां रजः अनारतं मणिपीठशायिनौ यौ अरंजयत्, तौ ते चरणौ (अद्य) मृगद्विजालूनशिखेषु बर्हिषां वनेषु निषीदतः ॥ ४० ॥

40. These very feet, which once resting on a stool decked with jewels used to be incessantly dyed red with pollen dropping down from the garlands on the heads of (prostrate) kings, now rest (tread in these forests) on stalks of Darbh grass, having sharp points cropped by deer or cut by Brahmins.

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ॥
परैरपर्यासितवीर्यसंपदां पराभवोऽप्युत्सव एव मानिनाम् ॥ ४१ ॥

अन्वयः—यत् इयं दशा द्विषन्निमित्ता ततः मे मनः समूलम् उन्मूलयतीव, परैः अपर्यासितवीर्यसंपदां मानिनां पराभवोऽपि उत्सव एव ॥ ४१ ॥

स्वाभिमानी जो मानी शत्रुओं से पराजित न होकर दैव योग से आपद ग्रस्त हो जाते है वे इस आपद को हर्ष पूर्वक सहन करते है किन्तु शत्रुओं से लाई हुई आपत्ति से बहुत दुःखी होते है।

41. That this wretched condition has been brought to you by your enemies tears up my heart by the roots, (convulses my very soul; for difficulties brought on by fate do not pain so much). Even the misfortune of self-respected men, whose glory is not clouded by their enemies, is an occasion for joy !

विहाय शान्तिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् ॥
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥

अन्वयः— (हे) नृप ! शांतिं विहाय तत् (क्षात्रं) धाम विद्विषां वधाय पुनःसंधेहि. प्रसीद, निःस्पृहा मुनयः शत्रून् (षड्रिपून्) अवधूय शमेन सिद्धिं (मोक्षसिद्धिं) व्रजन्ति, भूभृतः (तु) शमेन सिद्धिं (राज्यसिद्धिं) न व्रजन्ति ॥ ४२ ॥

42. Give up, therefore, O king! your forgiving peace-policy. Please resume your heroic lustre for the destruction of your enemies. Sages free from all desires attain their goal (absolution) by conquering their passions by peaceful means and not the kings (They cannot attain their goal-winning back lost kingdom-by peace).

पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् ॥
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥ ४३ ॥

अन्वयः—धामवतां पुरःसराः यशोधनाः भवादृशाः सुदुःसहम् ईदृशं निकारं प्राप्य रतिं कुर्वते चेत् (तर्हि) हन्त मनस्विता निराश्रिता (सती) हता ॥ ४३ ॥

43. If kings like yourself, rich in fame and foremost among the illustrious thus resort to contentment (worthy of sages only) after meeting with such reverses (from enemies) as are extremely painful to be put up with, then alas ! lost is all high-mindedness having no क्षत्रिय to support it.

अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ॥
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥ ४४ ॥

अन्वयः—अथ निरस्तविक्रमः (सन्) चिराय क्षमाम् एव सुखस्य साधनं पर्येषि (तर्हि) लक्ष्मीपतिलक्ष्म कार्मुकं विहाय जटाधरः (सन्) इह पावकं जुहुधि ॥ ४४ ॥

44. If you, abandoning all valour, think that forgiveness (to foes) is the only means of bringing about happiness after a long time, then set aside this bow, an emblem of kings, and wearing braided hair, keep worshipping the God Fire by offering oblations in this very forest.

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ॥
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि ॥ ४५ ॥

अन्वयः—परेषु निकृतिपरेषु (सत्सु) भूरिधाम्नस्ते समयपरिरक्षणं न क्षमम्, (तथापि) विजयार्थिनः क्षितीशाः अरिषु सोपधि संधिदूषणानि विदधति ॥ ४५ ॥

45. When your enemies are constantly on the watch to ruin you, it is not necessary that you, possessed of baffling prowess, should fulfil your pledge (of remaining an exile in the forest for 13 years). For sovereigns, desirous of success over their enemies find fault with agreements under any (plausible) pretext.

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ॥

रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ ४६ ॥

अन्वयः—विधिसमयनियोगात् अगाधे आपत्पयोधौ मग्नं दीप्तिसंहारजिह्मं शिथिलवसुं रिपुतिमिरम् उदस्य उदीयमानं त्वां दिनादौ दिनकृतमिव लक्ष्मीः भूयः समभ्येतु ॥ ४६ ॥

46. As, by the (irrevocable) decrees of Fate and Time, the Sun, who was plunged into the unfathomable Western Ocean, who became dim for loss of heat or brightness, and was shorn of his rays (only the previous night), dispels, in the (next) morning, darkness and regains his natural lustre; so may you, who are plunged into unimaginable adversity (partly) by the decree of Fate and (partly) by your agreement (pledge of remaining an exile for 13 years), who have become gloomy for loss of power and are robbed of your wealth, defeat your foes and recover your lost empire.

द्वितीयःसर्गः

—o—

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ॥
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ १ ॥

अन्वयः— अथ वृकोदरः प्रियया विहितां मनःप्रियां गिरं गरीयसीं निश्चित्य नृपम् उपपत्तिमत् ऊर्जिताश्रयं वचनम् ऊचे ॥ १ ॥

1. Bhima, concluding that the words, uttered by his dear wife (Draupadi) and approved of by his heart (as they echoed his own sentiments), were substantially true, made the following vigorous and argumentative speech.

यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ॥
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ २ ॥

अन्वयः—मानिनी स्नेहमयेन चक्षुषा परितः अवेक्ष्य यत् अवोचत् केनापि दुर्वचं तत्, वचनं वागधिपस्यापि विस्मयं विदधीत (अथवा) तत् वचनं वागधिपस्यापि दुर्वचं (अतः सर्वस्य) विस्मयं विदधीत ॥ २ ॥

2. A speech, like the one which Draupadi, justly proud of her khastriya race, made, with proper circumspection and with eyes beaming with affection (1) none could have made and (hence) would excite the admiration of even the Lord of speech or (2) it is difficult even for the Lord of Speech to make and (hence) will excite (universal) admiration.

विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ॥
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥

अन्वयः—विषमः अपि नयः पयसाम् आशय इव कृततीर्थः (सन्) विगाह्यते तु तत्र स विशेषदुर्लभः यः कृत्यवर्त्म सत् उपन्यस्यति ॥ ३ ॥

3. As a lake, though inaccessible, can be dived in by any one when descent (steps, &c.) is prepared, so the science of politics, though difficult of comprehension, can be understood by deep study; but that man is extremely rare who can rightly guide us through (by pointing out proper places of baths, &c. and in the second case, by suggesting proper times for conciliation, declaration of wars, &c.).

परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम् ॥
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥

अन्वयः—परिणामसुखे गरीयसि क्षतौजसां व्यथके अल्पीयसि (अपि) अस्मिन् वचसि अतिवीर्यवति भेषजे इव बहुगुणः दृश्यते ॥ ४ ॥

4. Great efficacy is found in this speech, though short, which is very noble, highly spirited, painful only to those who have lost their manliness, but productive of good in the end (.if followed faithfully) as in a potent medicine, though taken in a small quantity, hateful only to the weak, but curing in the end.

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ॥
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ ५ ॥

अन्वयः—रुचिरार्था इयं भारती इष्टगुणाय भवतेऽपि रोचताम् गुणगृह्या विपश्चितः वक्तृविशेषनिःस्पृहा ननु ॥ ५ ॥

5. May this salutary speech be acceptable even to you, an appreciator of merits. Wise men who look to merits (only) are impartial indeed about the differentia (age, sex, &c.) of the speaker.

चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता ॥
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥ ६ ॥

अन्वयः—हे (नृप) चतसृष्वपि विद्यासु निरूढिम् आगता (अत एव) विवेकिनी ते मतिः कथं करिणी पङ्कमिव विपर्ययम् एत्य अवसीदति ॥ ६ ॥

6. How indeed does your mind that attained proficiency in all the four branches of knowledge (Metaphysics, Study of the Vedas, Political Economy and Politics) and (hence) became discriminating, sink into thoughtlessness as the she-elephant does into mud.

विधुरं किमतःपरं परैरवगीतां गमिते दशामिमाम् ॥
अवसीदति यत्सुरैरपि त्वयि संभावितवृत्ति पौरुषम् ॥ ७ ॥

अन्वयः—त्वयि परैः इमाम् अवगीतां दशां गमिते (सति) सुरैरपि संभावितवृत्ति पौरुषं यत् अवसीदति अतः परं विधुरं किम् ॥ ७ ॥

7. What is more lamentable than that your prowess, once praised even by Gods, should thus deteriorate when you are reduced to this deplorable plight by your enemies.

द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः ॥
न महानपि भूतिमिच्छता फलसंपत्प्रवणः परिक्षयः ॥ ८ ॥

अन्वयः—भूतिमिच्छता सुमेधसा गुरुः (अपि) द्विषताम् उदयः अस्वन्ततरः सुमर्षणः महानपि परिक्षयः फलसंपत्प्रवणः न (सुमर्षणः) ॥ ८ ॥

8. The wise person who desires his own good, should endure the prosperity of his enemy, though great, if it is bordering on decay; but he ought not to close his eyes against his (enemy's) decline, if it is likely to be crowned with success.

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः ॥
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥

अन्वयः—कृती परस्य क्षययुक्तिम् अचिरेण भूयसीम् आत्मनः (क्षययुक्तिं) विपरीतां (च) विगणय्य उपेक्षेत अन्यथा तत्प्रतिकारं (अचिरेण) कुरुते ॥ ९ ॥

9. A wise man considering that the probability for the decline of the enemy is great and immediate, and that for his own just the reverse (little and distant) remains silent, but when contrary is the case (as is ours) he takes immediate steps to counteract the same.

अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ॥
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ १० ॥

अन्वयः—उदेष्यतीं द्विषतां प्रभुशक्तिम् अनीहया अनुपालयतां महीभुजां श्रियः जननिर्वादभयात् इव अचिरात् अपयान्ति ॥ १० ॥

10. Fortune leaves those kings who overlook, through indolence, the increasing power (consisting of treasures and armies) of their enemies, as if from fear of public censure (arising from her attachment to a feeble king).

क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये ॥
प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥

अन्वयः—क्षययुक्तमपि स्वभावजं शिवं धाम दधतं समृद्धये उत्थितम् अनपायं नृपं प्रजाः प्रतिपच्चन्द्रमिव प्रणमन्ति ॥ ११ ॥

11. The subjects worship the rising king as they do the new born moon, bearing natural and delightful lustre, though divested of former (world-wide) glory, and ready for advancement.

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः ॥
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ १२ ॥

अन्वयः—कृतपंचाङ्गविनिर्णयः नयः कोशदण्डयोः प्रभवः खलु, स विधेयपदेषु लोकः नियतिमिव दक्षतामनुरुध्यते ॥ १२ ॥

12. Policy based on the ascertainment of the five principal means of success (means for the commencement, support of men and money, considerations of time and place, removal of obstructions and actual accomplishment) is really the true source of (collecting) treasures and armies. But (even) such (perfect) policy depends, for success, on unflinching energy as does husbandry on Providence.

अभिमानवतो मनस्विनः प्रियमुच्चैःपदमारुरुक्षतः ॥
विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥ १३ ॥

अन्वयः—अभिमानवतः प्रियम् उच्चैः पदम् आरुरुक्षतः मनस्विनः आत्मपौरुषं विनिपातनिवर्तनक्षमम् आलम्बनं मतम् ॥ १३ ॥

13. In the case of a man possessed of self respect and courage and wishing to attain his much cherished elevated position, personal valour is (chiefly) considered to be the means, which is capable of removing all obstructions.

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ॥
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥ १४ ॥

अन्वयः—अविक्रमं विपदः अभिभवन्ति, आपदुपेतम् आयतिः रहयति, निरायतेः लघुता नियता, अगरीयान् नृपश्रियः पदं न ॥ १४ ॥

14. Difficulties overwhelm a feeble man; there is no bright future before him so beset; no respect is shown to him who has no hopes of rising, and Royal fortune never smiles upon him who is slighted.

तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् ॥
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ १५ ॥

अन्वयः—तत् (तस्मात्) उन्नतः प्रतिपक्षं व्यवसायवंध्यताम् अवलंब्य अलं, पराक्रमाश्रया समृद्धयः विषादेन समं न निवसन्ति ॥ १५ ॥

15. Enough therefore, of keeping yourself from active life which is an obstruction to elevation. Fortune that follows valour never lives with languor. (Fortune favours the brave).

अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना ॥
धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्रसंपदः ॥ १६ ॥

अन्वयः—अथ अवधिः प्रतीक्ष्येत चेत् आविष्कृतजिह्मवृत्तिना धृतराष्ट्रसुतेन चिरम् आस्वाद्य नरेन्द्रसंपदः (अथवा) हे नरेन्द्र संपदः कथं सुत्यजाः ॥ १६ ॥

16. If you wait for the expiry (of the term of 13 years) how can Duryodhana, whose fraudulent conduct has been exposed (in usurping your kingdom) be expected to make over to you after having experienced for such a long period the nature of comforts of the Royal fortune (without struggle or bloodshed).

द्विषता विहितं त्वयाथवा यदि लब्धा पुनरात्मनः पदम् ॥
जननाथ तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥

अन्वयः—अथवा द्विषता विहितं पुनः आत्मनः पदं यदि लब्धा जननाथ ! तव अनुजन्मनाम् आविष्कृतपौरुषैर्भुजैः कृतम् ॥ १७ ॥

17. Or if you get back your kingdom on its being returned to you by your enemy Duryodhan, (after the expiration of the term) what then, O Lord of men, is the use of the arms of your brothers, of well-known prowess.

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः ॥
लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥ १८ ॥

अन्वयः—मृगाधिपः स्वयं हतैः मदसिक्तमुखैः करिभिः वर्तयते (तथाहि) तेजसा जगत् लघयन् महान् अन्यतः भूतिं न इच्छति खलु ॥ १८ ॥

18. The lion (Lord of beasts) lives upon elephants in rut, killed by himself. The valiant person, who defies the world on the strength of his valour, does not indeed wish to attain eminence at the hand of other persons.

अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः ॥
अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥

अन्वयः—अभिमानधनस्य (अतएव) गत्वरैः असुभिः स्थास्नु यशः चिचीषतः अचिरांशुविलासचञ्चला लक्ष्मीः आनुषङ्गिकं फलं ननु ॥ १९ ॥

19. Wealth, which is transient like a flash of lightning, is only a secondary object (attainable without efforts) to him, who is proud of his khastriya blood, and who desires to gain immortal fame at the sacrifice of perishable life.

ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ॥
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥

अन्वयः—जनः भस्मनां चयम् आस्कंदति, ज्वलितं हिरण्यरेतसं न, अतः मानिनः अभिभूतिभयात् असून् (एव) उज्झन्ति, धाम न ॥ २० ॥

20. People trample upon a heap of ashes but dare not (touch) blazing fire. Hence, men of self respect, from fear of defeat, give up their lives but never their inherent lustre.

किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः ॥
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ २१ ॥

अन्वयः—मृगाधिपः किं फलम् अपेक्ष्य ध्वनतः पयोधरान् प्रार्थयते, महीयसः सा प्रकृतिः खलु यया अन्यसमुन्नतिं न सहते ॥ २१ ॥

21. What does the lion expect when he roars at the thundering cloud? Verily it is the nature of the mighty that never allows them to put up with the superiority of another.

कुरु तन्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजम् ॥
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥ २२ ॥

अन्वयः—हे नृप, तत् (तस्मात्) प्रमादजं तमः निर्धूय विक्रमे मतिं कुरु. विद्विषां विपत्तयः त्वदनुत्साहहताः एतत् ध्रुवम् अवेहि ॥ २२ ॥

22. Abandon your false notion therefore, O king, generated by misapprehension, and resolve to manifest your valour. Rest assured that the destruction of your enemies is delayed only by your inaction.

द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः ॥
प्रसहेत रणे तवानुजान्द्विषतां कः शतमन्युतेजसः ॥ २३ ॥

अन्वयः—दिग्विभावितान् आयतः चतुरः द्विरदान् इव (तथा चतुरः) तोयनिधीन् इव रणे शतमन्युतेजसः चतुरः तव अनुजान् द्विषतां कः प्रसहेत ॥ २३ ॥

23. Who of your enemies will be bold enough to brave your four brothers, illustrious as Indra himself, when rushing like the four well-known elephants or the four oceans.

ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि ॥
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसंततिः ॥ २४ ॥

अन्वयः—तव चेतसि सततं ज्वलतः वैरिकृतस्य जातवेदसः शिवेतरा रिपुनारीनयनाम्बुसंततिः शमं विदधातु ॥ २४ ॥

24. May the ever blazing fire (of anger) burning in your mind be extinguished by the unauspicious flood of tears from the eyes of the wives of your enemies (caused by the deaths of their husbands, sons, &c.).

इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् ॥
उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

अन्वयः—इति दर्शितविक्रियं कोपपरीतमानसं मरुतः सुतं महीपतिः दुष्टं द्विरदमिव उपसान्त्वयितुम् उपचक्रमे ॥ २५ ॥

25. The monarch began to appease the son of Marut (Bhima) as one would do a wild elephant, who was all wrath and who had (thus) manifested his excitement,

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ॥
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

अन्वयः—अपवर्जितविप्लवे शुचौ (अत एव) हृदयग्राहिणि मङ्गलास्पदे तव गिरां विस्तरे मतिः आदर्श इव विमला अभिदृश्यते ॥ २६ ॥

26. As in a mirror, which is clear, free from dust, made of excellent glass and (hence) transparent, and auspicious, so in your speech, that is lucid, free from questionable arguments (decisive), elegant, and (hence) attractive and full of wholesome advice, your mind is reflected.

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ॥
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥ २७ ॥

अन्वयः—पदैः स्फुटता न अपाकृता, अर्थगौरवं च न स्वीकृतम् (इति) न गिरां पृथगर्थता रचिता (तथा) क्वचित् (अपि) (गिरां) सामर्थ्यं च न अपोहितम् ॥ २७ ॥

27. Your words are perspicuous, nor are they wanting in depth of meaning. There is no repetition of words (or of ideas), nor is syntax neglected.

उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः ॥
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

अन्वयः—(किंच) बलात् उपपत्तिः उदाहृता, अनुमानेन च आगमः न क्षतः, ईदृक् इदम् (वचनम्) अनीदृगाशयः कः प्रसभं वक्तुं उपक्रमेत ॥ २८ ॥

28. Arguments (in favour of war) were ably put forth, logical inferences were not in conflict with the teaching of shastras. Who that has no such warlike spirit in him would make such spirited and extempore speech.

अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति ॥
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसंपदः ॥ २९ ॥

अन्वयः—तथापि मे हृदयम् अवितृप्ततया निर्णयमेव धावति, विधेयेषु विशेषसम्पदः सुखम् अवसाययितुं न क्षमाः ॥ २९ ॥

29. Still (in spite of your having conclusively proved the advisibility of war) my mind not being satisfied, struggles to solve the difficulty. Among general rules (such as conciliation, &c. which are easy to know) there are many special rules not easy of comprehension (as they are minute, various and difficult to understand).

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ॥
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥ ३० ॥

अन्वयः—सहसा क्रियां न विदधीत, अविवेकः आपदां परं पदम्, (हि) विमृश्यकारिणं गुणलुब्धाः संपदः स्वयमेव वृणते ॥ ३० ॥

30. Nothing should be done rashly, for want of discrimination is the chief source of misfortunes. For prosperity, ever attached to merits, selects the man of circumspection (for her lord) of her own accord.

अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा ॥
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥ ३१ ॥

अन्वयः—यः विधिबीजानि विवेकवारिणा अनुपालयन् अभिवर्षति लोकः (फलशालिनी) शरदमिव सः फलशालिनीं क्रियां सदा अधितिष्ठति ॥ ३१ ॥

31. He, who nourishes the seeds of duty, expectant of success, with waters of prudence, obtains (slowly but surely) his desired fruits as husbandman reaps autumnal harvests.

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रिया ॥
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥ ३२ ॥

अन्वयः—शुचि श्रुतं वपुः भूषयति, तस्य प्रशमः अलंक्रिया भवति, पराक्रमः प्रशमाभरणं (भवति), सः नयापादितसिद्धिभूषणः ॥ ३२ ॥

32. Knowledge (derived from tradition) which is correct, adorns the person; tranquillity of mind beautifies knowledge; valour (on proper occasions) sets off tranquillity and success produced by thoughtfulness is the natural result of valour (thoughtfulness therefore, is the ornament and source of all).

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ॥
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥

अन्वयः—मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनां सुकृतः परिशुद्ध आगमः दीप इव अर्थदर्शनं कुरुते ॥ ३३ ॥

33. When the knowledge of duty is eclipsed by a conflict of ideas and (hence) difficult to be grasped, then the knowledge, acquired after long study and hence correct by cool-headed persons, shows (them) the way to reach their objects as a lamp that is clean, and well placed (in a calm place) illumines objects concealed (before) by darkness.

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ॥
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥ ३४ ॥

अन्वयः—स्पृहणीयगुणैः महात्मभिः चरिते वर्त्मनि मनः यच्छतां विधिहेतुः आगसाम् अहेतुः विनिपातः अपि समुन्नतेः समः ॥ ३४ ॥

34. In the case of persons who follow the path traversed by great men of enviable virtues, even the fall, caused by adverse fate, does not give ground for blame but is as creditable as rise itself.

शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतीम् ॥
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ॥ ३५ ॥

अन्वयः—जिगीषवः विजितक्रोधरयाः गरीयसीं फलनिष्पत्तिम् अदूषितायतीं विगणय्य पौरुषं शिवं औपयिकं नयन्ति ॥ ३५ ॥

35. Those who wish to conquer their enemies (first) overcome all impulses of wrath, (then) convince themselves that great successes or results are always obtained at the end (and therefore) (patiently) join their valour to favourable means (use their valour when favourable opportunities occur).

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः ॥
अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते ॥ ३६ ॥

अन्वयः—उदेतुम् इच्छता पुरः रोषमयं तिमिरं धिया अपनेयम्, अंशुमतापि प्रभया निशाकृतं तमः अविभिद्य न उदीयते ॥ ३६ ॥

36. The man, who wishes to rise, should first by thoughtfulness get rid of ignorance caused by anger. Even the sun does not rise before he has dispelled by his light the darkness of night.

बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः ॥
क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसंपदः ॥ ३७ ॥

अन्वयः—बलवानपि यः कोपजन्मनः तमसः अभिभवं न रुणद्धि सः क्षयपक्ष ऐन्दवीः कला इव सकलाः शक्तिसंपदः हन्ति ॥ ३७ ॥

37. Howsoever powerful a man may be, he loses all his regal power (consisting of majesty, energy and counsel) if he does not check the influence of ignorance caused by anger, as the moon loses all her digits in the dark fortnight.

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ॥
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥

अन्वयः—यः समवृत्तिः (सन्) समये मार्दवम् उपैति, तिग्मतां च तनोति, स मेदिनीपतिः विवस्वानिव ओजसा लोकम् अधितिष्ठति ॥ ३८ ॥

38. That monarch who, maintaining the equanimity of his mind, assumes mildness or severity as occasion demands, subdues, like the sun, the whole world by his majesty.

क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता ॥
शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

अन्वयः—श्रियां चिराय परिग्रहः क्व, दुष्टेन्द्रियवाजिवश्यता च क्व, (हि) शरदभ्रचलाः बहुच्छलाः श्रियः चलेन्द्रियैः असुरक्षाः ॥ ३९ ॥

39. Where is the perpetual mastery over prosperity ? and where the slavery under horse-like (unruly) passions ! (they cannot dwell together). Wealth, flitting like autumnal clouds and ever ready to seek various pretexts to slip away, cannot be properly managed by those who are slaves of their passions.

किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः ॥
क्रियते पतिरुच्चकैरपां भवता धीरतयाधरीकृतः ॥ ४० ॥

अन्वयः—उपात्तरंहसः मनसः असामयिकं क्षोभं वितन्वता भवता (पुरा) धीरतया अधरीकृतः अपां पतिः (अधुना) किम् उच्चकैः क्रियते ॥ ४० ॥

40. Why do you, who (once) surpassed in profundity (calmness) the ocean, now allow (him) to domineer over you, by exhibiting untimely excitement of your impulsive mind ?

श्रुतमप्यधिगम्य ये रिपून्विनयन्ते न शरीरजन्मनः ॥
जनयन्त्यचिराय संपदामयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

अन्वयः—ये श्रुतम् अधिगम्य अपि शरीरजन्मनः रिपून् न विनयन्ते ते अचिराय संपदां चापलाश्रयम् अयशः जनयन्ति खलु ॥ ४१ ॥

41. Verily, those, who even after studying the Shastras, do not check their carnal (bodily) passions, bring the Goddess of Wealth into ill fame as being unsteady (in her attachment).

3

अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी ॥
जनवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

अन्वयः—अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी अक्षमा भवन्तं जनवत् नयसिद्धेः अपनेतुं न अर्हति ॥ ४२ ॥

42. Do not allow anger to rob you, like ordinary people, of the success to be had by following a sound policy;–anger, that frustrates the (usefulness of) proper time and means and that (only) inflames the body and the senses.

उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः ॥
अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

अन्वयः—आयतेः भृशम् उपकारकं भूरिणः कर्मफलस्य प्रसवः अनपायि द्विषां निबर्हणं तितिक्षासमं साधनं न अस्ति ॥ ४३ ॥

43. No other means are (productive of so much good) as Forgiveness, which yields highly beneficial results in the end, which is the source of successes in one's undertakings, which, itself indestructive, destroys enemies.

प्रणतिप्रवणान्विहाय नः सहजस्नेहनिबद्धचेतसः ॥
प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥

अन्वयः—सहजस्नेहनिबद्धचेतसः मानभृतां प्रथमे वृष्णयः प्रणति-प्रवणान् नः विहाय सुयोधनं सदा न प्रणमन्ति ॥ ४४ ॥

44. The Yadawas, foremost among those who are possessed of self respect and bound to us by natural ties of affection, will not permanently bow (adhere) to Suyodhana leaving us, who ever are humbly attached to them.

सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये ॥
विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥

अन्वयः—एषां (वृष्णीनां) ये सहजाः सुहृदः तथा इतरे मतं न विलङ्घयन्ति ते आत्मसिद्धये धृतराष्ट्रात्मजं विनयादिव यापयन्ति ॥ ४५ ॥

45. The natural friends (relatives) and others who will never leave the side of the Yâdawâs, follow Suyodhana, as if in submission for their private ends (they are sure to join in the end the standard of the Yâdawâs).

अभियोग इमान्महीभुजो भवता तस्य कृतः कृतावधेः ॥
प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानिव ॥ ४६ ॥

अन्वयः—कृतावधेः तस्य भवता कृतः अभियोगः इमान् महीभुजः हरिदश्वः कमलाकरान् इव समुत्पतन् प्रविघाटयिता ॥ ४६ ॥

46. If before the stipulated time, you make an attack upon Suyodhan, that will detach those kings (Yâdawâs and their partisans) as the Sun, immediately after his rise, separates the (petals of) lotuses.

उपजापसहान्विलङ्घयन्स विधाता नृपतीन्मदोद्धतः ॥
सहते न जनोऽप्यधःक्रियांकिमु लोकाधिकधाम राजकम् ॥ ४७ ॥

अन्वयः—मदोद्धतः सः नृपतीन् विलङ्घयन् उपजापसहान् विधाता, जनः अधःक्रियां न सहते, लोकाधिकधाम राजकं किमु (सहेत) ? ॥ ४७ ॥

47. Inflated with pride, Suyodhan (sooner or later) will insult the other kings (now his partisans) and will make them capable of being split (drive them to embrace our cause). Even common people do not pocket insults. How can princes, possessed of extraordinary prowess, put up with (them).

असमापितकृत्यसंपदां हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥

अन्वयः—असमापितकृत्यसंपदाम् अभिमानशालिनां विभूतयः तावता विनयेन हतवेगं मदम् उत्तम्भयितुं प्रभवन्ति ॥ ४८ ॥

48. The prosperity of arrogant persons, who have not achieved their objects, admits of heightening their insolence, the violence of which was restrained (only) with (assumed) humility for the time being.

मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः ॥ ४९ ॥

अन्वयः—मदमानसमुद्धतं नृपं मूढता नियमेन न वियुङ्क्ते, अतिमूढः नयात् उदस्यते, नयहीनात् जनः अपरज्यते ॥ ४९ ॥

49. The man, who is inflated by insolence and pride is never left by imprudence (confusion of what ought and ought not to be done); he who is extremely imprudent easily swerves from the right path; and he who swerves from the right path is disliked by the people.

अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंततिः ।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥ ५० ॥

अन्वयः—अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंततिः रिपुः महान् अपि तरुवत् सहिष्णुना उन्मूलयितुं सुकरः ॥ ५० ॥

50. Driven by the wind of discontent and (hence) having roots in the form of his powers (ministers, &c.) gradually loosened (estranged) even the mighty enemy like a tree is easy to be uprooted by one who has patience enough.

अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः ॥ ५१ ॥

अन्वयः—अन्तःप्रकृतिप्रकोपजः विग्रहः अणुः अपि प्रभुम् उपहन्ति, तरुशाखान्तनिघर्षजः अनलः अखिलं भूधरं हिनस्ति (हि) ॥ ५१ ॥

51. Even an insignificant revolt, produced by the disaffection of his trusted counsellors, is sure to destroy the king. For (we see that) the sparks, produced by the friction of the ends of the branches of a tree, burn the whole mountain.

मतिमान्विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे विपदन्ता ह्यविनीतसंपदः ॥ ५२ ॥

अन्वयः—विनयप्रमाथिनः द्विषः समुन्नतिं मतिमान् उपेक्षेत, तादृक् अन्तरे सुजयः, हि अविनीतसंपदः विपदन्ताः ॥ ५२ ॥

52. The wise man should connive at the prosperity of his impudent enemy. Such a foe is easy to be conquered in (by taking advantage of) his weak points. Indeed the prosperity of arrogant persons is sure to end in disasters.

लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलम् ॥
अभिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः ॥ ५३ ॥

अन्वयः—लघुवृत्तितया बहिः अन्तः च भिदां गतं नृपस्य मंडलम् अनन्तरः आपगारयः शिथिलं कूलम् इव अभिभूय हरति ॥ ५३ ॥

53. A neighbouring prince, (wishing to extend his dominions) invades and (immediately) subjugates the kingdom of a king, whose subjects and counsellors are dissatisfied with him by his ill conduct, as the forcible current of a river encroaches upon the loosened banks and takes them off (destroys them).

अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ॥
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥ ५४ ॥

अन्वयः—इति आकुलम् अर्जुनाग्रजं नयवर्त्म अनाकुलम् अनुशासतं तं पराशरात्मजः स्वयम् अभिवांछित अर्थ इव अभीयाय ॥ ५४ ॥

54. When thus guiding Bhima, who was enraged (at the recollection of former insults) in accordance with the teachings of Shastras in the right line of policy, there (suddenly) appeared before धर्म the (son of Parâshara, an embodiment, as it were, of the desired object.

मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः ॥
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥ ५५ ॥
सहसोपगतः सविस्मयं तपसां सूतिरसूतिरापदाम् ॥
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसंचयः ॥ ५६ ॥

अन्वयः—मधुरैः निरीक्षितैः अवशानि तिर्यंचि शमं लंभयन् परितः एनसां दहनं विलोकनक्षमं पटु धाम बिभ्रत्, सहसा उपगतः तपसां सूतिः आपदाम् असूतिः स मुनिः वपुष्मान् पुण्यसंचय इव जगतीभुजा सविस्मयं ददृशे ॥ ५५ ॥ ५६ ॥

55-56. Making even the wild animals (tigers, lions, &c.) peacefully-inclined by his gentle sweet looks, diffusing his own lustre all around which burned all sins and which though bright could be gazed at, the source of piety, the remover of evils, that sage who made his sudden appearance, was seen by the king as an embodiment of religious merit with great astonishment.

अथोच्चकैरासनतः परार्ध्यादुद्यन्स धूतारुणवल्कलाग्रः ॥
रराज कीर्णाकपिशांशुजालः शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥ ५७ ॥

अन्वयः—अथ उच्चकैः परार्ध्यात् आसनतः उद्यन् धूतारुणवल्कलाग्रः स (नृपः) कीर्णाकपिशांशुजालः सुमेरोः शृङ्गात् तिग्मरश्मिः इव रराज ॥ ५७ ॥

57. When rising from his lofty and excellent seat, the king, the ends of whose purple bark-garment were gently shaken, shone like the sun rising on the towering peaks of the mountain Meru and spreading his purple rays all around.

अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टाम् ॥
तदनुमतमलंचकार पश्चात्प्रशम इव श्रुतमासनं नरेन्द्रः ॥ ५८ ॥

अन्वयः—स अवहितहृदयः (सन्) ऋषिप्रवरे ऋषिवत् गुरूपदिष्टाम् अर्हां विधाय पश्चात् तदनुमतम् आसनं प्रशमः श्रुतम् इव अलंचकार ॥ ५८ ॥

58. On finishing with an attentive mind, the saintly worship of this saint of saints, as instructed by his Guru (as prescribed in the shastras) the monarch adorned the seat which he was directed to take by the saint, as tranquillity of mind adorns the knowledge of the Vedas.

व्यक्तोदितस्मितमयूखविभासितोष्ठस्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ॥
तन्वन्तमिद्धमभितो गुरुमंशुजालं लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः ॥ ५९ ॥

अन्वयः—व्यक्तोदितस्मितमयूखविभासितोष्ठः विकीर्णधाम्नः मुनेः अभिमुखं तिष्ठन् सः इद्धम् अंशुजालं तन्वंतं गुरुम् अभितः (तिष्ठतः) सकलस्य शशांकमूर्तेः लक्ष्मीम् उवाह ॥ ५९ ॥

59. He (Yudhisthira) whose lips shone by the rays of a full smile, sitting before that sage whose lustre was diffused all around, bore the beauty of a full moon by the side of Jupiter spreading around his brilliant light.

तृतीयः सर्गः

—o—

ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ॥
बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहम् ॥ १ ॥
प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ॥
प्रसह्य चेतःसु समासजन्तमसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥
अनुद्धताकारतया विविक्तां तन्वन्तमन्तःकरणस्य वृत्तिम् ॥
माधुर्यविस्रम्भविशेषभाजा कृतोपसंभाषमिवेक्षितेन ॥ ३ ॥
धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनाम् ॥
हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥

अन्वयः—(१) ततः शरच्चंद्रकराभिरामैः उत्सर्पिभिः अंशुजालैः प्रांशुम् इव (स्थितम्), आनीलरुचं, पिशङ्गीः जटाः बिभ्राणम्, (अतएव) तडित्वन्तम् अम्बुवाहम् इव (स्थितम्) (२) समग्रां प्रसादलक्ष्मीं दधतम् (अत एव) जनातिगेन वपुःप्रकर्षेण असंस्तुतानामपि चेतःसु आर्द्रभावं प्रसह्य समासजन्तम् (३) अनुद्धताकारतया अन्तःकरणस्य वृत्तिं विविक्तां तन्वन्तम् माधुर्यविस्रम्भविशेषभाजा ईक्षितेन कृतोपसंभाषमिव, (४) धर्मनिबन्धिनीनाम् एनःप्रणुदां श्रुतीनां प्रसूतिं सुखोपविष्टं मुनिं तदभ्यागमने हेतुं परीप्सुः धर्मात्मजः आबभाषे ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

1–4 Yudhishtira, desirous to know the object of his (unexpected) visit thus addressed that sage, who was seated comfortably, who looked majestic by the effulgent encircling halo of lustre delightful like the rays of the autumnal moon; who had a bright dark appearance; who wearing brown matted hair resembled a cloud accompanied by flashes of lightning; who possessed the wealth of absolute composure; who, by the extraordinary excellence of his person won the hearts of even those who did not know him; who manifested the purity of his mind by his gentle demeanour; who seemed as if, to have already spoken through his sweet and confidence-inspiring looks and (above all) who was the origin (compiler) of the Vedas that instruct (men) in different duties (अग्निहोत्र and others) and that destroy sins.

अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ॥
तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥

अन्वयः—अनाप्तपुण्योपचयैः दुरापा फलस्य सवित्री निर्धूतरजाः एषा भवद्दर्शनसंपत् वीतबलाहकायाः दिवः वृष्टेः तुल्या ॥ ५ ॥

5. Unobtainable to those who have not accumulated religious merit, productive of good results and removing impurities, this good fortune or blessing of your (unexpected) appearance is to be sure (indicative of some future good) like the showers of rain from an unclouded sky.

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः संप्रति भूमिदेवाः ॥
आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रम् ॥ ६ ॥

अन्वयः—अद्य क्रतूनां क्रियाः कामदुघाः, संप्रति भूमिदेवाः सत्याशिषः यत् त्वयि आगते आसंसृतेः (अहं) जगत्सु बहुमानपात्रं जातः अस्मि ॥ ६ ॥

6. Today have all my sacrificial performances been to me a cow of plenty (yielding all desires), the Brahmins have their blessings now fulfilled; since by your (favouring me with) this visit, I shall be highly honoured all over the world till its end.

श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्नौति तनोति कीर्तिम् ॥
संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते ॥ ७ ॥

अन्वयः—आत्मयोनेः इव लोकगुरोः तव अमोघं संदर्शनं श्रियं विकर्षति, अघानि अपहन्ति, श्रेयः परिस्नौति, कीर्तिं तनोति (किम्बहुना) किं न धत्ते ? ॥ ७ ॥

7. The sight of yourself, the Teacher of the world, is, like that of the self-born (Brahmin) unfailing. It increases wealth (prosperity) destroys sins, pours blessings and spreads fame; (in short) what is it not productive of ?

श्च्योतन्मयूखेऽपि हिमद्युतौ मे न निर्वृतं निर्वृतिमेति चक्षुः ॥
समुज्झितज्ञातिवियोगखेदं त्वत्सन्निधावुच्छ्वसतीव चेतः ॥ ८ ॥

अन्वयः—श्च्योतन्मयूखे हिमद्युतौ अपि न निर्वृतं मे चक्षुः त्वत्सन्निधौ निर्वृतिम् एति, (तथा) समुज्झितज्ञातिवियोगखेदं चेतः उच्छ्वसतीव ॥ ८ ॥

8. In your (inspiring) presence, my eyes that found no delight in the ambrosial rays of the moon, enjoys complete happiness, and my mind, forgetting all grief at the separation of relatives, seems to draw full breath.

निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःस्पृहाणाम् ॥
तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ॥ ९ ॥

अन्वयः—प्रश्नकुतूहलित्वं निरास्पदम्, निस्पृहाणाम् अस्मासु अधीनं किमु, तथापि कल्याणकरीं ते गिरं श्रोतुम् इच्छा मां मुखरीकरोति ॥ ९ ॥

9. My curiosity of asking you (the cause of your coming) has really no room; for what can be expected from us by persons, free from all worldly desires. Still the desire to hear your beneficial advice prompts me to speak.

इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ ॥
उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥

अन्वयः—इति उक्तिविशेषरम्यम् उक्तवान् उदारचेता नरेन्द्रः द्वैपायनेन जयोपपत्तौ मनः समाधाय इतिउदारां गिरम् अभिदधे ॥ १० ॥

10. When the magnanimous monarch thus concluded his speech, in a manner charming on account of variety of expressions and ideas, Dwaipâyean, (having thought with concentration and satisfaction) over the accomplishment of his (king's) objects, uttered these noble words.

चिचीषतां जन्मवतामलघ्वीं यशोवतंसामुभयत्र भूतिम् ॥
अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानाम् ॥ ११ ॥
तथापि निघ्नं नृप तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः ॥
वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषुहि पक्षपाताः ॥ १२ ॥

अन्वयः—अलघ्वीं यशोवतंसाम् उभयत्र भूतिं चिचीषतां जन्मवतां बन्धुषु तुल्यरूपा वृत्तिः अभ्यर्हिता, तपोधनानां (तु) विशेषेण अभ्यर्हिता, तथापि (हे) नृप तावकीनैः गुणौघैः प्रह्वीकृतं मे हृदयं निघ्नं, (हि) वीतस्पृहाणां मुक्तिभाजाम् अपि भव्येषु पक्षपाताः भवन्ति ॥ ११ ॥ १२ ॥

11-12. An unbiassed attitude towards relatives is befitting those who wish to attain undying greatness in this and the next world; particularly, ascetics like myself; still my heart, won by your manifold qualities, runs to you (is yours); for even those, who have no worldly desires and who aspire after absolution, are partial to the good.

सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः ॥
यस्त्यक्तवान्वः स वृथा बलाद्वा मोहं विधत्ते विषयाभिलाषः ॥ १३ ॥

अन्वयः—यूयं तस्य राज्ञः सुताः न किमु, गुणैः सुयोधनं न अतीताः वा, यो वः वृथा त्यक्तवान् स विषयाभिलाषः बलात् वा मोहं विधत्ते ॥ १३ ॥

13. Are you not the children of that king (Dhritarâshṭra) ? and has not Suyodhan been excelled in qualities (by you) ? that he has abandoned you for no fault (of yours) is because desire of enjoyment necessarily produces ignorance (makes men involuntarily blind).

जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः ॥
असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥ १४ ॥

अन्वयः—यः संशय्य कर्णादिषु तिष्ठते, एनम् (तम्) अर्थसिद्धिः कथं न जहातु, (हि) असाधुयोगाः जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥ १४ ॥

14. How will success of desired ends not fail him, who when perplexed, depends on Karna and his crew (for solution) ? Verily union of the wicked is an obstacle to success, (nay) is even the cause of crushing difficulties.

पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय ॥
त्वया विपत्स्वप्यविपत्ति रम्यमाविष्कृतं प्रेम परं गुणेषु ॥ १५ ॥

अन्वयः—रिपूणां समितौ पथः च्युतायां चिराय धर्म्यां धुरं दधानेन त्वया विपत्सु अपि अविपत्ति रम्यं गुणेषु परं प्रेम आविष्कृतम् ॥ १५ ॥

15. Steadily sticking to righteousness when the councillors (Dusshâsana and others) of your enemy left the path (of Duty), you showed (exhibited) highest love for Virtues (like forgiveness, &c.) which is (the more) pleasing, as it was unshaken even in difficulties.

विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन ॥
प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ॥ १६ ॥

अन्वयः—शमैकवृत्तेः भवतः छलेन अनात्मनीनं विध्वंसं विधाय प्रकाशितत्वन्मतिशीलसाराः ते विद्विषः कृतोपकारा इव (जाताः) ॥ १६ ॥

16. By following a suicidal policy (intended) for the ruin of yourself, who are of an entirely peaceful nature, your enemies have prominently brought forth the excellence of your wisdom and character and thus really obliged you.

लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः ॥
अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ १७ ॥

अन्वयः—तव (त्वया) धरित्री विक्रमेण लभ्या, विपक्षः च वीर्यास्त्रबलैः ज्यायान्, अतः प्रकर्षाय विधिः विधेयः (हि) रणे जयश्रीः प्रकर्षतन्त्रा ॥ १७ ॥

17. The (lost) empire is to be regained only by valour; the enemy, however, is superior in heroism (of भीम, द्रोण, &c.), arms & armies. Means, therefore, ought to be devised for (gaining) superiority over (them); for, in war success depends on superiority (of men and arms).

त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः ॥
वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानाम् ॥ १८ ॥
यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवान्तकोऽपि ॥
धुन्वन्धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः ॥ १९ ॥

अन्वयः—त्रिःसप्तकृत्वः जगतीपतीनां हन्ता सः गुरुः जामदग्न्यः यस्य वीर्यावधूतः, तदा गुणानां प्रकर्षम् आधारवशं विवेद स्म, यस्मिन् अनैश्वर्यकृतव्यलीकः अन्तकोपि पराभवं प्राप्त इव, स भीष्मः रणे धनुः धुन्वन् कस्य मनः भयैकप्रवणं न कुर्यात् ॥ १८ ॥ १९ ॥

18-19. Twanging his bow on the battlefield, whom will not Bheeshma overpower with fear ?-Bheeshma-who vanquished by his valour, that redoutable Jâmadagnya, his own preceptor in the science of arms, that extirpated the warrior race 21 times, and that then (at the time of marriage of Ambika) was made to learn that excellence of qualities (in arms) depends on (the hereditary capacity of) the recepient; from whom even the God of Death suffered defeat (as Bheeshma could choose his time of death) and hence was ashamed at his powerlessness over him.

सृजन्तमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः ॥
परिस्फुरल्लोलशिखाग्रजिह्वं जगज्जिघत्सन्तमिवान्तवह्निम् ॥ २० ॥

अन्वयः—आजौ इषुसंहतीः सृजन्तं कोपज्वलितम् (अत एव) परिस्फुरल्लोलशिखाग्रजिह्वं जगत् जिघत्सन्तम् अन्तवह्निमिव (स्थितं) गुरुं कः सहेत ॥ २० ॥

20. Who of you will be bold enough to face Droṇa, when discharging showers of arrows, kindled with fury, as if he were the terrible destructive fire devouring the world with its tongue of tremulous quivering flames.

निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यम् ॥
असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः ॥ २१ ॥

अन्वयः—संरंभनिरस्तधैर्यम् आराधितजामदग्न्यं राधेयं निरीक्ष्य मृत्योः अपि असंस्तुतेषु भयेषु प्रसभं पक्षपातः जायेत ॥ २१ ॥

21. At the sight of Karṇa, who propitiated Jâmadagnya (for learning the science of arms) and who, when angry, paralysed the courage (of his enemies,) even the God of Death would be acquainted with fear quite unknown to him (before).

यया समासादितसाधनेन सुदुश्चरामाचरता तपस्याम् ॥
एते दुरापं समवाप्य वीर्यमुन्मूलितारः कपिकेतनेन ॥ २२ ॥
महत्त्वयोगाय महामहिम्नामाराधनीं तां नृप देवतानाम् ॥
दातुं प्रदानोचित भूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम् ॥ २३ ॥

अन्वयः—यया सुदुस्तरां तपस्याम् आचरता (अतएव) समासादितसाधनेन कपिकेतनेन अन्यस्य दुरापं वीर्यं समवाप्य एते उन्मूलितारः महत्त्वयोगाय महामहिम्नां देवतानाम् आराधनीं भूरिधाम्नीं सिद्धिमिव तां विद्यां (हे) प्रदानोचित नृप ! दातुम् उपागतः अस्मि ॥ २२ ॥ २३ ॥

22–23. O king worthy of (my) favour ! I come here to impart that sacred lore (knowledge) by (the acquisition of) which, Arjuna, enabled to practise difficult penance (for the propitiation of God Siva) and hence in possession of the Pashupata missile will, with his newly acquired lustre, easily destroy these (Bhishma, Drona, &c.) ; which lore, to give him superiority over his foes, will make the deities (Indra and others) of exceeding prowess, favourable to him; which possesses supernatural lustre and which (is so unfailing in its efficacy that it) is success incarnate.

इत्युक्तवन्तं व्रज साधयेति प्रमाणयन्वाक्यमजातशत्रोः ॥
प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥

अन्वयः—इति उक्तवन्तं प्रसेदिवांसं तं (मुनिं) 'व्रज साधय' इति अजातशत्रोः वाक्यं प्रमाणयन् जिष्णुः अन्ते वसन् इव विनयेन उपाससाद ॥ २४ ॥

24. When he had thus finished, Arjuna, with the humility of a pupil went up to the gracious sage in obedience to the words 'Go and attend' of Yudhishtira, who had no enemy (as he was free from malice, &c.).

निर्याय विद्याथ दिनादिरम्याद्बिम्बादिवार्कस्य मुखान्महर्षेः ॥
पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

अन्वयः—अथ दिनादिरम्यात् अर्कस्य बिंबात् दीप्तिः स्फुरत्पद्मम् इव वन्हिकणावदाता विद्या महर्षेः मुखात् निर्याय पार्थाननम् अभिपेदे ॥ २५ ॥

25. Then the mantra shining like the spark of fire, issued from the mouth of the Great sage, and entered the mouth of Arjuna, as at daybreak, lines of light spread from the disc of the Sun to the opening lotus.

योगं च तं योग्यतमाय तस्मै तपःप्रभवाद्वितातार सद्यः ॥
येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमीलेव चिराय चक्षुः ॥ २६ ॥

अन्वयः—सः योग्यतमाय तस्मै तं योगं च तपः प्रभावात् सद्यः वितताार, येन तत्वेषु अवभासे कृते अस्य चक्षुः चिराय समुन्मिमीलेव ॥ २६ ॥

26. Through the potency of his penance, Vyasa communicated in an instant to Arjuna, the worthiest of disciples the powers of meditation, by which he got thorough knowledge (perception) of the true nature of creation and seemed to open his eyes after a long time (of blindness).

आकारमाशंसितभूरिलाभं दधानमन्तःकरणानुरूपम् ॥
नियोजयिष्यन्विजयोदये तं तपःसमाधौ मुनिरित्युवाच ॥ २७ ॥

अन्वयः—आशंसितभूरिलाभम् अन्तःकरणानुरूपम् आकारं दधानं तं मुनिः विजयोदये तपःसमाधौ नियोजयिष्यन् इति उवाच ॥ २७ ॥

27. The sage, wishing Arjuna to observe the rules of penance for securing success, thus addressed him, whose form reflected the enthusiasm of his mind and predicted the acquisition of varied successes (in the future).

अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन् ॥
समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥

अन्वयः—अनेन योगेन विवृद्धतेजाः निजां पदवीं परस्मै अयच्छन् उपात्तशस्त्रः (सन्) जपोपवासाभिषवैः मुनीनाम् आचारं समाचर ॥ २८ ॥

28. Possessed of increased prowess by reason of yoga, giving no room (weak points) for your enemies, and ever armed with your weapons, lead the life of an ascetic by (regular) bathing, fasts and prayers.

करिष्यसे यत्र सुदुश्चराणि प्रसत्तये गोत्रभिदस्तपांसि ॥
शिलोच्चयं चारुशिलोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥ २९ ॥

अन्वयः—यत्र गोत्रभिदः प्रसत्तये सुदुश्चराणि तपांसि करिष्यसे, चारुशिलोच्चयं तं शिलोच्चयं त्वाम् एष गुह्यकः क्षणात् नेष्यति ॥ २९ ॥

29. This Yaksha will, in an instant, lead you to the mountain (इन्द्रकील) having beautiful peaks, where you shall practise hard penances for the propitiation of Indra.

इति ब्रुवाणेन महेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे ॥
तं राजराजानुचरोऽस्य साक्षात्प्रदेशमादेश इवाधितष्ठौ ॥ ३० ॥

अन्वयः—इति महेन्द्रसूनुं ब्रुवाणेन तेन महर्षिणा तिरोबभूवे, राजराजानुचरः मुनेः साक्षात् आदेशः इव तं प्रदेशम् अधितष्ठौ ॥ ३० ॥

30. The Great sage, while thus instructing Arjuna suddenly disappeared, and the servant of Kubera, as if his direction incarnate, approached the spot.

कृतानतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः स जिष्णौ ॥
इयाय सख्याविव संप्रसादं विश्वासयत्याशु सतां हि योगः ॥ ३१ ॥

अन्वयः—स कृतानतिः पुण्यजनः व्याहृतसान्त्ववादे जिष्णौ जातस्पृहः (सन्) सख्यौ इव संप्रसादम् इयाय तथाहि सतां योगः आशु विश्वासयति ॥ ३१ ॥

31. That Yaksha made his salutations, and won by love towards Arjuna who uttered cordial words (of welcome), felt confidence in him as in his friend. For union with the good immediately produces confidence (intimacy).

अथोष्णभासेव सुमेरुकुञ्जान्विहीयमानानुदयाय तेन ॥
बृहद्द्युतीन्दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ३२ ॥

अन्वयः—अथ उष्णभासा उदयाय विहीयमानान् बृहद्द्युतीन् सुमेरुकुञ्जान् तमः इव तेन उदयाय विहीयमानान् बृहद्द्युतीन् पाण्डुसुतान् दुःखकृतात्मलाभं तमः शनैः प्रपेदे ॥ ३२ ॥

32. As darkness slowly enters the Gold-bright bowers of the Great Meru, with which the Sun parts company only to rise (again with greater brightness), so gloom caused by grief gradually possessed the minds of the (four) Pandawas of vast intellects, who were about to be (temporarily) separated from Arjuna for (his departure was to result in) increased prosperity.

असंशयालोचितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः ॥
तुल्याद्विभागादिव तन्मनोभिर्दुःखातिभारोऽपि लघुः स मेने ॥ ३३ ॥

अन्वयः—असंशयालोचितकार्यनुन्नः (तथापि) प्रेम्णा समानीय विभज्यमानः स दुःखातिभारोपि तन्मनोभिः तुल्यात् विभागात् इव लघुः मेने ॥ ३३ ॥

33. The excessive gloom, (already) dispelled by considerations of the importance of the great work, (undertaken by Arjuna) about the success of which they all felt fully confident, yet revived by fraternal love, was shared in by all, so that it, being equally divided among the brothers, was lightly felt (by each).

धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः ॥
वीर्यं च विद्वत्सु सुते मघोनः सतेषु न स्थानमवाप शोकः ॥ ३४ ॥

अन्वयः—धैर्येण, महर्षेः विश्वास्यतया, अरातिप्रभवात् तीव्रात् मन्योश्च, मघोनःसुते वीर्यंच विद्वत्सु तेषु (पार्थेषु) स शोकः स्थानं न अवाप ॥ ३४ ।

34. The gloom found no (permanent) room in the minds of the Pandawas, for (four reasons); natural fortitude, faith in the words of the holy sage, intense animosity towards the enemies, and confidence in the (unassailable) prowess of Arjuna himself.

ताम्भूरिधाम्नश्चतुरोऽपि दूरं विहाय यामानिव वासरस्य ॥
एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वान्तमिव प्रपेदे ॥ ३५ ॥

अन्वयः—भूरिधाम्नः चतुरः वासरस्य यामान् विहाय कृष्णां ध्वान्तम् विभावरीम् इव भूरिधाम्नः चतुरः तान् दूरं विहाय एकौघभूतं तत् अशर्म कृष्णां प्रपेदे ॥ ३५ ॥

35. As darkness leaving the four bright divisions of the day resorts to the dark-night, so grief, leaving the four mighty brothers, overpowered Droupadi with concentrated force.

तुषारलेखाकुलितोत्पलाभे पर्यश्रुणी मङ्गलभङ्गभीरुः ॥
अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ॥ ३६ ॥

अन्वयः—विलोकने अगूढभावापि मङ्गलभङ्गभीरुः सा पर्यश्रुणी (अत एव) तुषारलेखाकुलितोत्पलाभे लोचने मीलयितुम् न विषेहे ॥ ३६ ॥

36. Though unable to conceal her ardent wish to steal a glance at Arjuna, Droupadi could not close her eyes, flooded with tears, and (hence) resembling lotuses covered with drops of dew, for fear of marring the auspiciousness of the occasion.

अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम् ॥
मनःप्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः ॥ ३७ ॥

अन्वयः—इन्द्रसूनुः अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टं मनःप्रसादाञ्जलिना पाथेयमिव निकामं जग्राह ॥ ३७ ॥

37. Arjuna greedily received in his delighted mind as if in the hallowed palms of his hands, the captivating looks as provisions for the journey offered by his wife and rendered more sweet being accompanied by unaffected (genuine) love.

धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः ॥
निरुद्धबाष्पोदयसन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री ॥ ३८ ॥

अन्वयः—वन्यद्विपेन निदाघसिन्धुः इव धैर्यावसादेन हृतप्रसादा राजपुत्री निरुद्धबाष्पोदयसन्नकण्ठं कृच्छ्रात् इति उवाच ॥ ३८ ॥

38. Falteringly and checking the flow of tears the princess, whose mind was ruffled by loss of fortitude, as the (shallow) waters of a river in summer are muddled by a wild elephant, spoke as follows.

मग्नां द्विषच्छद्मनि पङ्कभूते संभावनां भूतिमिवोद्धरिष्यन् ॥
आधिद्विषामा तपसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः ॥ ३९ ॥

अन्वयः—पङ्कभूते द्विषच्छद्मनि मग्नां सम्भावनां भूतिम् इव उद्धरिष्यन् (त्वम्) आधिद्विषां तपसाम् आप्रसिद्धेः अस्मत् विना भृशं मा उन्मनीभूः ॥ ३९ ॥

39. While engaged in extricating the jewel of our lost glory out of the mud of hostile deceit, do not, O Arjuna, be uneasy for our separation till the successful completion of the penance, which is sure to end all our miseries.

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा ॥
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ४० ॥

अन्वयः—यशः अधिगन्तुं सुखलिप्सया वा मनुष्यसंख्याम् अतिवर्तितुं वा अभियोगभाजां निरुत्सुकानां सिद्धिः समुत्सुकेव अङ्कम् उपैति ॥ ४० ॥

40. Success eagerly (like a devoted wife) resorts to the lap of those, who by their energetic efforts and steadiness of purpose, endeavour to obtain reputation, or to attain happiness or to tower over the rest of mankind (by doing supernatural deeds).

लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन्वसु जैत्रमोजः ॥
तेजस्वितायां विजयैकवृत्तेर्निघ्नन्प्रियं प्राणमिवाभिमानम् ॥ ४१ ॥
व्रीडानतैराप्तजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः ॥
वितानभूतं विततं पृथिव्यां यशः समूहन्निव दिग्विकीर्णम् ॥ ४२ ॥
वीर्यावदानेषु कृतावमर्षस्तन्वन्नभूतामिव संप्रतीतिम् ॥
कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः ॥ ४३ ॥
प्रसह्य योऽस्मासु परैः प्रयुक्तः स्मर्तुं न शक्यः किमुताधिकर्तुम् ॥
नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः ॥ ४४ ॥

अन्वयः—विधात्रा लोकं गोप्तुं विहितस्य क्षत्रस्य जैत्रम् ओजः (तदेव) वसु मुष्णन्, विजयैकवृत्तेः तेजस्वितायाः प्रियं प्राणम् इव अभिमानं निघ्नन्, आप्तजनोपनीतः (तथापि) संशय्य व्रीडानतैः नृपैः कृच्छ्रेण प्रपन्नः, पृथिव्यां वितानभूतं दिग्विकीर्णं विततं यशः समूहन् इव, वीर्यावदानेषु कृतावमर्षः (अत एव) संप्रतीतिम् अभूताम् इव तन्वन्, अह्नः अवशेषः अर्कत्विषामिव आयतीनां प्रयामक्षयं कुर्वन्, परैः अस्मासु प्रसह्य प्रयुक्तः, यः स्मर्तुं शक्यः न अधिकर्तुं किमुत, सः (केशाकर्षणरूपः) निकारः त्वद्विना आर्द्रः (सन्) उपशुष्यत् मे हृदयं नवीकरिष्यति ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

41-44. That indignity (in the form of the violent seizure of my braid), depriving you of the क्षत्रिय caste, created by providence to protect the world, of the jewel of your triumphant lustre; destroying the sense of self-respect, dear as life, of you illustrious by reason of your vow of conquest ; believed in by kings after hesitation and doubts and with their heads hung down through shame, though informed by trusted persons; narrowing your fame, which like a canopy had spread all over the world and reached the furthest corners of the globe; assailing the glory of past exploits and sweeping it clean out of memory; stopping the progress of future greatness as eve stops rays of the Sun;– that indignity wrought upon us by our enemies, painful even to think of, much more to be experienced, any how forgotten, will again wound my dried heart by unbearable grief in your absence (separation).

प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम् ॥
द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिरह्नः ॥ ४५ ॥
सव्रीडमन्दैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः ॥
यशःक्षयक्षीणजलार्णवाभस्त्वमन्यमाकारमिवाभिपन्नः ॥ ४६ ॥

दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः ॥
केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनंजयस्त्वम् ॥ ४७ ॥

अन्वयः—दन्तव्यसनात् दन्तीव अभिमानव्यसनात् असह्यं विकारं प्राप्तः, शरद्घनाकीर्णः अह्नः आदिः इव, द्विषत्प्रतापान्तरितोरुतेजाः, निष्क्रियत्वात् सव्रीडमन्दैरिव (स्थितैः) अस्त्रैः अत्यर्थं न अवभासमानः, यशः क्षयक्षीणजलार्णवाभः, त्वम् अन्यम् आकारम् अभिपन्न इव (स्थितः), दुःशासनाकर्षरजोविकीर्णैः विनाथैरिव भाग्यनाथैः एभिः केशैः कदर्थीकृतवीर्यसारः त्वं स एव धनंजयोसि कच्चित् ॥ ४५ ॥ ४६ ॥ ४७ ॥

45-47. Insufferably changed through loss of self-respect as an elephant through the shattering of his tusks; having your mighty prowess clouded by that of your enemies as morning hours by autumnal clouds; no more shining bright by your weapons, which by disuse seem to be shame-stricken and dull; resembling a shallow ocean on account of the diminution of your reputation; looking, therefore, quite changed; and shamed in valour by these locks, which were spoiled with dust when Dusshyâsana violently seized them, which as it were having no protectors depended on fate for protection. Are you the same Arjuna as of old (so changed) ?

स क्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः ॥
वहन्द्वयीं यद्यफलेऽर्थजाते करोत्यसंस्कारहतामिवोक्तिम् ॥ ४८ ॥

अन्वयः—यः सतां त्राणसहः स क्षत्रियः, यस्य कर्मसु शक्तिः तत् कार्मुकं, द्वयीम् अपि उक्तिम् अफले अर्थजाते वहन् (तां) असंस्कारहताम् इव करोति ॥ ४८ ॥

48. He is a (true) क्षत्रिय who is able to protect the righteous; that is a bow, which is effective in battle; he who makes these two words not answer to their (literal) senses strips them as it were of their grammatical purity (etymological, primary sense).

वीतौजसः संनिधिमात्रशेषा भवत्कृतां भूतिमपेक्षमाणाः ॥
समानदुःखा इव नस्त्वदीयाः सरूपतां पार्थ गुणा भजन्ते ॥ ४९ ॥

अन्वयः—वीतौजसः सन्निधिमात्रशेषाः भवत्कृतां भूतिम् अपेक्षमाणाः त्वदीयाः गुणाः समानदुःखा इव (हे) पार्थ नः सरूपतां भजन्ते ॥ ४९ ॥

49. Void of lustre, having no more than mere existence, expecting success which you are to bring about, your qualities (heroism, &c.) O Partha, resemble us, as if because they experience an equally wretched state.

आक्षिप्यमाणं रिपुभिः प्रमादान्नागैरिवालूनसटं मृगेन्द्रम् ॥
त्वां धूरियं योग्यतयाधिरूढा दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥ ५० ॥

अन्वयः—प्रमादात् रिपुभिः आक्षिप्यमाणम् (अत एव) प्रमादात् नागैः आलूनसटं मृगेन्द्रम् इव (स्थितं) त्वां तिग्मरश्मिं दीप्त्या दिनश्रीः इव इयं धूः योग्यतया अधिरूढा ॥ ५० ॥

50. As the beauty of the Day is dependent for light on the sun, so this grave responsibility rests (for success) (because of capability) on you, who are (now) being slighted by your enemies, because you have lost your proper sense of duty (and not because of your incapacity) as a lion, when off his guard, has his mane stripped off by elephants.

करोति योऽशेषजनातिरिक्तां संभावनामर्थवतीं क्रियाभिः ॥
संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या ॥ ५१ ॥

अन्वयः—यः अशेषजनातिरिक्तां संभावनां क्रियाभिः अर्थवतीं करोति, तं संसत्सु पुरुषाधिकारे जाते पूरणी संख्या न समुपैति ॥ ५१ ॥

51. Whoever proves by (extraordinary) deeds his supreme worth, unattainable by any other man, will, when in public assemblies, defy all ordinal numbers (he will stand unapproachably high).

प्रियेषु यैः पार्थ विनोपपत्तेर्विचिन्त्यमानैः क्लममेति चेतः ॥
तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातम् ॥ ५२ ॥

अन्वयः—हे (पार्थ) प्रियेषु उपपत्तेः विना विचिन्त्यमानैः यैः (अघैः) चेतः क्लमम् एति, जयाय प्रयातस्य तव तेषाम् अघानां विघातं मघवा क्रियात् ॥ ५२ ॥

52. When you leave for glory, may Indra, O Arjuna, remove all obstacles (in your path) which at their very idea causelessly afflict the minds of those who bear love towards you.

मा गाश्चिरायैकचरः प्रमादं वसन्नसंबाधशिवेऽपि देशे ॥
मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥

अन्वयः—असंबाधशिवे अपि देशे चिराय एकचरः वसन् प्रमादं मा गाः हि मात्सर्यरागोपहतात्मनां मानसानि साधुषु अपि स्खलन्ति ॥ ५३ ॥

53. Never be off your guard, living alone in that sacred place, even though it is unmolested; for, the minds of those who are overpowered by feelings of love or hate are affected even with respect to the good.

तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व ॥
प्रत्यागतं त्वास्मि कृतार्थमेव स्तनोपपीडं परिरब्धुकामा ॥ ५४ ॥

अन्वयः—तत् (तस्मात्) आशु महर्षेः वचनं कुर्वन् नः मनोरथान् सफलीकुरुष्व कृतार्थं प्रत्यागतम् एव त्वां स्तनोपपीडं परिरब्धुकामा अस्मि ॥ ५४ ॥

54. Obeying therefore, the directions of the Great sage, soon fulfil our desires (viz. establish or confirm us our natural position by destroying the enemies) I will cordially embrace you pressing you close to my bosom, (only) when you return successful and not till then.

उदीरितां तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकाराम् ॥
आसाद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥

अन्वयः—सः याज्ञसेन्या इति उदीरितां नवीकृतोद्ग्राहितविप्रकारां वाचम् आसाद्य उदीचीं काष्ठाम् (आसाद्य) तिग्मरश्मिः इव भृशं दिदीपे ॥ ५५ ॥

55. Having heard these words of Draupadi which recalled the memory of past indignities Arjuna, suddenly fired up like the sun when approaching the Northern latitudes.

अथाभिपश्यन्निव विद्विषः पुरः पुरोधसारोपितहेतिसंहतिः ॥
बभार रम्योऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम् ॥ ५६ ॥

अन्वयः—अथ विद्विषः पुरः अभिपश्यन् इव (स्थितः) पुरोधसा आरोपितहेतिसंहतिः सः रम्योऽपि आभिचारिकीं क्रियां गतः मन्त्र इव भीषणं वपुः बभार ॥ ५६ ॥

56. Equipped with weapons by his family priest (Droumya) and seeing, as it were his enemies before him, Arjuna though naturally graceful in form looked fierce like a Mantra employed on a murderous work.

अविलङ्घ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकम् ॥
अगतावरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥
यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः ॥
कवचं च सरत्नमुद्वहञ्ज्वलितज्योतिरिवान्तरं दिवः ॥ ५८ ॥
अलकाधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म संप्रयान् ॥
हृदयानि समाविवेश स क्षणमुद्बाष्पदृशां तपोभृताम् ॥ ५९ ॥

अन्वयः—परैः अविलङ्घ्यविकर्षणं प्रथितज्यारवकर्म कार्मुकम् (तथा) अरिदृष्टिगोचरम् अगतौ शितनिस्त्रिंशयुजौ महेषुधी, (तथा) गोत्रभिदायुधक्षतीः यशसेव महसा मुहुः तिरोदधत् सरत्नम् (अत एव) ज्वलितज्योतिः दिवः अन्तरमिव कवचम् उद्वहन्, सः अलकाधिपभृत्यदर्शितं शिवम् उर्वीधरवर्त्म सम्प्रयान् उद्बाष्पदृशां तपोभृतां हृदयानि क्षणं समाविवेश ॥ ५७ ॥ ५८ ॥ ५९ ॥

57-59. Armed with his (much-famed) bow (the Gandiva) which was never bent ineffectively, and the twang of whose string was well known; with his great quivers, never seen by enemies (as he never turned his back upon them) accompanied by a sharpened sword, and (also) with his armour which covered the wounds caused by the thunderbolt of Indra by its own lustre as if by his glory, and which being set with jewels resembled the middle of the sky studded with lustrous stars; (armed with these, the Gandiva, the quivers and the armour) Arjuna set out by the path showed by the servant of Kubera, and, (therefore) fearless; (but while departing) for some time grieved the hearts of the ascetics (dwelling in Dwaitwana) whose eyes began to overflow with tears (at his separation).

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ॥
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥

अन्वयः—अथ आशाः दिव्यं दुन्दुभिध्वानं अनुजगुः, व्योम्नि सुरकुसुमनिपातैः लक्ष्मीः वितेने, अनिभृतवेलावीचिबाहुः पयोधिः स्फुरन्तीं भुवं प्रियं कथयिष्यन् इव आलिलिङ्ग ॥ ६० ॥

60. (When Arjuna set out) all the quarters echoed the sounds of kettle-drums, beaten by the celestials; the sky brightened at the flowers showered by them; and the Ocean, as if eager to communicate the welcome news (that her burdden would soon be removed) embraced the Earth, vibrating (with joy) with his arms in the form of tremulous waves (that were being dashed) against the shores.

चतुर्थः सर्गः

—o—

ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणाम् ॥
उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां भुवम् ॥ १ ॥

अन्वयः—ततः जनप्रियः सः (अर्जुनः) कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणां भुवम् आसादितयौवनां प्रियाम् इव उपजनम् उपाससाद ॥ १ ॥

1. Then Arjuna, loved by all, approached, in the presence of men, the place, looking white on account of ripened corn and girt by noisy swans, as one would, in the presence of female friends, approach his beloved who has attained youth and whose girdle sounds like the noisy swans.

विनम्रशालिप्रसवौघशालिनीरपेतपङ्काः ससरोरुहाम्भसः ॥
ननन्द पश्यन्नुपसीम स स्थलीरुपायनीभूतशरद्गुणश्रियः ॥ २ ॥

अन्वयः—सः विनम्रशालिप्रसवौघशालिनीः अपेतपङ्काः ससरोरुहाम्भसः उपायनीभूतशरद्गुणश्रियः स्थलीः उपसीम पश्यन् ननन्द ॥ २ ॥

2. He was delighted to see in the neighbourhood of the village natural spots of ground, which looked beautiful on account of clusters of grains with which the shali plants were bent, which were free from mud, which had waters (lakes) interspersed with lotuses, and which as it were presented to Arjuna the beauties of autumn.

निरीक्ष्यमाणा इव विस्मयाकुलैः पयोभिरुन्मीलितपद्मलोचनैः ॥
हृतप्रियादृष्टिविलासविभ्रमा मनोऽस्य जह्रुः शफरीविवृत्तयः ॥ ३ ॥

अन्वयः—विस्मयाकुलैः (अतएव) उन्मीलितपद्मलोचनैः पयोभिः निरीक्ष्यमाणाः इव (स्थिताः) हृतप्रियादृष्टिविलासविभ्रमाः शफरीविवृत्तयः अस्य मनः जह्रुः ॥ ३ ॥

3. His mind was captivated by the whirlings of the female shaffari fish, which took away the beauty of the sportiveness of the eyes of his beloved, which were, as it were, being gazed upon by lakes with eyes in the form of lotsues, half closed, being smit with wonder.

तुतोष पश्यन्कलमस्य सोऽधिकं सवारिजे वारिणि रामणीयकम् ॥
सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे ॥ ४ ॥

अन्वयः—सः सवारिजे वारिणि कलमस्य रामणीयकं पश्यन् अधिकं तुतोष (तथाहि) सुदुर्लभे अनुरूपसंगमे (लब्धे सति) प्रकर्षलक्ष्मीम् अभिनन्दितुं कः न अर्हति ॥ ४ ॥

4. He was extremely pleased to observe the beauty of the Kalam rice in waters having lotuses in them; (for) who indeed will not praise the excellence of beauty when he meets with a combination of worthy things difficult to find.

नुनोद तस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंतति ॥
अवाप्तकिञ्जल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहतं पयः ॥ ५ ॥

अन्वयः—आविष्कृतफेनसंतति अवाप्तकिञ्जल्कविभेदम् उच्चकैः विवृत्तपाठीनपराहतं पयः तस्य स्थलपद्मिनीगतं वितर्कं नुनोद ॥ ५ ॥

5. The waters, that displayed huge mass of foam and that were covered with the pollen of the filaments of lotuses, being agitated by the violent whirlings of the Pathien fish, removed his misapprehension of taking them for landgrown lotuses.

कृतोर्मिरेखं शिथिलत्वमायता शनैः शनैः शान्तरयेण वारिणा ॥
निरीक्ष्य रेमे स समुद्रयोषितां तरङ्गितक्षौमविपाण्डु सैकतम् ॥ ६ ॥

अन्वयः—सः शिथिलत्वम् आयता (अत एव) शनैः शनैः शान्तरयेण वारिणा कृतोर्मिरेखं तरङ्गितक्षौमविपाण्डु समुद्रयोषितां सैकतं निरीक्ष्य रेमे ॥ ६ ॥

6. He was delighted to see the sandy bank of the rivers, white like a silken garment touched by ripples and marked by lines caused by the waves that gradually decreased in volume and (hence) that had a tranquil flow.

मनोरमं प्रापितमन्तरं भ्रुवोरलंकृतं केसररेणुनाणुना ॥
अलक्तताम्राधरपल्लवश्रिया समानयन्तीमिव बन्धुजीवकम् ॥ ७ ॥
नवातपालोहितमाहितं मुहुर्महानिवेशौ परितः पयोधरौ ॥
चकासयन्तीमरविन्दजं रजः परिश्रमाम्भःपुलकेन सर्पता ॥ ८ ॥
कपोलसंश्लेषि विलोचनत्विषा विभूषयन्तीमवतंसकोत्पलम् ॥
सुतेन पाण्डोः कलमस्य गोपिकां निरीक्ष्य मेने शरदः कृतार्थता ॥ ९ ॥

अन्वयः—अणुना केसररेणुना अलंकृतं (अत एव) मनोरमं भ्रुवोः अंतरं प्रापितं बंधुजीवकं अलक्तताम्राधरपल्लवश्रिया समानयंतीम् इव, महानिवेशौ पयोधरौ परितः मुहुः आहितं नवातपालोहितम् अरविंदजं रजः सर्पता परिश्रमांभःपुलकेन चकासयंतीं कपोलसंश्लेषि अवतंसकोत्पलं विलोचनत्विषा विभूषयन्तीं कलमस्य गोपिकां निरीक्ष्य पांडोः सुतेन शरदः कृतार्थता मेने ॥ ७ ॥ ८ ॥ ९ ॥

7, 8. 9. The son of Pandu thought autumn served its purpose fully, when he looked at the woman, appointed to watch the rice field, who seemed as if to equal, with the grace of her blossom-like lower lip reddened by Alakta dye, the beauty of the बंधुजीवक flower, which was placed between her eyebrows and which looked charming on account of the pollen of the tender filaments; the woman who seemed to beautify, with her hair on their ends which was moist on account of the expanding drops of perspiration produced by the fatigue, the repeated applications of the pollens of lotuses as red as the morning sun and applied to her plump bereasts and who seemed to add beauty by means of the lustre of her eyes, to the lotus which was placed on her ear and had tuched her cheeks.

उपारताः पश्चिमरात्रिगोचरादपारयन्तः पतितुं जवेन गाम् ॥
तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरोधसः ॥ १० ॥

अन्वयः—पश्चिमरात्रिगोचरात् उपारताः जवेन गां पतितुम् अपारयन्तः प्रस्नुतपीवरोधसः उत्सुकाः गवां गणाः अवेक्षणोत्सुकं तं चक्रुः ॥ १० ॥

10. Herds of cows returning at day-break from the pasturage, unable to run fast, eagar (for their calves) and (hence) having their udders flowing with milk, engaged his attention.

परीतमुक्षावजये जयश्रिया नदन्तमुच्चैः क्षतसिन्धुरोधसम् ॥
ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवाम् ॥ ११ ॥

अन्वयः—सः उक्षावजये जयश्रियापरीतम् उच्चैः नदन्तं क्षतसिन्धुरोधसं शारदीं पुष्टिं दधतं गवां अधिपं सविग्रहं दर्पम् इव ददर्श ॥ ११ ॥

11. He saw a great bull, leader of the herd, surrounded by the halo of glory consequent on the defeat of other bulls, that bellowed aloud, that had rent the banks of rivers, that had become fat (had attained fulness) in the autumnal harvest, and that looked pride incarnate,

विमुच्यमानैरपि तस्य मन्थरं गवां हिमानीविशदैः कदम्बकैः ॥
शरन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥

अन्वयः—हिमानीविशदैः गवां कदंबकैः मंथरं विमुच्यमानैः अपि शरन्नदीनां पुलिनैः गलद्दुकूलैः जघनैः इव तस्य कुतूहलम् आदधे ॥ १२ ॥

12. He was delighted to see the sandy banks of the rivers in autumn that were gradually being left by herds of cattle white by the fall of snow, as one would be to see the hips (of beautiful ladies) from which white silken garments have dropped down.

गतान्पशूनां सहजन्मबन्धुतां गृहाश्रयं प्रेम वनेषु बिभ्रतः ॥
ददर्श गोपानुपधेनु पाण्डवः कृतानुकारानिव गोभिरार्जवे ॥ १३ ॥

अन्वयः—पाण्डवः पशूनां सहजन्मबंधुतां गतान् वनेषु गृहाश्रयं प्रेम बिभ्रतः आर्जवे गोभिः कृतानुकारान् इव गोपान् उपधेनु ददर्श ॥ १३ ॥

13. Arjuna saw herdsmen close by the cows, who looked upon them with fraternal affection; who loved the pastures as they did their homes and who in simplicity were, as it were, imitated by their herd.

परिभ्रमन्मूर्धजषट्पदाकुलैः स्मितोदयादर्शितदन्तकेसरैः ॥
मुखैश्चलत्कुण्डलरश्मिरञ्जितैर्नवातपामृष्टसरोजचारुभिः ॥ १४ ॥
निबद्धनिःश्वासविकम्पिताधरा लता इव प्रस्फुरितैकपल्लवाः ॥
व्यपोढपार्श्वैरपवर्तितत्रिका विकर्षणैः पाणिविहारहारिभिः ॥ १५ ॥
व्रजाजिरेष्वम्बुदनादशङ्किनीः शिखण्डिनामुन्मदयत्सु योषितः ॥
मुहुः प्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥ १६ ॥
स मन्थरावल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः ॥
निरीक्षितुं नोपरराम बल्लवीरभिप्रनृत्ता इव वारयोषितः ॥ १७ ॥

अन्वयः—परिभ्रमन्मूर्धजषट्पदाकुलैः स्मितोदयादर्शितदंतकेसरैः चलत्कुण्डलरश्मिरञ्जितैः (अत एव) नवातपामृष्टसरोजचारुभिः मुखैः (उपलक्षिताः), निबद्धनिःश्वासविकम्पिताधराः (अत एव) प्रस्फुरितैकपल्लवा लता इव (स्थिताः) व्यपोढपार्श्वैः पाणिविहारहारिभिः विकर्षणैः अपवर्तितत्रिकाः, व्रजाजिरेषु अंबुदनादशंकिनीः शिखंडिनां योषितः उन्मदयत्सु मथां विवर्तनैः मुहुः प्रणुन्नेषु कुंभेषु मृदंगमंथरं नदत्सु (सत्सु), मन्थरावल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः बल्लवीः अभिप्रनृत्ताः वारयोषितः इव निरीक्षितुं सः न उपरराम ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

14-15-16-17. Looking at the cowherdesses, who had beautiful faces annoyed by the hovering bees in the form of dishevelled hair; who had the filaments in the form of teeth displayed by gentle smiles, and who looked brightened by the beams of the tremulous ear ornament and (hence) lovely like lotuses touched by (the rays of) the morning sun; whose lower lips were quivering on account of restrained breath and (hence) looked like creepers with one sprout moving; whose hips were in motion while pulling the churning-ropes attractive by the movements of hands with the sides moving to and fro; and whose plump breasts gently moved when churning jars, often shaken by the pulling of churning sticks and sounding like tabors, intoxicated the pea-hens in the courtyards of the cowpen which took the sounds for the thundering of clouds; and whose lotus-like eyes languished by exhaustion;—Arjuna kept looking at these cowherdesses (for a long time), like a person looking at dancing harlots.

पपात पूर्वां जहतो विजिह्मतां वृषोपभुक्तान्तिकसस्यसंपदः ॥
रथाङ्गसीमन्तितसान्द्रकर्दमान्प्रसक्तसंपातपृथक्कृतान्पथः ॥ १८ ॥

अन्वयः—(सः) पूर्वां विजिह्मतां जहतः वृषोपभुक्तांतिकसस्यसंपदः रथांगसीमंतितसांद्रकर्दमान् प्रसक्तसंपातपृथक्कृतान् पथः पपात ॥ १८ ॥

18. He followed paths, that had given up their former windings (undulations), that were strewn with blades of corn, the ends of which were plucked by bulls, the thick mud on which was marked by lines created by the wheels of chariots and that were differently directed by being constantly traversed.

जनैरुपग्राममनिन्द्यकर्मभिर्विविक्तभावेङ्गितभूषणैर्वृताः ॥
भृशं ददर्शाश्रममण्डपोपमाः सपुष्पहासाः स निवेशवीरुधः ॥ १९ ॥

अन्वयः—सः उपग्रामं अनिंन्द्यकर्मभिः विविक्तभावेंगितभूषणैः जनैः वृताः आश्रममण्डपोपमाः सपुष्पहासाः निवेशवीरुधः भृशं ददर्श ॥ १९ ॥

19. Near villages, he remained looking at domestic creepers, covered with fully opened flowers and resorted to by men of unblameable ways (husbandry, &c.) and of guileless sentiments, gestures and ornaments and (hence) comparable to the bowers in hermitages of sages.

ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषम् ॥
उवाच यक्षस्तमचोदितोऽपि गां न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ २० ॥

अन्वयः—ततः स यक्षः शरद्गुणश्रियं संप्रेक्ष्य शरद्गुणालोकनलोलचक्षुषं तम् अचोदितोपि गाम् उवाच (यतोहि) इंगितज्ञः अवसरे न अवसीदति ॥ २० ॥

20. Having observed the splendour of autumn, that Yakshya (mentioned before) thus, of his own accord, addressed Arjuna whose eyes were engrossed in drinking the beauties of autumn. For, one, skilled in interpreting the sentiments of another from his gestures, fails not on proper occasions (to speak unasked).

इयं शिवाया नियतेरिवायतिः कृतार्थयन्ती जगतः फलैः क्रियाः ॥
जयश्रियं पार्थ पृथूकरोतु ते शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥ २१ ॥

अन्वयः—(हे) पार्थ ! शिवायाः नियतेः आयतिः इव जगतः क्रियाः फलैः कृतार्थयन्ती प्रसन्नांबुः अनंबुवारिदा शरद् ते जयश्रियं पृथूकरोतु ।; २१ ॥

21. May this autumn, O Arjuna ! augment the glory of thy successes ! autumn which like the fruit-yielding season of propitious fate reward the labours (of husbandry, &c.) with fruits, in which the waters are clear (transparent) and clouds waterless.

उपैति सस्यं परिणामरम्यता नदीरनौद्धत्यमपङ्कता महीम् ॥
नवैर्गुणैःसंप्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः ॥ २२ ॥

अन्वयः—सस्यं परिणामरम्यताम् उपैति, नदीः अनौद्धत्यम् (उपैति) महीम् अपंकता (उपैति) संप्रति नवैः गुणैः घनागमश्रियः संस्तवस्थिरं प्रेम तिरोहितम् ॥ २२ ॥

22. Corn (rice, &c.) attains the beauty of ripeness; rivers lose their turbulence (and become fordable); the ground becomes mudless. Methinks, the attachment for rainy season, which was steady on account of its deep familiarity, has been clouded by the fresh beauties of autumn.

पतन्ति नास्मिन्विशदाः पतत्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः ॥
तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणम् ॥ २३ ॥

अन्वयः—अस्मिन् विशदाः पतत्रिणः न पतन्ति, धृतेन्द्रचापाः पयोदपंक्तयः न (पतन्ति) तथापि नभः परां श्रियं पुष्णाति (हि) रम्यं (वस्तु) आहार्यं गुणं न अपेक्षते ॥ २३ ॥

23. In this autumn, white birds (cranes) do not fly up in the sky; ranges of clouds coloured with rainbows are not seen moving about; yet the sky possesses highest beauty. Verily, things naturally charming do not require artificial qualities to set them off.

विपाण्डुभिर्म्लानतया पयोधरैश्च्युताचिराभागुणहेमदामभिः ॥
इयं कदम्बानिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते ॥ २४ ॥

अन्वयः—कदंबानिलभर्तुः अत्यये म्लानतया विपाण्डुभिः च्युताचिराभागुणहेमदामाभिः पयोधरैः दिग्वधूनाम् इयं कृशता न राजते (इति) न ॥ २४ ॥

24. As on the separation from their lord the languid of women, whose breasts are pale on account of feebleness, and who wear no golden ornaments, is not the less attractive, so on the expiry of the rainy season, this thinness of quarters (sky) wherein the clouds being waterless are white, and which are void of the flashes of lightning, is not the less delightful.

विहाय वाञ्छामुदिते मदात्ययादरक्तकण्ठस्य रुते शिखण्डिनः ॥
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥ २५ ॥

अन्वयः—मदात्ययात् अरक्तकंठस्य शिखंडिनः उदिते रुते वांछां विहाय श्रुतिः उन्मदहंसनिःस्वनं श्रयति (हि) प्रियत्वे गुणाः अधिकृताः संस्तव न ॥ २५ ॥

25. Not anxious to hear the harsh notes of a peacock whose voice has lost its melody his intoxication having waned, (men's) ears turn to the cries of the intoxicated swans; for, it is the qualities and not familiarity that endear.

अमी पृथुस्तम्बभृतः पिशङ्गतां गता विपाकेन फलस्य शालयः ॥
विकासि वप्राम्भसि गन्धसूचितं नमन्ति निघ्रातुमिवासितोत्पलम् ॥ २६ ॥

अन्वयः—अमी पृथुस्तंबभृतः फलस्य विपाकेन पिशंगतां गताः शालयः वप्राम्भसि विकासि गंधसूचितम् असितोत्पलं निघ्रातुम् इव नमन्ति ॥ २६ ॥

26. These shali plants, become reddish-brown by the ripeness of grain and bent with big clustres, seem to bend down to smell the dark coloured-lotus that blossomed in the water of the field and that could be known (only) by its fragrance.

मृणालिनीनामनुरञ्जितं त्विषा विभिन्नमम्भोजपलाशशोभया ॥
पयःस्फुरच्छालिशिखापिशङ्गितं द्रुतं धनुष्खण्डमिवाहिविद्विषः ॥ २७ ॥

अन्वयः—मृणालिनीनां त्विषा अनुरञ्जितम् अम्भोजपलाशशोभया विभिन्नं स्फुरच्छालिशिखापिशङ्गितम् अहिविद्विषः द्रुतं धनुष्खण्डम् इव (स्थितं) पयः ॥ २७ ॥

27. The waters, tinged with the (green) colour of the मृणालिनी plants, mixed with the (red) colour of the petals of the पद्म lotuses and made brown by the (reflection) of the branches of the tremulóus shali plants, looked like the (variegated) rainbow in motion.

विपाण्डु संव्यानमिवानिलोद्धतं निरुन्धतीः सप्तपलाशजं रजः ॥
अनाविलोन्मीलितबाणचक्षुषः सपुष्पहासा वनराजियोषितः ॥ २८ ॥

अन्वयः—विपाण्डु अनिलोद्धतं संव्यानम् इव सप्तपलाशजं रजः निरुन्धतीः अनाविलोन्मीलितबाणचक्षुषः सपुष्पहासाः वनराजियोषितः ॥ २८ ॥

28. The forest-groves which were strewn with blossoms and covered with the fully opened and white Bana flowers, and which stopped the white pollen of the Saptaparna tree being wafted by wind, (look) like women that gently smile, that have large and bright eyes, and that draw their white garments being pulled away by their husbands.

अदीपितं वैद्युतजातवेदसा सिताम्बुदच्छेदतिरोहितातपम् ॥
ततान्तरं सान्तरवारिशीकरैः शिवं नभोवर्त्म सरोजवायुभिः ॥ २९ ॥

अन्वयः—वैद्युतजातवेदसा अदीपितं सितांबुदच्छेदतिरोहितातपं सांतरवारिशीकरैः सरोजवायुभिः ततांतरं शिवं नभोवर्त्म ॥ २९ ॥

29. The beautiful sky is not brightened by the flashes of lightning (and hence there is no obstruction to eyes) is free from heat being covered by patches of bright (waterless) clouds, has its interior made fragrant by lotusfreezes and cool by sprays of water.

सितच्छदानामपदिश्य धावतां रुतैरमीषां ग्रथिताः पतत्रिणाम् ॥
प्रकुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः ॥ ३० ॥

अन्वयः—(पूर्वश्लोकत्रयोक्तम्) अपदिश्य धावतां अमीषां सितच्छदानां पतत्रिणां रुतैः ग्रथिताः वारिदरोधनिर्गताः अमलाः दिशः परस्परालापं प्रकुर्वत इव ॥ ३० ॥

80. The bright quarters, free from the obstruction of clouds, seem to converse with one another on account of their being filled with the cries of swans that have white wings and that point their course to the three mentioned above (the waters, the forest-groves and the sky).

विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपङ्क्तयः ॥
असक्तमूधांसि पयः क्षरन्त्यमूरुपायनानीव नयन्ति धेनवः ॥ ३१ ॥

अन्वयः—विहारभूमेः (आगच्छन्त्यः) अभिघोषम् उत्सुकाः च्युतयूथपंक्तयः अमूः धेनवः असक्तं पयः क्षरन्ति ऊधांसि शरीरजेभ्यः उपायनानि इव नयन्ति ॥ ३१ ॥

31. These cows, returning from pasture-grounds eagar for their cowpen and (hence) breaking from their flocks, carry their udders ceaselessly flowing with milk, as presents for their calves.

जगत्प्रसूतिर्जगदेकपावनी व्रजोपकण्ठं तनयैरुपेयुषी ॥
द्युतिं समग्रां समितिर्गवामसावुपैति मन्त्रैरिव संहिताहुतिः ॥ ३२ ॥

अन्वयः—जगत्प्रसूतिः जगदेकपावनी व्रजोपकंठं तनयैः उपेयुषी असौ गवां समितिः मन्त्रैः संहिता आहुतिः इव समग्रां द्युतिम् उपैति ॥ ३२ ॥

32. The principal purifier and (indirectly) the cause of the world, these cows, joined to their calves near the cowpen, like oblations offered to fire accompanied by mantras, present a very beautiful sight.

कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने ॥
इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदम्बकम् ॥ ३३ ॥

अन्वयः—जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने कृतावधानं इदं मृगीकदंबकं भूयसीं जिघत्साम् अपहाय सस्यं न अभ्येति ॥ ३३ ॥

33. This herd of deer, absorbed in listening to the songs of cowherdesses of melodious voices that excel the notes of peacocks (in sweetness), neglecting its intense hunger, does not approach grass.

असावनास्थापरयावधीरितः सरोरुहिण्या शिरसा नमन्नपि ॥
उपैति शुष्यन्कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम् ॥ ३४ ॥

अन्वयः—शिरसा नमन् अपि अनास्थापरया सरोरुहिण्या अवधीरितः (अत एव) अंभसा सह शुष्यन् असौ कलमः मनोभुवा तप्त इव अभिपांडुताम् उपैति ॥ ३४ ॥

34. Like a lover afflicted by Cupid, this kalama, though bowing down with his head yet slighted by the lotus plant that is cold towards him, languishes (fades) along with water and becomes pale.

अमी समुद्धूतसरोजरेणुना हृताहृतासारकणेन वायुना ॥
उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः ३५ ॥

अन्वयः—समुद्धूतसरोजरेणुना हृतासारकणेन वायुनाहृताः अमी शिलीमुखाः आपदाम् उपागमे (सति) दुश्चरिताः इव गतिं निश्चेतुं न अलम् ॥ ३५ ॥

35. Like ill-behaved persons (thieves, &c.) overcome with difficulties, these bees attracted by the wind that drifts the pollen of lotuses and that carries, with it, sprays of water, have become unable to determine the directions to which they should fly.

मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य बिभ्रती ॥
शुकावलिर्व्यक्तशिरीषकोमला धनुश्श्रियं गोत्रभिदोऽनुगच्छति ॥ ३६ ॥

अन्वयः—विद्रुमभंगलोहितैः मुखैः पिशंगीः कलमस्य शिखाः बिभ्रती व्यक्तशिरीषकोमला असौ शुकावलिः गोत्रभिदः धनुश्श्रियम् अनुगच्छति ॥ ३६ ॥

36. This row of parrots, tender like the opened शिरीष flowers, that hold the small branches of kalama brown (through ripeness) with their beaks red like the bits of coral, resembles the rainbow.

इति कथयति तत्र नातिदूरादथ ददृशे पिहितोष्णरश्मिबिम्बः ॥
विगलितजलभारशुक्लभासां निचय इवाम्बुमुचां नगाधिराजः ॥ ३७ ॥

अन्वयः—अथ तत्र (तस्मिन् यक्षे) इति कथयति (सति) नातिदूरात् पिहितोष्णरश्मिबिंबः विगलितजलभारशुक्लभासाम् अंबुमुचां निचयः इव नगाधिराजः (तेन) ददृशे ॥ ३७ ॥

37. While the Yakshya was thus engaged in describing, Arjuna (suddenly) saw, not far from him, the Lord of mountains (the Himalayas) that had eclipsed the disc of the sun and that looked like an assemblage of clouds bright by reason of their being waterless.

तमतनुवनराजिश्यामितोपत्यकान्तं
नगमुपरि हिमानीगौरमासाद्य जिष्णुः ॥
व्यपगतमदरागस्यानुसस्मार लक्ष्मी-
मसितमधरवासो बिभ्रतः सीरपाणेः ॥ ३८ ॥

अन्वयः—जिष्णुः अतनुवनराजिश्यामितोपत्यकांतम् उपरि हिमानीगौरं तं नगम् आसाद्य व्यपगतमदरागस्य असितम् अधरवासः बिभ्रतः सीरपाणेः लक्ष्मीम् अनुसस्मार ॥ ३८ ॥

38. Having approached the mountain, the skirts of whose low lands looked blue with extensive groves and which was white around its top by snow-drifts, Arjuna was put in mind of the grace of Balaram wearing a blue under-garment and stripped of the glow caused by pride.

पञ्चमः सर्गः

—o—

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया ॥
अभिययौ स हिमाचलमुच्छ्रितं समुदितं नु विलङ्घयितुं नभः ॥ १ ॥

अन्वयः—अथ सः मेरुमहीभृतः जयाय नु रभसया दिगंतदिदृक्षया नु नभः विलंघयितुं नु समुदितम् उच्छ्रितं हिमाचलम् अभिययौ ॥ १ ॥

1. Then Arjuna approached the mountain Himalayas which had soared high perhaps to excel the mountain Meru (in height) or perhaps ardently wishing to see how far the quarters have extended or perhaps to measure the sky.

तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः ॥
हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा ॥ २ ॥

अन्वयः—एकतः तपनमंडलदीपितम् अन्यतः सततनैशतमोवृतम् (अत एव) पुरः हसितभिन्नतमिस्रचयं गजचर्मणा अनुगतं शिवम् इव (स्थितम्) ॥ २ ॥

2. The mountain, illuminated on one side by the solar orb and enveloped on the other by the never-ending nocturnal darkness and (hence) resembling the God Shankar that has dispelled the dense darkness before him by his loud laugh and that has a (dark) elephant-skin behind.

क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः ॥
प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगतामिव शंभुना ॥ ३ ॥

अन्वयः—अदृष्टपरस्परैः क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतं (अत एव) शंभुना विभुतां प्रथयितुम् अभिनिर्मितं जगतां प्रतिनिधिम् इव (स्थितम्) ॥ ३ ॥

3. The mountain, (which is) occupied by the denizens of the earth, the sky and the heaven mutually unseen and (hence) which is as it were the image of the Universe created by Shankar to manifest his omnipotence.

भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना ॥
समुदितं निचयेन तडित्वतीं लघयता शरदम्बुदसंहतिम् ॥ ४ ॥

अन्वयः—भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना (अतएव) तडित्वतीं शरदंबुदसंहतिं लघयता निचयेन समुदितम् ॥ ४

4. The mountain, lofty with its numerous peaks white like the king of serpents (Shesha)touching the sky, and bright at the top with lines of gold (and hence) excelling the dense mass of autumnal clouds containing lightning.

मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः ॥
दधतमुच्चशिलान्तरगोपुराः पुर इवोदितपुष्पवना भुवः ॥ ५ ॥

अन्वयः—मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः उच्चशिलांतरगोपुराः उदितपुष्पवनाः पुरः इव भुवः दधतम् ॥ ५ ॥

5. The mountain, which looked like a town on account of sites, beautiful with canopies in the form of the numerous rays of jewels, with houses in the form of bowers frequented by celestial damsels, with principal gates in the form of the openings in huge rocks and with luxuriant flowering gardens.

अविरतोज्झितवारिविपाण्डुभिर्विरहितैरचिरद्युतितेजसा ॥
उदितपक्षमिवारतनिःस्वनैः पृथुनितम्बविलम्बिभिरम्बुदैः ॥ ६ ॥

अन्वयः—अविरतोज्झितवारिविपाण्डुभिः अचिरद्युतितेजसा विरहितैः आरतनिःस्वनैः पृथुनितंबविलम्बिभिः अंबुदैः उदितपक्षम् इव (स्थितम्) ॥ ६ ॥

6. The mountain, which seems to be possessed of wings on account of clouds resting on its slopes, pale because of incessant pouring down of waters, void of flashes of lightning and whose thundering has ceased.

दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः ॥
विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ॥ ७ ॥

अन्वयः—आकरिभिः करिभिः क्षतैः समवतारसमैः असमैः तटैः (उपलक्षिताः) महिताम्भसः विविधकामहिताः स्फुट सरोजवनाः जवनाः नदीः दधतम् ॥ ७ ॥

7. The mountain, which has several swift flowing rivers with incomparably beautiful banks rent by elephants of good breed, level at sacred bathing places, having holy waters useful for a variety of purposes (such as bathing, &c.) and covered with clusters of full blown lotuses.

नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरेण महाश्मनाम् ॥
विहितसांध्यमयूखमिव क्वचिन्निचितकाञ्चनभित्तिषु सानुषु ॥ ८ ॥

अन्वयः—नवविनिद्रजपाकुसुमत्विषां द्युतिमतां महाश्मनां निकरेण क्वचित् निचितकांचनभित्तिषु सानुषु विहितसांध्यमयूखम् इव स्थितम् ॥ ८ ॥

8. The mountain, which seems dyed with hues of evening twilight on account of its peaks having here and there golden walls formed by numerous rubies red like newly opened Japa flowers (china roses).

पृथुकदम्बकदम्बकराजितं ग्रथितमालतमालवनाकुलम् ॥
लघुतुषारतुषारजलश्च्युतं धृतसदानसदाननदन्तिनम् ॥ ९ ॥

अन्वयः—पृथुकदंबकदंबकराजितं ग्रथितमालतमालवनाकुलं लघुतुषारतुषारजलश्च्युतं धृतसदानसदाननदंतिनम् ॥ ९ ॥

9. The mountain, which is beautiful on account of the flowers of expanding kadamba trees, which is full of the groves of Tamala trees grown in rows, which sprinkles down sprays of waters from icicles and which has elephants in rut with beautiful trunks.

रहितरत्नचयान्न शिलोच्चयानपलताभवना न दरीभुवः ॥
विपुलिनाम्बुरुहा न सरिद्वधूरकुसुमान्दधतं न महीरुहः ॥ १० ॥

अन्वयः—रहितरत्नचयान् शिलोच्चयान् न दधतम्, अपलताभवनाः दरीभुवः न (दधतम्), विपुलिनाम्बुरुहाः सरिद्वधूः न (दधतम्) अकुसुमान् महीरुहः न (दधतम्) ॥ १० ॥

10. The mountain bearing no peaks void of jewels, no valeys without bowers of creepers, no rivers not abounding in sandy banks and lotuses, no trees not covered with flowers.

व्यथितसिन्धुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः ॥
फणभृतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः ॥ ११ ॥

अन्वयः—अनीरशनैः घनैः अमरलोकवधूजघनैः शनैः व्यथितसिंधुं दयितरम्यलताबकुलैः फणभृतां कुलैः अभितः ततं तथा विततम् ॥ ११ ॥

11. The mountain, the waters of the rivers on which are gradually agitated by the broad and girdled hips of celestial damsels and which is filled on all sides by families of serpents fond of graceful creepers and filaments.

ससुरचापमनेकमणिप्रभैरपपयोविशदं हिमपाण्डुभिः ॥
अविचलं शिखरैरुपबिभ्रतं ध्वनितसूचितमम्बुमुचां चयम् ॥ १२ ॥

अन्वयः—अनेकमणिप्रभैः हिमपाण्डुभिः शिखरैः ससुरचापम् अपपयोविशदम् अविचलं ध्वनितसूचितम् अंबुमुचां चयम् उपबिभ्रतम् ॥ १२ ॥

12. The mountain, which, on its peaks, white by snowfall shining with the lustre of various jewels, bears masses of clouds, bright by reason of their having become waterless, possessed of rainbows motionless but indicated by thundering.

विकचवारिरुहं दधतं सरः सकलहंसगणं शुचि मानसम् ॥
शिवमगात्मजया च कृतेर्ष्यया सकलहं सगणं शुचिमानसम् ॥ १३ ॥

अन्वयः—विकचवारिरुहं सकलहंसगणं शुचिमानसं सरः (तथा) च कृतेर्ष्यया अगात्मजया सकलहं सगणं शुचिमानसं शिवं दधतम् ॥ १३ ॥

13. The mountain, which has the transparent mânasa lake, strewn with full-blown lotuses full of multitudes (flights) of swans, and on which resides the God Shankar, surrounded by his attendants and feigning quarrel with his wife, angry through love.

ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना ॥
मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहमुमापतिसेविनः ॥ १४ ॥

अन्वयः—दिवम् अभितः ग्रहविमानगणान् ज्वलयता औषधिजेन कृशानुना अनुक्षपम् उमापतिसेविनः त्रिपुरदाहं मुहुः अनुस्मरयन्तम् ॥ १४ ॥

14. The mountain, which by the fire produced from herbs that illuminate the planets and heavenly cars (moving) about the heavens, every night reminds the attendants of the lord of Uma of the burning of Tripur (by Shankar).

विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्तिभिरम्बुभिः ॥
दधतमुन्नतसानुसमुद्धतां धृतसितव्यजनामिव जान्हवीम् ॥ १५ ॥

अन्वयः—विततशीकरराशिभिः उच्छ्रितैः उपलरोधविवर्तिभिः अंबुभिः धृतसितव्यजनाम् इव उन्नतसानुसमुद्धतां जान्हवीं दधतम् ॥ १५ ॥

15. The mountain, which bears the Ganges flowing down its lofty peaks, holding as it were white fans with its waters rebounding and whirling round when obstructed by rocks and spreading around sprays (of water).

अनुचरेण धनाधिपतेरथो नगविलोकनविस्मितमानसः ॥
स जगदे वचनं प्रियमादरान्मुखरतावसरे हि विराजते ॥ १६ ॥

अन्वयः—अथो नगविलोकनविस्मितमानसः सः (अर्जुनः) धनाधिपतेः अनुचरेण प्रियं वचनम् आदरात् जगदे, हि अवसरे मुखरता विराजते ॥ १६ ॥

16. Then that Arjuna whose mind was filled with admiration at the sight of the mountain, was respectfully addressed by the servant of Kubera in (these) sweet words verily garrulity on a suitable occasion is becoming.

अलमेष विलोकितः प्रजानां सहसा संहतिमंहसां विहन्तुम् ॥
घनवर्त्म सहस्रधेव कुर्वन्हिमगौरैरचलाधिपः शिरोभिः ॥ १७ ॥

अन्वयः—हिमगौरैः शिरोभिः घनवर्त्म सहस्रधा कुर्वन् इव एषः अचलाधिपः विलोकितः प्रजानाम् अंहसां संततिं सहसा विहंतुम् अलम् (अस्ति) ॥ १७ ॥

17. This Lord of mountains that seems to rend the sky into a thousand parts by its peaks white with snow is able easily to destroy a series of sins of the people by its very appearance.

इह दुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम् ॥
अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परम् ॥ १८ ॥

अन्वयः—इह असुतरम् अंतरं दुरधिगमैः आगमैः किञ्चित् एव सततं वर्णयन्ति अतिविपिनं दिग्व्यापिनम् अमुं परं पुरुषम् इव परं पद्मयोनिः वेद ॥ १८ ॥

18. Poets have constantly been describing but very partly the steep middle regions (of the mountain) by large and inaccessible trees as philosophers have been describing the invisible inner soul by various Shastras difficult to be grasped. The God Brahma alone knows the mountain that is very dense and that extends to all quarters as he alone knows the supreme being that is difficult to know and that is all pervading.

रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः ॥
नयति संततमुत्सुकतामयं धृतिमतीरुपकान्तमपि स्त्रियः ॥ १९ ॥

अन्वयः—अयं रुचिरपल्लवपुष्पलतागृहैः उपलसज्जलजैः जलराशिभिः उपकांतं धृतिमतीः अपि स्त्रियः सततम् उत्सुकतां नयति ॥ १९ ॥

19. This mountain makes even those women who are proud or satiated (even) in the presence of their husbands anxious (for enjoyment) by its bowers surrounded with creepers full of graceful blossoms and flowers and by its lakes full of blooming lotuses.

सुलभैः सदा नयवतायवता निधिगुह्यकाधिपरमैः परमैः ॥
अमुना धनैः क्षितिभृतातिभृता समतीत्य भाति जगती जगती ॥ २० ॥

अन्वयः—नयवता अयवता (च) सदा सुलभैः निधिगुह्यकाधिपरमैः परमैः धनैः अमुना क्षितिभृताअतिभृता जगती जगती समतीत्य भाति ॥ २० ॥

20. This earth, being full on account of this mountain of superior wealths that are obtainable only to the pious and the lucky and that give delight to (even) the lord of Yakshas and of nine treasures (i. e. Kubera) seems to excel the heaven and the nether world.

अखिलमिदममुष्य गौरीगुरोस्त्रिभुवनमपि नैति मन्ये तुलाम् ॥
अधिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः ॥ २१ ॥

अन्वयः—इदम् अखिलं त्रिभुवनम् अपि अमुष्य गौरीगुरोः तुलां न एति (इति) मन्ये यत् जनैः अविदितविभवः भवानीपतिः एनं सदा अधिवसति ॥ २१ ॥

21. The whole universe will not, methinks, stand comparison with this mountain as the Lord of Pârwati, whose greatness is incomprehensible to men, has graced it by his perpetual residence.

वीतजन्मजरसं परं शुचि ब्रह्मणः पदमुपैतुमिच्छताम् ॥
आगमादिव तमोपहादितः संभवन्ति मतयो भवच्छिदः ॥ २२ ॥

अन्वयः—वीतजन्मजरसं ब्रह्मणः परं शुचि पदम् उपैतुम् इच्छताम् तमोपहात् आगमात् इव तमोपहात् इतः भवच्छिदः मतयः संभवन्ति ॥ २२ ॥

22. In the hearts of those who desire to attain oneness with the sacred Brahma free from birth and decrepitude, desires to break off worldly ties are produced from (residence on) this mountain, capable of removing all ignorance, as from the (study of the) scriptures.

दिव्यस्त्रिणां सचरणलाक्षारागा रागायाते निपतितपुष्पापीडाः ॥
पीडाभाजः कुसुमचिताः साशंसं शंसन्त्यस्मिन्सुरतविशेषं शय्याः ॥ २३ ॥

अन्वयः—अस्मिन् सचरणलाक्षारागाः निपतितपुष्पापीडाः पीडाभाजः कुसुमचिताः दिव्यस्त्रीणां शय्याः रागायाते (सति) साशंसं सुरतविशेषं शंसन्ति ॥ २३ ॥

23. Here the beds of celestial damsels, spread over with flowers, dyed with red dye applied to the feet, strewn with chaplets of flowers and spread disorderly (being pressed down), indicate the various modes of samnal intercourse through excessive amorous passions.

गुणसंपदा समधिगम्य परं महिमानमत्र महिते जगताम् ॥
नयशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुमौषधयः ॥ २४ ॥

अन्वयः—जगतां महिते अत्र गुणसंपदा परं महिमानं समधिगम्य औषधयः नयशालिनि अधिपतौ श्रियः इव ज्वलितुं न विरमंति ॥ २४ ॥

24. Herbs, obtaining superior efficacy through exuberance of qualities, unintermittedly throw light on this mountain revered by all the worlds, as wealth never ceases to smile upon a righteous king.

कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलम् ॥
इह सिन्धवश्च वरणावरणाः करिणां मुदे सनलदानलदाः ॥ २५ ॥

अन्वयः—इह कुररीगणः कृतरवः तरवः कुसुमानताः कमलं सकमलं (किं) च वरणावरणाः सिन्धवः सनलदानलदाः (सन्तः) करिणां मुदे (भवन्ति) ॥ २५ ॥

25. Here a flight of ospreys cries (unpleasant), trees are bent with flowers, waters are full of lotuses, moreover here rivers, overshadowed by trees, filled with fragrant उशीर roots, and removing heat, give great delight to elephants.

सादृश्यं गतमपनिद्रचूतगन्धैरामोदं मदजलसेकजं दधानः ॥
एतस्मिन्मदयति कोकिलानकाले लीनालिः सुरकरिणां कपोलकाषः ॥ २६ ॥

अन्वयः—एतस्मिन् अपनिद्रचूतगन्धैः सादृश्यं गतं मदजलसेकजम् आमोदं दधानः (अत एव) लीनालिः सुरकरिणां कपोलकाषः अकाले कोकिलान् मदयति ॥ २६ ॥

26. On this mountain, the branches, &c. of trees against which temples of the elephants of Gods are rubbed, which bear the odour produced from the flow of rut resembling the fragrance of full blown mango-blossoms and (hence) clung to by bees, intoxicate the cuckoos out of season (though vernal season has not set in).

सनाकवनितं नितम्बरुचिरं चिरं सुनिनदैर्नदैर्वृतममुम् ॥
मता फणवतोऽवतो रसपरा परास्तवसुधा सुधाधिवसति ॥ २७ ॥

अन्वयः—सनाकवनितं नितंबरुचिरं चिरं सुनिनदैः नदैः वृतम् अमुम् अवतः फणवतः मता रसपरा परास्तवसुधा सुधा चिरं अधिवसति ॥ २७ ॥

27. Nectar, the best of all liquids, dear to the serpent (Shesha) who protects (the nether world) is ever to be found, to the exclusion of any other place on the earth, on this mountain, that looks awful by its (lofty) precipices, that is surrounded by rivers producing sweet sounds, and that is frequented by celestial damsels.

श्रीमल्लताभवनमोषधयः प्रदीपाः
शय्या नवानि हरिचन्दनपल्लवानि ॥
अस्मिन्रतिश्रमनुदश्च सरोजवाताः
स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः ॥ २८ ॥

अन्वयः—अस्मिन् श्रीमल्लताभवनम् ओषधयः प्रदीपाः नवानि हरिचंदनपल्लवानि शय्याः च रतिश्रमनुदः सरोजवाताः सुरसुंदरीभ्यः दिवः स्मर्तुं न दिशंति ॥ २८ ॥

28. Here bowers of flowery creepers serve the purpose of houses; bright herbs of lamps, fresh blossoms of heavenly trees of beds, breezes wafting the fragrance of lotuses beguile the fatigue of sexual enjoyment; all these make the celestial damsels forget heaven.

ईशार्थमम्भसि चिराय तपश्चरन्त्या
यादोविलङ्घनविलोलविलोचनायाः ॥
आलम्बताग्रकरमत्र भवो भवान्याः
श्च्योतन्निदाघसलिलाङ्गुलिना करेण ॥ २९ ॥

अन्वयः—अत्र ईशार्थं चिराय अंभसि तपः चरंत्याः यादोविलङ्घनविलोलविलोचनायाः भवान्याः अग्रकरं भवः श्च्योतन्निदाघसलिलांगुलिना करेण आलम्बत ॥ २९ ॥

29. Here the God Shiva took by his hand, from the fingers of which dripped down drops of perspiration (due to love), the palm of hand of Bhawâni, who had long been practising hard penance in water with the object of obtaining Shiva for her lord and whose eyes were unsteady on account of the contact of aquatic animals.

येनापविद्धसलिलः स्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्ममन्थे ॥
व्यावर्तनैरहिपतेरयमाहिताङ्कः खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥ ३० ॥

अन्वयः—अयं देवासुरैः येन (मंदराद्रिणा) अपविद्धसलिलः (अत एव) स्फुटनागसद्मा अंबुनिधिः अमृतं ममन्थे अहिपतेः व्यावर्तनैः आहिताङ्कः स मंदराद्रिः खं व्यालिखन् इव विभाति ॥ ३० ॥

30. This mountain appears as if to be the mountain Mandar, which is marked by the turnings of the great serpent (Vâsuki), which seems to pierce the sky (by its lofty peaks) and by which Gods and demons churned tue ocean, which displayed the nether world as its waters were divided.

नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रै-
रानीलाभैर्विरचितपरभागा रत्नैः ॥
ज्योत्स्नाशङ्कामिह वितरति हंसश्येनी
मध्येऽप्यह्नः स्फटिकरजतभित्तिच्छाया ॥ ३१ ॥

अन्वयः—इह अशिशिररश्मेः उस्रैः उच्छ्रायं नीता, आनीलाभैः रत्नैः विरचितपरभागा, हंसश्येनी, स्फटिकरजतभित्तिछाया अह्नः मध्ये अपि मुहुः ज्योत्स्नाशङ्कां वितरति ॥ ३१ ॥

31. On this mountain, the brilliance of crystal and silver walls, white like swans increased by (the reflection of) the rays of the Sun, and mixed with the lustres of blue emeralds, often makes us mistake it for moonlight even at midday.

दधत इव विलासशालि नृत्यं मृदु पतता पवनेन कम्पितानि ॥
इह ललितविलासिनीजनभ्रूगतिकुटिलेषु पयःसु पङ्कजानि ॥ ३२ ॥

अन्वयः—इह मृदु पतता पवनेन कम्पितानि पंकजानि ललितविलासिनीजनभ्रूगतिकुटिलेषु पयःसु विलासशालिनृत्यं दधत इव ॥ ३२ ।

32. Here the lotuses, shaken by gentle breezes, seem to hold a dance attractive by its sportiveness in waters, slightly tremulous like the moving eyebrows of beautiful amorous ladies.

अस्मिन्नगृह्यत पिनाकभृता सलील-
माबद्धवेपथुरधीरविलोचनायाः ॥
विन्यस्तमङ्गलमहौषधिरीश्वरायाः
स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ३३

अन्वयः—अस्मिन् पिनाकभृता अधीरविलोचनायाः ईश्वरायाः आबद्धवेपथुः विन्यस्तमंगलमहौषधिः पाणिः स्रस्तोरगप्रतिसरेण करेण सलीलम् अगृह्यत ॥ ३३ ॥

33. Here the God Shiva, bearer of Pinak, lovingly took by his hand from which the serpent in the form of marriage-string dropped down, the hand that had begun to tremble and that contained the auspicious herbs (the filaments of यव, &c.) of Parwati whose eyes looked alarmed (at the sight of the serpent).

क्रामद्भिर्घनपदवीमनेकसंख्यै-
स्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः ॥
उस्राणां व्यभिचरतीव सप्तसप्तेः
पर्यस्यन्निह निचयः सहस्रसंख्याम् ॥ ३४ ॥

अन्वयः—इह घनपदवीं क्रामद्भिः अनेकसंख्यैः शुचिमणिजन्मभिः तेजोभिः विभिन्नः (अत एव) पर्यस्यन् सप्तसप्तेः उस्राणां निचयः सहस्रसंख्यां व्यभिचरति इव ॥ ३४ ॥

34. Here the multitude of the rays of the Sun blended with the splendour of numerous bright crystals pervading the (whole) sky and (consequently) spreading all round, seems to transgress the number thousand.

व्यधत्त यस्मिन्पुरमुच्चगोपुरं पुरां विजेतुर्धृतये धनाधिपः ॥
स एष कैलास उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः ॥ ३५ ॥

अन्वयः—यस्मिन् धनाधिपः पुरां विजेतुः धृतये उच्चगोपुरं पुरं व्यधत्त स एव कैलासः उपांतसर्पिणः विवस्वतः अकालास्तमयं करोति ॥ ३५ ॥

35. This mountain Kailasa, on which Kubera created the city (Alaka) of lofty gates to please the conqueror of the three cities (the God Shiva), makes the sun set before the proper time.

नानारत्नज्योतिषां संनिपातैश्छन्नेष्वन्तःसानु वप्रान्तरेषु ॥
बद्धांबद्धां भित्तिशङ्कामुष्मिन्नावानावान्मातरिश्वा निहन्ति ॥ ३६ ॥

अन्वयः—अमुष्मिन् अन्तःसानु नानारत्नज्योतिषां सन्निपातैः छन्नेषु वप्रांतरेषु बद्धांबद्धां भित्तिशङ्काम् आवान् आवान् मातरिश्वा निहन्ति ॥ ३६ ॥

36. The constantly blowing wind removes the strong mistaken impression of a wall on the intervals of peaks of the mountain covered by the mixed rays of various jewels within.

रम्या नवद्युतिरपैति न शाद्वलेभ्यः
श्यामीभवन्त्यनुदिनं नलिनीवनानि ॥
अस्मिन्विचित्रकुसुमस्तबकाचितानां
शाखाभृतां परिणमन्ति न पल्लवानि ॥ ३७ ॥

अन्वयः—अस्मिन् शाद्वलेभ्यः रम्या नवद्युतिः न अपैति, नलिनीवनानि अनुदिनं श्यामीभवन्ति, विचित्रकुसुमस्तबकाचितानां शाखाभृतां पल्लवानि न परिणमन्ति ॥ ३७ ॥

37. On this mountain, the meadows (grown with green grass) never lose their fresh brightness; clusters of lotus plants are ever blue-black, and the leaves of trees loaded with bunches of a variety of flowers never become ripe.

परिसरविषयेषु लीढमुक्ता हरिततृणोद्गमशङ्कया मृगीभिः ॥
इह नवशुककोमला मणीनां रविकरसंवलिताः फलन्ति भासः ॥ ३८ ॥

अन्वयः—इह परिसरविषयेषु मृगीभिः हरिततृणोद्गमशङ्कया लीढमुक्ताः नवशुककोमलाः मणीनां भासः रविकरसंवलिताः (सत्यः) फलन्ति ॥ ३८ ॥

38. On spots near the skirts of this mountain, the rays of jewels (such as emeralds, &c.) green like young parrots and abandoned after being (first) licked by female deer mistaking them for shoots of green grass, look extremely beautiful with the rays of the Sun.

उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसंभवः परागः ॥
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम् ॥ ३९ ॥

अन्वयः—वात्याभिः अमुष्मात् उत्फुल्लस्थलनलिनीवनात् उद्धूतः वियति समंतात् विवर्तितः सरसिजसंभवः परागः कनकमयातपत्रलक्ष्मीम् आधत्ते ॥ ३९ ॥

39. The pollen of lotuses, raised up by tempestuous winds from yonder clusters of full blown land-lotuses and revolved round (spread) in the sky, bears the beauty of the golden umbrella.

इह सनियमयोः सुरापगायामुषसि सयावकसव्यपादरेखा ॥
कथयति शिवयोः शरीरयोगं विषमपदा पदवी विवर्तनेषु ॥ ४० ॥

अन्वयः—इह उषसि सुरापगायां सयावकसव्यपादरेखा विषमपदा विवर्तनेषु पदवी सनियमयोः शिवयोः शरीरयोगं कथयति ॥ ४० ॥

40. On the banks of the Ganges the path of circum-ambulation, showing at early dawn unequal foot-prints and bearing the stamps of the left foot dyed with Alaktaka, indicates the bodily union of Shiva and Parwati engaged in some voluntary religious observance.

संमूर्च्छतां रजतभित्तिमयूखजालैरालोलपादपलतान्तरनिर्गतानाम् ॥
घर्मद्युतेरिह मुहुः पटलानि धाम्नामादर्शमण्डलनिभानि समुल्लसन्ति ॥ ४१ ॥

अन्वयः—इह रजतभित्तिमयूखजालैः संमूर्च्छतां आलोलपादपलतान्तरनिर्गतानां घर्मद्युतेः धाम्नाम् आदर्श-मंडलनिभानि पटलानि मुहुः समुल्लसन्ति । ४१ ॥

41. Rings of the light of the Sun, issuing out of the openings of branches of tremulous trees, and enhanced by the multitude of rays darting from silver-walls, look like mirror-orbs and now and then brighten (the ground).

शुक्लैर्मयूखनिचयैः परिवीतमूर्तिर्वप्राभिघातपरिमण्डलितोरुदेहः ॥
शृङ्गाण्यमुष्य भजते गणभर्तुरुक्षा कुर्वन्वधूजनमनःसु शशाङ्कशङ्काम् ॥ ४२ ॥

अन्वयः—शुक्लैः मयूखनिचयैः परिवीतमूर्तिः वप्राभिघातपरिमण्डलितोरुदेहः गणभर्तुः उक्षा वधूजनमनःसु शशाङ्कशङ्काम् कुर्वन् अमुष्य शृंगाणि भजते ॥ ४२ ॥

42. The bull of the Lord of the Ganâs (Shiva), with his form surrounded by numerous white rays and with his huge body made circular in the act of butting against banks, roams about the summit of this mountain causing young ladies mistake him for the moon.

संप्रति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले ॥
खण्डितविग्रहं बलभिदो धनुरिह विविधाः
पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥ ४३ ॥

अन्वयः—इह विविधाः शिखरमणिरुचः संप्रति लघुनि क्षीणपयसि भिदाम् उपेयुषि जलधरपटले कथम् अपि शनकैः लब्धजन्म खंडितविग्रहं बलभिदः धनुः पूरयितुं विभवः भवन्ति ॥ ४३ ॥

43. On this mountain the various colours of the jewels on summits are able to complete the rainbow, that somehow gradually springs up in a mutilated form on circular clouds that are now (in autumn) small and dispersed being void of water.

स्नपितनवलतातरुप्रवालैरमृतलवस्रुतिशालिभिर्मयूखैः ॥
सततमसितयामिनीषु शंभोरमलयतीह वनान्तमिन्दुलेखा ॥ ४४ ॥

अन्वयः—इह शंभोः इंदुलेखा स्नपितनवलतातरुप्रवालैः अमृतलवस्रुतिशालिभिः मयूखैः सततम् असित-यामिनीषु वनांतम् अमलयति ॥ ४४ ॥

44. Here the curve of the moon on the head of Shankar ever brightens the distant quarters in dark nights with her rays that look beautiful by the trickling of the drops of nectar and that sprinkle (bathe) the leaves of fresh creepers and trees (with it).

क्षिपति योऽनुवनं विततां बृहद्बृहतिकामिव रौचनिकीं रुचम् ॥
अयमनेकहिरण्मयकंदरस्तव पितुर्दयितो जगतीधरः ॥ ४५ ॥

अन्वयः—यः अनुवनं विततां रौचनिकीं रुचम् बृहद्बृहतिकाम् इव क्षिपति अनेकहिरण्यमयकंदरः अयं तव पितुः दयितः जगतीधरः (अस्ति) ॥ ४५ ॥

45. Dear to your father is this mountain (Indrakeel) which spreads around in every forest its wide yellowish charms like a large upper garment (mantle) and which has many caves full of gold.

सक्तिं जवादपनयत्यनिले लतानां वैरोचनैर्द्विगुणिताः सहसा मयूखैः ॥
रोधोभुवां मुहुरमुत्र हिरण्मयीनां भासस्तडिद्विलसितानि विडम्बयन्ति ॥ ४६ ॥

अन्वयः—अमुत्र अनिले जवात् लतानां सक्तिम् अपनयति (सति) सहसा वैरोचनैः मयूखैः द्विगुणिताः हिरण्मयीनां रोधोभुवां भासः मुहुः तडिद्विलसितानि विडम्बयन्ति ॥ ४६ ॥

46. Here the beauty of the golden bank-spots, all at once doubly enhanced by the rays of the Sun, when the union of creepers is violently destroyed by wind (when they are separated by wind), often resembles the flash of lightning.

कषणकम्पनिरस्तमहाहिभिः क्षणविमत्तमतङ्गजवर्जितैः ॥
इह मदस्नपितैरनुमीयते सुरगजस्य गतं हरिचन्दनैः ॥ ४७ ॥

अन्वयः—इह कषणकम्पनिरस्तमहाहिभिः मदस्नपितैः (अत एव) क्षण विमत्तमतंगजवर्जितैः हरिचंदनैः सुरगजस्य गतम् अनुमीयते ॥ ४७ ॥

47. Here the passage of the Great Elephants of Gods (Airâwata) can be inferred from the sandal trees that are bathed in rut and (hence) abandoned for a short time by intoxicated elephants and quitted by large serpents on account of their (trees) being shaken in the act of scratching.

जलदजालघनैरसिताश्मनामुपहतप्रचयेह मरीचिभिः ॥
भवति दीप्तिरदीपितकंदरा तिमिरसंवलितेव विवस्वतः ॥ ४८ ॥

अन्वयः—इह जलदजालघनैः असिताश्मनां मरीचिभिः उपहतप्रचया (अत एव) अदीपितकंदरा विवस्वतः दीप्तिः तिमिरसंवलिता इव भवति ॥ ४८ ॥

48. Here the light of the Sun, being obstructed by mass of clouds and the rays of emeralds and (hence) not illuminating the caves, seems to be blended with darkness.

भव्यो भवन्नपि मुनेरिह शासनेन
क्षात्रे स्थितः पथि तपस्य हतप्रमादः ॥
प्रायेण सत्यपि हितार्थकरे विधौ हि
श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥ ४९ ॥

अन्वयः—इह भव्यः भवन् अपि मुनेः शासनेन क्षात्रपथि स्थितः हतप्रमादः (सन्) तपस्य हि प्रायेण हितार्थकरे अपि विधौ सति अंतरायैः विना श्रेयांसि लब्धुम् असुलभानि ॥ ४९ ॥

49. Practise penance here; stand, however, on your guard as you have taken to the path of warriors by order of the sage, however peacefully inclined you may be. For generally, success, unimpeded, is an impossibility though the undertaking be beneficial.

मा भूवन्नपथहृतस्तवेन्द्रियाश्वाः संतापे दिशतु शिवः शिवां प्रसक्तिम् ॥
रक्षन्तस्तपसि बलं च लोकपालाः कल्याणीमधिकफलां क्रियां क्रियासुः ॥ ५० ॥

अन्वयः—तव इंद्रियाश्वाः अपथहृतः माभूवन् संतापे (सति) शिवः शिवां प्रसक्तिं दिशतु च लोकपालाः तपसि बलं रक्षन्तः कल्याणीं क्रियाम् अधिकफलां क्रियासुः ॥ ५० ॥

50. May not the horses in the form of senses lead you astray! May God Shiva give you untiring energy when depressed by fatigue; May the protectors of quarters (Indra and others) increase your enduring powers for penance and may they reward your auspicious underaking with still more auspicious results.

इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभृत्ये ॥
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
संधत्ते भृशमरतिं हि सद्वियोगः ॥ ५१ ॥

अन्वयः—प्रियार्हे राजराजभृत्ये हितं प्रियम् उक्त्वा सपदि स्वं धाम गतवति (सति) पृथासुतः सोत्कण्ठं किम् अपि प्रदध्यौ हि सद्वियोगः भृशम् अरतिं संधत्ते ॥ ५१ ॥

51. When the benevolent servant of Kubera instantly departed for his house after having uttered these agreeable and salutary words, Arjuna was thinking of something with great uneasiness. Verily separation from the good gives great pain.

तमनतिशयनीयं सर्वतः सारयोगा-
दविरहितमनेकेनाङ्कभाजा फलेन ॥
अकृशमकृशलक्ष्मीश्चेतसाशंसितं स
स्वमिव पुरुषकारं शैलमभ्याससाद ॥ ५२ ॥

अन्वयः—अकृशलक्ष्मीः सः सर्वतः सारयोगात् अनतिशयनीयम् अनेकेन अङ्कभाजा फलेन अविरहितम् अकृशं चेतसा आशंसितं तं शैलं स्वं पुरुषकारम् इव अभ्याससाद ॥ ५२ ॥

52. Arjuna, of undiminished charms, approached (obtained), like his prowess, that mountain, that was most cherished, that could not be surpassed in any way on account of its excellence (essence) and that was pregnant with good results various and easily obtainable.

षष्ठः सर्गः

—o—

रुचिराकृतिः कनकसानुमथो परमः पुमानिव पतिं पतताम् ॥
धृतसत्पथस्त्रिपथगामभितः स तमारुरोह पुरुहूतसुतः ॥ १ ॥

अन्वयः—अथ रुचिराकृतिः धृतसत्पथः सः पुरुहूतसुतः कनकसानुं तं परमः पुमान् पततां पतिम् इव त्रिपथगाम् अभितः आरुरोह ॥ १ ॥

1. Then the son of Indra of handsome make and following a righteous pass ascended, along the course of the Ganges, that mountain of golden peaks as the supreme Being (Vishnu) does the king of birds (Garuda).

तमनिन्द्यबन्दिन इवेन्द्रसुतं विहितालिनिक्वणजयध्वनयः ॥
पवनेरिताकुलविजिह्मशिखा जगतीरुहोऽवचकरुः कुसुमैः ॥ २ ॥

अन्वयः—विहितालिनिक्वणजयध्वनयः पवनेरिताकुलविजिह्मशिखाः जगतीरुहः अनिन्द्यबन्दिनः इव तम् इन्द्रसुतं कुसुमैः अवचकरुः ॥ २ ॥

2. The trees, with the humming of bees as words of welcome and with tremulous branches moving to and fro (like chawries) being shaken by wind, showered, like holy bards, flowers on the (head) of the son of Indra.

अवधूतपङ्कजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः ॥
परिरेभिरेऽभिमुखमेत्य सुखाः सुहृदः सखायमिव तं मरुतः ॥ ३ ॥

अन्वयः—अवधूतपङ्कजपरागकणाः तनुजाह्नवीसलिलवीचिभिदः सुखाः मरुतः तं सुहृदः सखायम् इव अभिमुखम् एत्य परिरेभिरे ॥ ३ ॥

3. The winds agreeable to touch, dispersing particles of the pollen of lotuses and breaking the small ripples of the waters of the Ganges going up to receive him, embraced him as loving friends do on meeting their friend.

उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः ॥
मुदमस्य माङ्गलिकतूर्यकृतां ध्वनयः प्रतेनुरनुवप्रमपाम् ॥ ४ ॥

अन्वयः—उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः अनुवप्रम् अपां ध्वनयः अस्य मांगलिकतूर्यकृतां मुदं प्रतेनुः ॥ ४ ॥

4. The sounds of water along the banks, mixed with the distinct cries of swans and cranes, gave Arjuna that delight which he would have received from auspicious musical instruments.

अवरुग्णतुङ्गसुरदारुतरौ निचये पुरः सुरसरित्पयसाम् ॥
स ददर्श वेतसवनाचरितां प्रणतिं बलीयसि समृद्धिकरीम् ॥ ५ ॥

अन्वयः—सः पुरः अवरुग्णतुंगसुरदारुतरौ बलीयसि सुरसरित्पयसां निचये वेतसवनाचरितां समृद्धिकरीं प्रणतिं ददर्श ॥ ५ ॥

5. In the great flood of the waters of the Ganges that had uprooted lofty pine trees (by its current) he saw before him the humility of the groves of reeds, humility that (invariably) brings on prosperity.

प्रबभूव नालमवलोकयितुं परितः सरोजरजसारुणितम् ॥
सरिदुत्तरीयमिव संहतिमत्स तरङ्गरङ्गि कलहंसकुलम् ॥ ६ ॥

अन्वयः—सः परितः सरोजरजसा अरुणितं संहतिमत् तरङ्गभङ्गि सरिदुत्तरीयम् इव (स्थितं) कलहंसकुलम् अवलोकयितुम् अलं न प्रबभूव ॥ ६ ॥

6. Arjuna could not long gaze at the multitude of swans that formed as it were the upper garments on the breasts of the woman in the form of the river, that was reddened by the pollen of lotuses, that looked beautiful on account of waves and that was compact (setting in close lines).

दधति क्षतीः परिणतद्विरदे मुदितालियोषिति मदस्रुतिभिः ॥
अधिकां स रोधसि बबन्ध धृतिं महते रुजन्नपि गुणाय महान् ॥ ७ ॥

अन्वयः—सः क्षतीः दधति परिणतद्विरदे मदस्रुतिभिः मुदितालियोषिति रोधसि अधिकां धृतिं बबन्ध तथाहि महान् रुजन् अपि महते गुणाय भवति ॥ ७ ॥

7. Arjuna conceived a greater attachment for the bank (of the Ganges) which (though) shattered by the elephants that give side-blows with their tusks, was (yet) frequented by delighted drones attracted by the flow of rut. For the great do much good even when causing destruction.

अनुहेमवप्रमरुणैः समतां गतमूर्मिभिः सहचरं पृथुभिः ॥
स रथाङ्गनामवनितां करुणैरनुबध्नतीमभिननन्द रुतैः ॥ ८ ॥

अन्वयः—सः अनुहेमवप्रम् अरुणैः पृथुभिः ऊर्मिभिः समतां गतं सहचरं करुणैः रुतैः अनुबध्नतीं रथाङ्गनामवनिताम् अभिननन्द ॥ ८ ॥

8. He was delighted to see the female chakrawâka seeking, by loud pathetic cries, her mate who could not be distinguished in large waves looking reddish near the golden peaks (by their reflection on them).

सितवाजिने निजगदूरुचयश्चलवीचिरागरचनापटवः ॥
मणिजालमम्भसि निमग्नमपि स्फुरितं मनोगतमिवाकृतयः ॥ ९ ॥

अन्वयः—चलवीचिरागरचनापटवः रुचयः अंभसि निमग्नम् अपि मणिजालं मनोगतं स्फुरितम् आकृतयः इव सितवाजिने निजगदुः ॥ ९ ॥

9. Lustres, capable of producing different hues in the tremulous waves, proclaimed to Arjuna (the existence of) numerous jewels though merged in the waters of the Ganges as external gestures (contraction of eyebrows, &c.) indicate the emotions (anger, &c.) of the mind.

उपलाहतोद्धततरङ्गधृतं जविना विधूतविततं मरुता ॥
स ददर्श केतकशिखाविशदं सरितः प्रहासमिव फेनमपाम् ॥ १० ॥

अन्वयः—सः उपलाहतोद्धततरंगधृतं जविना मरुता विधूतविततं केतकशिखाविशदम् अपां फेनं सरितः प्रहासम् इव ददर्श ॥ १० ॥

10. Arjuna saw, like the loud laugh of the river, huge mass of foam as white as the ketaka flower thrown up by waves raised by being dashed against rocks, and moved and spread about by violent winds.

बहु बर्हिचन्द्रकनिभं विदधे धृतिमस्य दानपयसां पटलम् ॥
अवगाढमीक्षितुमिवेभपतिं विकसद्विलोचनशतं सरितः ॥ ११ ॥

अन्वयः—बहु बर्हिचन्द्रकनिभं बहुदानपयसां पटलम् अवगाढम् इभपतिम् ईक्षितुं विकसत् सरितः विलोचनशतम् इव अस्य धृतिं विदधे ॥ ११ ॥

11. Arjuna was much pleased at the sight of various drops of rut, beautiful like the eyes on peacock's tails resembling a thousand eyes of the river opened to see the Lord of elephants who had plunged deep for swimming pastime.

प्रतिबोधजृम्भणविभिन्नमुखी पुलिने सरोरुहदृशा ददृशे ॥
पतदच्छमौक्तिकमणिप्रकरा गलदश्रुबिन्दुरिव शुक्तिवधूः ॥ १२ ॥

प्रतिबोधजृम्भणविभिन्नमुखी पतदच्छमौक्तिकमणिप्रकरा गलदश्रुबिंदुः शुक्तिवधूः इव पुलिने सरोरुहदृशा ददृशे ॥ १२ ॥

12. The lotus-eyed Arjuna saw on the beach a pearl-oyster, beautiful as if it had just opened, with bright jewels scattered around, and water trickling down from it, as if it were a beautiful lady, with her mouth yawning as if she were just awake, her bright ornaments scattered around her bed and shedding tears of joy (resulting from pleasures of enjoyment).

शुचिरप्सु विद्रुमलताविटपस्तनुसान्द्रफेनलवसंवलितः ॥
स्मरदायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुभृतः ॥ १३ ॥

अन्वयः—अप्सु शुचिः तनुसान्द्रफेनलवसंवलितः विद्रुमलताविटपः स्मरदायिनः दशनांशुभृतः दयिताधरस्य भृशं स्मरयति स्म ॥ १३ ॥

13. The small branch of the coral creeper clean in water and surrounded by small thick particles of foam often put him in mind of the lower lip of his beloved illumined by the rays of her teeth and rousing amorous propensities.

उपलभ्य चञ्चलतरङ्गधृतं मदगन्धमुत्थितवतां पयसः ॥
प्रतिदन्तिनामिव स संबुबुधे करियादसामभिमुखान्करिणः ॥ १४ ॥

अन्वयः—सः चचलतरंगधृतं मदगन्धम् उपलभ्य पयसः उत्थितवतां करियादसां प्रतिदन्तिनाम् इव अभिमुखान् करिणः संबुबुधे ॥ १४ ॥

14. He saw elephants advancing against large aqatic animals as if against rival elephants, that were coming out of the waters (of the Ganges) on smelling the rut moving on tremulous waves.

स जगाम विस्मयमुदीक्ष्य पुरः सहसा समुत्पिपतिषोः फणिनः ॥
प्रहितं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रममपां पटलम् ॥ १५ ॥

अन्वयः—सः पुरः सहसा समुत्पिपतिषोः फणिनः प्रजविभिः श्वसितैः दिवि प्रहितं शरदभ्रविभ्रमम् अपां पटलम् उद्वीक्ष्य विस्मयं जगाम ॥ १५ ॥

15. He was wonder-struck to see before him a mass of water (sprays) beautiful like autumnal clouds thrown up in the sky by violent hisses of the serpent trying to spring up all of a sudden.

स ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः ॥
ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः ॥ १६ ॥

अन्वयः—सः सैकतवतीः अभितः शफरीपरिस्फुरितचारुदृशः सुरनिम्नगाम् उपयतीः (अत एव) बृहज्जघनाः ललिताः सखीः इव (स्थिताः) सरितः ततार ॥ १६ ॥

16. On his way he crossed the rivers that had sandy banks, that had beautiful eyes in in the form of the movements of the female fish and that like the broad-hipped and beautiful female friends, ran towards the Ganges (to greet her).

अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः ॥
मनसः प्रसत्तिमिव मूर्ध्नि गिरेः शुचिमाससाद स वनान्तभुवम् ॥ १७ ॥

अन्वयः—सः (गिरिम्) अधिरुह्य पुष्पभरनम्रशिखैः तरुभिः परितः परिष्कृततलां शुचिम् (अत एव) मनसः प्रसत्तिम् इव स्थितां गिरेः मूर्ध्निवनान्तभुवम् आससाद ॥ १७ ॥

17. On ascending the mountain (Indrakêêl) he came to a place on the skirts of the forest, which had its lower parts beautified on all sides by trees with their branches bent with abundant flowers and which was hallowed, representing as it were peacefulness of mind.

अनुसानु पुष्पितलताविततिः फलितोरुभूरुहविविक्तवनः ॥
धृतिमाततान तनयस्य हरेस्तपसेऽधिवस्तुमचलामचलः ॥ १८ ॥

अन्वयः—अनुसानु पुष्पितलताविततिः फलितोरुभूरुहविविक्तवनः अचलः हरेः तनयस्य तपसे अधिवस्तुम् अचलां धृतिम् आततान ॥ १८ ॥

18. The mountain (Indrakêêl) having on every peak, blooming creepers and solitary forests full of numerous trees bent with fruits produced in the son of Indra (Arjuna) firm resolution to choose the place for (practising) penance.

प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर्मुनिताम् ॥
श्रममादधावसुकरं न तपः किमिवावसादकरमात्मवताम् ॥ १९ ॥

अन्वयः—अथ तत्र विधिना धियं प्रणिधाय मुनितां दधतः पुरातनमुनेः असुकरं तपः श्रमं न आदधौ (तथाहि) आत्मवताम् अवसादकरं किमिव ॥ १९ ॥

19. On that mountain the austere penance produced no exhaustion (gloom) in Arjuna who had accepted the life of a sage and had concentrated his mind in the (profound) contemplation of god in accordance with the injunctions laid down in the yoga philosophy. For what can disturb the equanimity of the self-subdued.

शमयन्धृतेन्द्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः ॥
प्रतिवासरं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः ॥ २० ॥

अन्वयः—धृतेन्द्रियशमैकसुखः शुचिभिः गुणैः अघमयं तमः शमयन् विमलः सः प्रतिवासरं सुकृतिभिः कलाभिः शीतरुचि इव ववृधे ॥ २० ॥

20. The stainless Arjuna, looking upon restraint of senses as the only real happiness and destroying ignorance in the form of sin by his sacred qualities (benevolence, &c.) appeared more and more lustrous every day by the merit of his penance like the bright moon that giving delight by cooling the senses and dispelling darkness by her pure rays, increases every day in (by) her digits.

अधरीचकार च विवेकगुणादगुणेषु तस्य धियमस्तवतः ॥
प्रतिघातिनीं विषयसङ्गरतिं निरुपप्लवः शमसुखानुभवः ॥ २१ ॥

अन्वयः—(किं) च विवेकगुणात् अगुणेषु धियम् अस्तवतः तस्य निरुपप्लवः शमसुखानुभवः, प्रतिघातिनीं विषयसंगरतिम् अधरीचकार ॥ २१ ॥

21. The unobstructed enjoyment of the happiness of quietism produced a disgust for sensual pleasures (ever) pregnant with troubles in Arjuna who turned his mind from the sixfold passions by the contemplation of (the nature of) the supreme Being.

मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः ॥
सहजेतरौ जयशमौ दधती बिभरांबभूव युगपन्महसी ॥ २२ ॥

अन्वयः—प्रयतः मनसा जपैः प्रणतिभिः दिवम् अधिपतिं समुपेयिवान् सः सहजेतरौ जयशमौ दधती महसी युगपत् बिभरांबभूव ॥ २२ ॥

22. Arjuna, self subdued (devoted to non-killing, &c.) propitiating Indra by meditation by muttering prayers and by salutations (by mind, word and deed) became simultaneously possessed of twofold lustre one of victory and the other of quietism, the former natural and the latter, acquired.

शिरसा हरिन्मणिनिभः स वहन्कृतजन्मनोऽभिषवणेन जटाः ॥
उपमां ययावरुणदीधितिभिः परिमृष्टमूर्धनि तमालतरौ ॥ २३ ॥

अन्वयः—हरिन्मणिनिभः अभिषवणेन कृतजन्मनः जटाः शिरसा वहन् सः अरुणदीधितिभिः परिमृष्टमूर्धनि तमालतरौ उपमां ययौ ॥ २३ ॥

23. Arjuna, dark blue like emeralds and bearing matted hair on his head tawny by ablutions resembled the Tumâl tree whose top-branches are bathed in the light of the dawn.

धृतहेतिरप्यधृतजिह्मतिश्चरितैर्मुनीनधरयञ्शुचिभिः ॥
रजयांचकार विरजाः स मृगान्कमिवेशते रमयितुं न गुणाः ॥ २४ ॥

अन्वयः—धृतहेतिः अपि अधृतजिह्ममतिः शुचिभिः चरितैः मुनीन् अधरयन् विरजाः सः मृगान् रजयांचकार (हि) गुणाः कम् इव रमयितुं न ईशते ॥ २४ ॥

24. The sinless Arjuna, free from all wicked motives though wielding a sword, and excelling (even) sages by pious deeds delighted the deer verily, whom are not virtues powerful enough to win over ?

अनुकूलपातिनमचण्डगतिं किरता सुगन्धिमभितः पवनम् ॥
अवधीरितार्तवगुणं सुखतां नयता रुचां निचयमंशुमतः ॥ २५ ॥
नवपल्लवाञ्जलिभृतः प्रचये बृहतस्तरूनगमयतावनतिम् ॥
स्तृणता तृणैः प्रतिनिशं मृदुभिः शयनीयतामुपयतीं वसुधाम् ॥ २६ ॥
पतितैरपेतजलदान्नभसः पृषतैरपां शमयता च रजः ॥
स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा ॥ २७ ॥

अन्वयः—अनुकूलपातिनम् अचण्डगतिं सुगंधि पवनम् अभितः किरता, अवधीरितार्तवगुणम् अंशुमतः रुचां निचयं सुखतां नयता, प्रचये नवपल्लवाञ्जलिभृतः बृहतः तरून् अवनतिं गमयता, प्रतिनिशं शयनीयताम् उपयतीं वसुधां मृदुभिः तृणैः स्तृणता, अपेतजलदात् नभसः पतितैः अपां पृषतैः रजः शमयता तपसा, दयालुना इव परिगाढकृशः सः परिचर्यया अनुजगृहे ॥ २५ ॥ २६ ॥ २७ ॥

25-26-27. Causing gently blowing and favourable fragrant breezes to blow around; making the hot rays of the Sun, whose autumnal intensity was rendered ineffective, agreeable to touch; causing large trees with hallowed palms of the hands in the form of new blossoms to bend at the time of (his) plucking the flowers; covering the ground used for sleeping every night with soft grass and stopping the dust (flying up) by drops of waters fallen from the cloudless sky;–thus serving the extremely emaciated Arjuna, penance, as if struck with compassion, favoured him.

महते फलाय तदवेक्ष्य शिवं विकसन्निमित्तकुसुमं स पुरः ॥
न जगाम विस्मयवशं वशिनां न निहन्ति धैर्यमनुभावगुणः ॥ २८ ॥

अन्वयः—सः महते फलाय विकसत् तत् शिवं निमित्तकुसुमं पुरः अवेक्ष्य विस्मयवशं न जगाम वशिनाम् अनुभावगुणः धैर्यं न निहन्ति ॥ २८ ॥

28. Arjuna was not smit with wonder at the sight of the beautiful flower in the form of auspicious sign, which was to ripen in big fruit in the form of great glory. The dignity of those who possess self-control does not disturb the balance of their mind.

तदभूरिवासरकृतं सुकृतैरुपलभ्य वैभवमनन्यभवम् ॥
उपतस्थुरास्थितविषादधियः शतयज्वनो वनचरा वसतिम् ॥ २९ ॥

अन्वयः—सुकृतैः अभूरिवासरकृतं तत् वैभवम् अनन्यभवम् उपलभ्य आस्थितविषादधियः वनचराः शतयज्वनः वसतिम् उपतस्थुः ॥ २९ ॥

29. Concluding that the glory attained by Arjuna in a few days by his penance was unattainable to an ordinary man, the forest guards, with minds smit with sorrow, went to the abode of Indra.

विदिताः प्रविश्य विहितानतयः शिथिलीकृतेऽधिकृतकृत्यविधौ ॥
अनपेतकालमभिरामकथाः कथयांबभूवुरिति गोत्रभिदे ॥ ३० ॥

अन्वयः—(वनचराः) विदिताः प्रविश्य विहितानतयः अधिकृतकृत्यविधौ शिथिलीकृते (सति) अनपेतकालं (यथा तथा) गोत्रभिदे अभिरामकथाः इति कथयाम्बभूवुः ॥ ३० ॥

30. On obtaining permission they entered, paid their obeisance, and addressed Indra in the following graceful words, without losing much time as they were staying off from their duties for which they were appointed (i. e. of guarding the forest).

शुचिवल्कवीततनुरन्यतमस्तिमिरच्छिदामिव गिरौ भवतः ॥
महते जयाय मघवन्ननघः पुरुषस्तपस्यति तपञ्जगतीम् ॥ ३१ ॥

अन्वयः—हे मघवन् ! शुचिवल्कवीतवपुः तिमिरच्छिदाम् अन्यतमः इव अनघः पुरुषः भवतः गिरौ जगतीं तपन् महते जयाय तपस्यति ॥ ३१ ॥

31. One sinless person, O Indra ! whose body is clad in holy barks, heating (distressing) the earth as if he were one of the great dispellers of darkness (the Sun, the Fire, &c.) practises penance with a view to obtain great glory.

स बिभर्ति भीषणभुजंगभुजः पृथु विद्विषां भयविधायि धनुः ॥
अमलेन तस्य धृतसच्चरिताश्चरितेन चातिशयिता मुनयः ॥ ३२ ॥

अन्वयः—भीषणभुजंगभुजः सः विद्विषां भयविधायि पृथु धनुः बिभर्ति च तस्य अमलेन चरितेन धृतसच्चरिताः मुनयः अतिशयिताः ॥ ३२ ॥

32. He has arms resembling terrible serpents; he bears a broad bow that strikes terror in foes and he outshines even asges of holy deeds by his unblemished manner of leading life.

मरुतः शिवा नवतृणा जगती विमलं नभो रजासि वृष्टिरपाम् ॥
गुणसंपदानुगुणतां गमितः कुरुतेऽस्य भक्तिमिव भूतगणः ॥ ३३ ॥

अन्वयः—मरुतः शिवाः, जगती नवतृणा, नभः विमलं, रजासि अपां वृष्टिः (भवति) अस्य गुणसंपदा अनुगुणतां गमितः भूतगणः भक्तिं कुरुते इव ॥ ३३ ॥

33. (For him) the winds blow pleasant; the earth has put forth tender grass; the sky becomes fair; showers of water pour down when the dust rises up. All elements (Fire, water, &c.) won by his excellent virtues (•philanthrophy, &c.) seem to bow at his feet (worship him).

इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवान्तसदः ॥
विनमन्ति चास्य तरवः प्रचये परवान्स तेन भवतेव नगः ॥ ३४ ॥

अन्वयः—मृगाः अन्तसदः गुरुम् इव तम् इतरेतरानभिभवेन उपासते च प्रचये तरवः अस्य विनमन्ति सः नगः भवता इव तेन परवान् अस्ति ॥ ३४ ॥

34. The beasts, giving up mutual jealousy serve him as pupils do their preceptor. Trees bend down when he wants to pluck flowers. The mountain is as much under his control as it is under yours.

उरु सत्त्वमाह विपरिश्रमता परमं वपुः प्रथयतीव जयम् ॥
शमिनोऽपि तस्य नवसंगमने विभुतानुषङ्गि भयमेति जनः ॥ ३५ ॥

अन्वयः—(किं) च विपरिश्रमता उरु सत्त्वम् आह परमं वपुः जयं प्रथयति शमिनः अपि तस्य नवसङ्गमने जनः विभुतानुषङ्गि भयम् एति ॥ ३५ ।

35. That he knows no fatigue (even after exertions) speaks for his great strength. His excellent physic shows that he is (born) a conqueror. People newly coming in contact with him are struck though he is an ascetic with awe which ever follows in the train of majesty (which accompanies it).

ऋषिवंशजःस यदि दैत्यकुले यदि वान्वये महति भूमिभृताम् ॥
चरतस्तपस्तव वनेषु सहा न वयं निरूपयितुमस्य गतिम् ॥ ३६ ॥

अन्वयः—सः ऋषिवंशजः यदि वा दैत्यकुले यदि वा महति भूमिभृताम् अन्वये (जातः) तव वनेषु तपः चरतः अस्य गतिं निरूपयितुं वयं न सहाः ॥ ३६ ॥

36. We are not able to ascertain the real character (history) of this man practising penance in your forests whether he is the descendant of a sage or born in the family of demons or in the race of kings.

विगणय्य कारणमनेकगुणं निजयाथवा कथितमल्पतया ॥
असदप्यदः सहितुमर्हसि नः क्व वनेचराः क्व निपुणा मतयः ॥ ३७ ॥

अन्वयः—अनेकगुणं कारणं विगणय्य अथवा निजया अल्पतया कथितं नः अदः असत् अपि सहितुम् अर्हसि वनेचराः क्व निपुणा मतयः क्व ॥ ३७ ॥

37. You should kindly forgive us for our speech unrefined though it be, considering (that it was made) in our natural ignorance or considering the cause (hard penance) producing multifarious results (attainment of the position of Indra, &c.) where indeed are we rustics and where acute (experienced) intellects.

अधिगम्य गुह्यकगणादिति तन्मनसः प्रियं प्रियसुतस्य तपः ॥
निजुगोप हर्षमुदितं मघवा नयवर्त्मगाः प्रभवतां हि धियः ॥ ३८ ॥

अन्वयः—मघवा इति गुह्यकगणात् तत् मनसः प्रियं प्रियसुतस्य तपः अधिगम्य उदितं हर्षं जुगोप हि प्रभवतां धियः नयवर्त्मगाः ॥ ३८ ॥

38. Thus learning of the highly cherished penance of his beloved son from the forest guards, Indra concealed his joy arising there-from. The minds of the great indeed follow the path of prudence.

प्रणिधाय चित्तमथ भक्ततया विदितेऽप्यपूर्व इव तत्र हरिः ॥
उपलब्धमस्य नियमस्थिरतां सुरसुन्दरीरिति वचोऽभिदधे ॥ ३९ ॥

अन्वयः—अथ हरिः चित्तं प्रणिधाय तत्र भक्ततया विदिते अपि अपूर्व इव अस्य नियमस्थिरताम् उपलब्धुं सुरसुंदरीः इति वचः अभिदधे ॥ ३९ ॥

39. Though on meditation Indra knew that Arjuna was devout (in his penance) still feigning ignorance he thus addressed the celestial damsels in order to ascertain his perseverance.

सुकुमारमेकमणु मर्मभिदामतिदूरगं युतममोघतया ॥
अविपक्षमस्त्रमपरं कतमद्विजयाय यूयमिव चित्तभुवः ॥ ४० ॥

अन्वयः—मर्मभिदाम् अपरं कतमत् यूयम् इव सुकुमारं एकम् अणु अतिदूरगम् अमोघतया युतम् अविपक्षं चित्तभुवः अस्त्रं विजयाय (अस्ति (किं) ॥ ४० ॥

40. Of all mortal weapons, which like yourselves tender unmatched, sharp unfailing darting far off and hitting the proper mark, does Cupid wield triumphantly ?

भववीतये हतबृहत्तमसामवबोधवारि रजसः शमनम् ॥
परिपीयमाणमिव वोऽसकलैरवसादमेति नयनाञ्जलिभिः ॥ ४१ ॥

अन्वयः—भववीतये हतबृहत्तमसां रजसः शमनम् अवबोधवारि वः असकलैः नयनांजलिभिः परिपीयमाणम् इव अवसादम् एति ॥ ४१ ॥

41. The knowledge allaying the Raja-quality of those who have dispelled the great delusion (about the reality of worldly objects) with the object of escaping the rotation of mundane existence goes to nothing as if drunk by your side glances.

बहुधा गतां जगति भूतसृजा कमनीयतां समभिहृत्य पुरा ॥
उपपादिता विदधता भवतीः सुरसद्मयानसुमुखी जनता ॥ ४२ ॥

अन्वयः—पुरा जगति बहुधा गतां कमनीयतां समभिहृत्य भवतीः विदधता भूतसृजा जनता सुरसद्मयानसुमुखी उपपादिता ॥ ४२ ॥

42. Creating you of the entire beauty that was before differently distributed (in moon, &c.) the creator has made people anxious for the attainment of Heaven.

तदुपेत्य विघ्नयत तस्य तपः कृतिभिः कलासु सहिताः सचिवैः ॥
हृतवीतरागमनसां ननु वः सुखसङ्गिनं प्रति सुखावजितिः ॥ ४३ ॥

अन्वयः—तत् कलासु कृतिभिः सचिवैः सहिताः (यूयम्) उपेत्य तस्य तपः विघ्नयत ननु हे अप्सरसः हृतवीतरागमनसां वः सुखसंगिनं प्रति अवजितिः सुखा ॥ ४३ ॥

43. Accompanied by Gandharwas skilled in the arts (of music, &c.) go, therefore, O damsels ! to Arjuna and put obstacles in the way of his penance. Conquest of a person who desires worldly pleasures is easy to you who have (so often) lured persons whose minds were free from any attachment to worldly objects.

अविमृष्यमेतदभिलष्यति स द्विषतां वधेन विषयाभिरतिम् ॥
भववीतये न हि तथा स विधिः क्व शरासनं क्व च विमुक्तिपथः ॥ ४४ ॥

अन्वयः—स द्विषतां वधेन विषयाभिरतिम् अभिलष्यति एतत् अविमृष्यं हि सः विधिः भववीतये न (भवति) शरासनं क्व विमुक्तिपथः च क्व ॥ ४४ ॥

44. It is certain that he seeks to enjoy worldly pleasures on the destruction of his foes for his way of practising penance (bearing bow, &c.) will not lead to absolution. Where indeed is the bow and where the path to absolution ? (they are inconsistent with each other).

पृथुधाम्नि तत्र परिबोधि च मा भवतीभिरन्यमुनिवद्विकृतिः ॥
स्वयशांसि विक्रमवतामवतां न वधूष्वघानि विमृषन्ति धियः ॥ ४५ ॥

अन्वयः—पृथुधाम्नि तत्र च अन्यमुनिवत् विकृतिः भवतीभिः मा परिबोधि (तथाहि) स्वयशांसि अवतां विक्रमवतां धियः वधूषु अघानि न विमृषन्ति ॥ ४५ ॥

45. You should not be afraid of any loss of temper in the case of this person of great prowess like other sages. For the minds of the valourous, who wish to maintain their good name, do not bear evil of females.

आशंसितापचितिचारु पुरः सुराणामादेशमित्यभिमुखं समवाप्य भर्तुः ॥
लेभे परां द्युतिममर्त्यवधूसमूहः संभावना ह्यधिकृतस्य तनोति तेजः ॥ ४६ ॥

अन्वयः—अमर्त्यवधूसमूहः सुराणां पुरः आशंसितापचितिचारु भर्तुः अभिमुखम् इति आदेशं समवाप्य परां धृतिं लेभे (तथा) हि अधिकृतस्य संभावना तेजः तनोति ॥ ४६ ॥

46. The celestial damsels delighted at the much cherished honour (gained) in the presence of Gods, looked extremely beautiful on thus obtaining order from Lord (Indra). For honour done to servants (by their master) naturally enhances their lustre.

प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः
स्तनभरनमिताङ्गीरङ्गनाः प्रीतिभाजः ॥
अचलनलिनलक्ष्मीहारि नालं बभूव
स्तिमितममरभर्तुर्द्रष्टुमक्ष्णां सहस्रम् ॥ ४७ ॥

अन्वयः—अथ प्रणतिं विधाय सद्मनः प्रस्थिताः स्तनभरनमिताङ्गीः ताः प्रीतिभाजः अंगनाः अचलनलिन लक्ष्मीहारि स्तिमितम् अमरभर्तुः अक्ष्णां सहस्रं द्रष्टुम् अलं न बभूव ॥ ४७ ॥

47. Indra's thousand eyes, steady with wonder, and attractive like the motionless lotuses could not gaze at the damsels as after salutation they left the palace pleased with the honour bent, with the burden of their (plump) breasts.

सप्तमः सर्गः

—o—

श्रीमद्भिः सरथगजैः सुराङ्गनानां गुप्तानामथ सचिवैस्त्रिलोकभर्तुः ॥
संमूर्च्छन्नलघुविमानरन्ध्रभिन्नः प्रस्थानं समभिदधे मृदङ्गनादः ॥ १ ॥

अन्वयः—अथ श्रीमद्भिः सरथगजैः त्रिलोकभर्तुः सचिवैः गुप्तानां सुरांगनानां प्रस्थानम् अलघुविमानरन्ध्रभिन्नः संमूर्च्छन् मृदङ्गनादः समभिदधे ॥ १ ॥

1. The sound of drums, entering through apertures of great palaces, and (hence) pervading all places (became more intense) proclaimed (to the denizens of Amraoti) the departure of celestial damsels under the protection of the friends of Indra (i. e. Gandharwâs) who had been supplied with chariots and horses and who looked beautiful (on account of rich dresses and ornaments).

सोत्कण्ठैरमरगणैरनुप्रकीर्णान्निर्याय ज्वलितरुचः पुरान्मघोनः ॥
रामाणामुपरि विवस्वतः स्थितानां नासेदे चरितगुणत्वमातपत्रैः ॥ २ ॥

अन्वयः—सोत्कण्ठैः अमरगणैः अनुप्रकीर्णात् ज्वलितरुचः मघोनः पुरात् निर्याय विवस्वतः उपरिस्थितानां रामाणाम् आतपत्रैः चरितगुणत्वं न आसेदे ॥ २ ॥

2. As the damsels, on leaving the bright metropolis of Indra crowded with numbers of Gods anxious (to see them off), traversed the region above the sun, their umbrellas proved of no use to them (they being far above the sun's rays).

धूतानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानाम् ॥
आनिन्ये मदजनितां श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः ॥ ३ ॥

अन्वयः—अभिमुखपातिभिः समीरैः धूतानाम् आयासात् अविशदलोचनोत्पलानां वधूनाम् उष्णांशुद्युतिजनितः कपोलरागः मदजनितां श्रियम् आनिन्ये ॥ ३ ॥

3. The redness produced by the heat of the Sun on the cheeks of the young damsels who trembled at the unfavourable breezes and whose lotus-like eyes became less lustrous on account of the fatigue (of the journey) imparted to them the beauty natural to the ardent passion of love.

तिष्ठद्भिः कथमपि देवतानुभावादाकृष्टैः प्रजविभिरायतं तुरङ्गैः ॥
नेमीनामसति विवर्तने रथौघैरासेदे वियति विमानवत्प्रवृत्तिः ॥ ४ ॥

अन्वयः—कथमपि देवतानुभावात् तिष्ठद्भिः प्रजविभिः तुरंगैः आयतम् आकृष्टैः रथौघैः नभसि नेमीनां विवर्तने असति विमानवत् प्रवृत्तिः आसेदे ॥ ४ ॥

4. The numerous chariots, well sustained by the prowess of the deities and drawn far away by speedy horses, assumed in the sky the motion (appearance) of a baloon, there being no revolutions of their outer reins.

कान्तानां कृतपुलकः स्तनाङ्गरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभः ॥
संपेदे श्रमसलिलोद्गमो विभूषा रम्याणां विकृतिरपि श्रियं तनोति ॥ ५ ॥

अन्वयः—कान्तानां स्तनाङ्गरागे कृतपुलकः च्युततिलकेषु वक्त्रेषु मौक्तिकाभः श्रमसलिलोद्गमः विभूषा संपेदे रम्याणां विकृतिः अपि श्रियं तनोति ॥ ५ ॥

5. The drops of perspiration caused by fatigue, horripilating their anointed breasts and looking bright like pearls on their faces full of red saffron which trickled down (from their foreheads) adorned them indeed ! Even deviations (chance alterations) in beautious forms embellish them.

राजद्भिः पथि मरुतामभिन्नरूपैरुल्कार्चिःस्फुटगतिभिर्ध्वजांशुकानां ॥
तेजोभिः कनकनिकाषराजिगौरैरायामः क्रियत इव स्म सातिरेकः ॥ ६ ॥

अन्वयः—मरुतां पथि राजद्भिः अभिन्नरूपैः (अत एव) उल्कार्चिःस्फुटगतिभिः कनकनिकाषराजिगौरैः ध्वजांशुकानां तेजोभिः आयामः सातिशयः क्रियते स्म इव ॥ ६ ॥

6. The flags seemed to grow excessively long or extended on account of their lustres, glittering in the sky, all being blended together and (hence) resembling a blazing torch and looking yellowish like the scratches of gold.

रामाणामवजितमाल्यसौकुमार्ये संप्राप्ते वपुषि सहत्वमातपस्य ॥
गन्धर्वैरधिगतविस्मयैः प्रतीये कल्याणी विधिषु विचित्रता विधातुः ॥ ७ ॥

अन्वयः—अवजितमाल्यसौकुमार्ये रामाणां वपुषि आतपस्य सहत्वं संप्राप्ते (सति) अधिगतविस्मयैः गन्धर्वैः विधातुः विधिषु कल्याणी विचित्रता प्रतीये ॥ ७ ॥

7. When the limbs (bodies) of the damsels excelling garlands in delicacy were found to possess the capacity of bearing heat, the Gandharwas smit with wonder, marked the benevolent diversity (adaptability) in his creations (put in) by the creator.

सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः ॥
सादृश्यं ययुररुणांशुरागभिन्नैर्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥ ८ ॥

अन्वयः—सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिः मदं क्षरन्तः त्रिदशगजाः अरुणांशुरागभिन्नैः वर्षद्भिः स्फुरितशतह्रदैः पयोदैः सादृश्यं ययुः ॥ ८ ॥

8. The elephants of God, with golden girths, decorated with marks of Sindûr and streaming forth rut through seven arteries, resembled showering clouds blended with the rays of the sun and possessed of flashes of lightning.

अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यन्तादहिममयूखमण्डलस्य ॥
आशानामुपरिचितामिवैकवेणीं रम्योर्मिं त्रिदशनदीं ययुर्बलानि ॥ ९ ॥

अन्वयः—बलानि अत्यर्थं दुरुपसदात् अहिममयूखमंडलस्य पर्यन्तात् दूरम् उपेत्य आशानाम् उपरिचिताम् एकवेणीम् इव (स्थितां) रम्योर्मिं त्रिदशनदीं ययुः ॥ ९ ॥

9. The train of the damsels, receding far away from the regions of the hot-rayed luminary extremely unbearable (on account of heat), arrived at the river Mandakini, which had beautiful ripples and which was, above all the quarters, arranged like a braid of hair.

आमत्तभ्रमरकुलाकुलानि धुन्वन्नुद्धूतग्रथितरजांसि पङ्कजानि ॥
कान्तानां गगननदीतरङ्गशीतः संतापं विरमयति स्म मातरिश्वा ॥ १० ॥

अन्वयः—आमत्तभ्रमरकुलाकुलानि उद्धूतग्रथितरजांसि पङ्कजानि धुन्वन् गगननदीतरङ्गशीतः मातरिश्वा कान्तानां संतापं विरमयति स्म ॥ १० ॥

10. The sky-breezes, cool by (contact with) the ripples of the Mandâkini and (fragrant by) shaking the lotuses from which the intermingled pollen was being wafted and which were full of the collections of intoxicated bees, beguiled the fatigue of the damsels.

संभिन्नैरिभतुरगावगाहनेन प्राप्योर्वीरनुपदवीं विमानपङ्क्तीः ॥
तत्पूर्वं प्रतिविदधे सुरापगाया वप्रान्तस्खलितविवर्तनं पयोभिः ॥ ११ ॥

अन्वयः—इभतुरगावगाहनेन संभिन्नैः सुरापगायाः पयोभिः पदवीम् अनु उर्वीः विमानपङ्क्तीः प्राप्य तत्पूर्वं वप्रान्तस्खलितविवर्तनं प्रतिविदधे ॥ ११ ॥

11. The waters of the heavenly river, agitated by the plunges of elephants and horses reached and dashed against the long lines of baloons of the damsels in the sky and being obstructed by these bank-lines (baloons) rolled back for the first time (the river having no banks).

क्रान्तानां ग्रहचरितात्पथो रथानामक्षाग्रक्षतसुरवेश्मवेदिकानाम् ॥
निःसङ्गं प्रधिभिरुपाददे विवृत्तिः संपीडक्षुभितजलेषु तोयदेषु ॥ १२ ॥

अन्वयः—ग्रहचारितात् पथः क्रान्तानाम् अक्षाग्रक्षतसुरवेश्मवेदिकानां रथानां प्रधिभिः संपीडक्षुभितजलेषु तोयदेषु निःसङ्गं विवृत्तिः उपाददे ॥ १२ ॥

12. The chariots, issuing from the path traversed by planets (such as the sun, &c.) demolishing by the ends of their axles the altars (ओटा) in front of the houses of Gods, ran unobstructed through clouds agitating the waters within by their Peripheries.

तप्तानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरन्तः ॥
युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥ १३ ॥

अन्वयः—विषाणभिन्नाः (अत एव) क्षरन्तः घनाः तप्तानां सुरकरिणां प्रह्लादम् उपदधिरे, परोपकारे युक्तानां महतां रुजत्सु अपि कल्याणी खलु प्रवृत्तिः भवति ॥ १३ ॥

13. The clouds broken by the tusks of the elephants of Gods, began to ooze and delighted them, that were distressed by excessive heat. Indeed the great, ever engaged in obliging others do good even to those, who do them harm.

संवाता मुहुरनिलेन नीयमाने दिव्यस्त्रीजघनवरांशुके विवृत्तिम् ॥
पर्यस्यत्पृथुमणिमेखलांशुजालं संजज्ञे युतकमिवान्तरीयमूर्वोः ॥ १४ ॥

अन्वयः—संवाता अनिलेन दिव्यस्त्रीजघनवरांशुके विवृत्तिं मुहुः नीयमाने (सति) पर्यस्यत्पृथुमणिमेखलांशुजालम् ऊर्वोः युतकम् इव अंतरीयं संजज्ञे ॥ १४ ॥

14. When the wind blowing freely, now and then removed (like a lover) the rich garments on the hips of the celestial ladies, the spreading mass of rays from their girdles studded with big jewels spreading around, served the purpose of an under-garment forming as it were a short petticoat for the thighs.

प्रत्यार्द्रीकृततिलकास्तुषारपातैः प्रह्लादं शमितपरिश्रमा दिशन्तः ॥
कान्तानां बहुमतिमाययुः पयोदा नाल्पीयान्बहु सुकृतं हिनस्ति दोषः ॥ १५ ॥

अन्वयः—तुषारपातैः प्रत्यार्द्रीकृततिलकाः (अपि) शमितपरिश्रमा प्रह्लादं दिशन्तः पयोदाः कान्तानां बहुमतम् आययुः तथाहि अल्पीयान् दोषः बहु सुकृतं न हिनस्ति ॥ १५ ॥

15. The clouds, exhilarating the damsels by beguiling their fatigue, were highly thought of by them, though they had moistened the Tilak mark on their forehead by the diffusion of sprays. For, a petty flaw does not obscure great obligations.

यातस्य ग्रथिततरङ्गसैकताभे विच्छेदं विपयसि वारिवाहजाले ॥
आतेनुस्त्रिदशवधूजनाङ्गभाजां संधानं सुरधनुषः प्रभा मणीनाम् ॥ १६ ॥

अन्वयः—ग्रथिततरंगसैकताभे विपयसि वारिवाहजाले विच्छेदं यातस्य सुरधनुषः त्रिदशवधूजनांगभाजां मणीनां प्रभाः संधानम् आतेनुः ॥ १६ ॥

16. The lustre of jewels put on by celestial damsels filled the intervals (open spaces) on the rainbow broken (at some places) on waterless clouds, white like sandy banks, and with waves continuously rushing against them.

संसिद्धाविति करणीयसंनिबद्धैरालापैः पिपतिषतां विलङ्घ्य वीथीम् ॥
आसेदे दशशतलोचनध्वजिन्या जीमूतैरपिहितसानुरिन्द्रकीलः ॥ १७ ॥

अन्वयः—संसिद्धौ इति करणीयसंनिबद्धैः आलापैः (उपलक्षितया) दशशतलोचनध्वजिन्या पिपतिषतां वीथीं विलंङ्घ्य जीमूतैः अपहितसानुः इंद्रकील आसेदे ॥ १७ ॥

17. The forces (damsels sent by) of Indra, thus discoursing as to what means should be adopted for the accomplishment of their object, crossed the path of (the flight of) birds and came up to the mountain Indrakeel, peaks of which were enveloped in clouds.

आकीर्णा मुखनलिनैर्विलासिनीनामुद्धतस्फुटविशदातपत्रफेना ॥
सा तूर्यध्वनितगभीरमापतन्ती भूभर्तुः शिरसि नभोनदीव रेजे ॥ १८ ॥

अन्वयः—विलासिनीनां मुखनलिनैः आकीर्णा उद्धूतस्फुटविशदातपत्रफेना तूर्यध्वनितगभीरं भूभर्तुः शिरसि आपतन्ती सा नभोनदी इव रेजे ॥ १८ ॥

18. The army of the celestial damsels, with their lotus like faces and with white umbrellas held up by them, appeared, while descending on the top of Indrakeel, the drums making a sound, like the heavenly Mandakini (descending from the heavens).

सेतुत्वं दधति पयोमुचां विताने संरम्भादभिपततो रथाञ्जवेन ॥
आनिन्युर्नियमितरश्मिभुग्नघोणाः कृच्छ्रेण क्षितिमवनामिनस्तुरङ्गाः ॥ १९ ॥

अन्वयः—पयोमुचां विताने सेतुत्वं दधति सति संरम्भात् जवेन अभिपततः रथान् नियमितरश्मिभुग्नघोणाः अवनामिनः तुरंगाः कृच्छ्रेण क्षितिम् आनिन्युः ॥ १९ ॥

19. The horses (saddled to their chariots) with their fore-parts bent down (in descending) and with their nostrils contracted on account of reins tightly held, brought, after great efforts to the earth (mountain), the chariots rattling and running fast (after them) the canopy of clouds, serving as it were the purpose of a bridge.

माहेन्द्रं नगमभितः करेणुवर्याः पर्यन्तास्थितजलदा दिवः पतन्तः ॥
सादृश्यं निलयननिष्प्रकम्पपक्षैराजग्मुर्जलनिधिशायिभिर्नगेन्द्रैः ॥ २० ॥

अन्वयः—माहेन्द्रं नगम् अभितः दिवः पतन्तः पर्यन्तास्थितजलदाः करेणुवर्याः निलयननिष्प्रकम्पपक्षैः जलनिधिशायिभिः नगेन्द्रैः सादृश्यम् आजग्मुः ॥ २० ॥

20. The noble elephants surrounded by clouds on all sides while descending from the sky on the mountain Indrakeel appeared like great mountains (Mainâka and others) reposing in the ocean, with steady wings.

उत्सङ्गे समविषमे समं महाद्रेः क्रान्तानां वियदभिपातलाघवेन ॥
आमूलादुपनदि सैकतेषु लेभे सामग्री खुरपदवी तुरङ्गमाणाम् ॥ २१ ॥

अन्वयः—महाद्रेः उत्संगे समविषमे वियदभिपातलाघवेन समं क्रान्तानां तुरंगमाणां खुरपदवी उपनदि सैकतेषु आमूलात् सामग्री लेभे ॥ २१ ॥

21. Foot-marks of the horses, moving evenly on account of their skill in running through the sky on the ups and downs on the peaks of the Indrakeel, were all along clearly discernible on sands of the river near its banks.

सध्वानं निपतितनिर्झरासु मन्द्रैः संमूर्च्छन्प्रतिनिनदैरधित्यकासु ॥
उद्ग्रीवैर्घनरवशङ्कया मयूरैः सोत्कण्ठं ध्वनिरुपशुश्रुवे रथानाम् ॥ २२ ॥

अन्वयः—सध्वानं निपतितनिर्झरासु अधित्यकासु मन्द्रैः प्रतिनिनदैः संमूर्च्छन् रथानां ध्वनिः घनरवशंकया उद्ग्रीवैः मयूरैः सोत्कण्ठम् उपशुश्रुवे ॥ २२ ॥

22. The sound of rattling chariots, intensified by rumbling echoes on table-lands from which springs fall down producing great noise, was eagerly heard by peacocks with upturned necks mistaking them for the thundering of clouds.

संभिन्नामविरलपातिभिर्मयूखैर्नीलानां भृशमुपमेखलं मणीनाम् ॥
विच्छिन्नामिव वनिता नभोन्तराले वप्राम्भःस्रुतिमवलोकयांबभूवुः॥ २३ ॥

अन्वयः—अविरलपातिभिः उपमेखलं नीलानां मणीनां मयूखैः भृशं संभिन्नाम् (अतएव) नभोन्तराले विच्छिन्नाम् इव वप्रांभःस्रुतिं वनिताः अवलोकयांबभूवुः ॥ २३ ॥

23. The nymphs saw the flood of water running down the precipices wholly blended on the slopes, with the thick rays of emeralds and (hence) looking as if it were broken at intervals.

आसन्नद्विपपदवीमदानिलाय क्रुध्यन्तो धियमवमत्य धूर्गतानाम् ॥
सव्याजं निजकरिणीभिरात्तचित्ताः प्रस्थानं सुरकरिणः कथंचिदीषुः ॥ २४ ॥

अन्वयः—धूर्गतानां धियम् अवमत्य आसन्नद्विपपदवीमदानिलाय क्रुध्यन्तः सव्याजं निजकरिणीभिः आत्तचित्ताः सुरकरिणः प्रस्थानं कथंचित् ईषुः ॥ २४ ॥

24. The elephants of Gods, in spite of the attempts of conductors to curb them, got infuriated at the scent of rut coming from the path of wild elephants, but being artfully captivated by their wives set off with great difficulty.

नीरन्ध्रं पथिषु रजो रथाङ्गनुन्नं पर्यस्यन्नवसलिलारुणं वहन्ती ॥
आतेने वनगहनानि वाहिनी सा घर्मान्तक्षुभितजलेव जन्हुकन्या ॥ २५ ॥

अन्वयः—नीरन्ध्रं पथिषु रथाङ्गनुन्नं पर्यस्यन्नवसलिलारुणं रजः वहन्ती सा वाहिनी घर्मान्तक्षुभितजला जह्नुकन्या इव वनगहनानि आतेने ॥ २५ ।

25. The army of the nymphs covered with thick dust, reddish-brown like the muddy floods in the rainy season and raised up on their way by wheels of chariots, entered like the Ganges, whose waters are agitated at the commencement of the monsoon, artificial gardens and old rugged forests.

संभोगक्षमगहनामथोपगङ्गं बिभ्राणां ज्वलितमणीनि सैकतानि ॥
अध्यूषुश्च्युतकुसुमाचितां सहाया वृत्रारेरविरलशाद्वलां धरित्रीम् ॥ २६ ॥

अन्वयः—अथ वृत्रारेः सहायाः उपगङ्गं संभोगक्षमगहनां ज्वलितमणीनि सैकतानि बिभ्राणां च्युतकुसुमचिताम् अविरलशाद्वलां धरित्रीम् अध्यूषुः ॥ २६ ॥

26. The celestial musicians, the friends of Indra, halted in a tract of country on the bank of the Ganges, which had enjoyable forests, which was full of beaches containing bright jewels, which was covered with flowers dropped of themselves and which had thickly-grown meadows (green-grassplots).

भूभर्तुः समधिकमादधे तदोर्व्याः श्रीमत्तां हरिसखवाहिनीनिवेशः ॥
संसक्तौ किमसुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः ॥ २७ ॥

अन्वयः—तदा हरिसखवाहिनीनिवेशः भूभर्तुः उर्व्याः समधिकं श्रीमत्ताम् आदधे (तथाहि) महोदयानां संसक्तौ किम् असुलभम् (यतः) यदृच्छया योगः अपि उच्छ्रायं नयति ॥ २७ ॥

27. The camp of the army of Gandharwas imparted additional beauty to the spot (mentioned above) on the mountain Indrakeel. Indeed what is unttainable in the company of the magnanimous ? Even their chance-meeting leads to greatness.

सामोदाः कुसुमतरुश्रियोविविक्ताः संपत्तिः किसलयशालिनी लतानां ॥
साफल्यं ययुरमराङ्गनोपभुक्ताः सा लक्ष्मीरुपकुरुते यया परेषाम् ॥ २८ ॥

अन्वयः—सामोदाः कुसुमतरुश्रियः विविक्ताः लतानां किसलयशालिनी संपत्तिः (एताः) अमराङ्गनोपभुक्ताः (सत्यः) साफल्यं ययुः (तथाहि) यया परेषाम् उपकुरुते सा लक्ष्मीः ॥ २८ ॥

28. The brightness of fragrant flower-trees, the retired spots, the wealth of creepers in sprouts, all these being enjoyed by celestial damsels became fruitful. Really that is beauty (Laxmi) by which others are obliged.

क्लान्तोऽपि त्रिदशवधूजनः पुरस्ताल्लीनाहिश्वसितविलोलपल्लवानाम् ॥
सेव्यानां हतविनयैरिवावृतानां संपर्कं परिहरति स्म चन्दनानाम् ॥ २९ ॥

अन्वयः—क्लान्तः अपि त्रिदशवधूजनः पुरस्तात् लीनाहिश्वसितविलोलपल्लवानां चंदनानां संपर्कं हतविनयैः आवृतानां सेव्यानां (संपर्कम्) इव परिहरति स्म ॥ २९ ॥

29. The celestial damsels, though fatigued, shunned to take rest under the sandal trees, whose leaves moved to and fro by the hisses of serpents that had girt them, as (people avoid the company) of masters surrounded by impertinent fools.

उत्सृष्टध्वजकुथकङ्कटा धरित्रीमानीता विदितनयैः श्रमं विनेतुम् ॥
आक्षिप्तद्रुमगहना युगान्तवातैः पर्यस्ता गिरय इव द्विपा विरेजुः ॥ ३० ॥

अन्वयः—उत्सृष्टध्वजकुथकङ्कटाः विदितनयैः श्रमं विनेतुं धरित्रीम् आनीताः द्विपाः युगांतवातैः आक्षिप्तद्रुमगहनाः पर्यस्ताः गिरयः इव विरेजुः ॥ ३० ॥

30. The elephants, stripped of (freed from) the flags, the housings, and the armours, and (then) made to rest on the ground by expert drivers to allow them time to beguile their fatigue, appeared like mountains, cast disordely on all sides with their groves of trees uprooted by tempestuous winds at the time of universal destruction.

प्रस्थानश्रमजनितां विहाय निद्रामामुक्ते गजपतिना सदानपङ्के ॥
शय्यान्ते कुलमलिनां क्षणं विलीनं संरम्भच्युतमिव शृङ्खलं चकाशे ॥ ३१ ॥

अन्वयः—गजपतिना प्रस्थानश्रमजनितां निद्रां विहाय आमुक्ते (अतएव) सदानपङ्के शय्यान्ते क्षणं विलीनम् अलिनां कुलं संरम्भच्युतं शृंखलम् इव चकाशे ॥ ३१ ॥

31. When the Lord of elephants, awake from the sleep induced by the fatigue of the journey, left his sleeping ground drenched in the mud of rut, the crowd of bees, clung to the place, appeared like the chain (tied to his feet) dropped down in hurry.

आयस्तः सुरसरिदोघरुद्धवर्त्मा संप्राप्तुं वनगजदानगन्धि रोधः ॥
मूर्धानं निहितशिताङ्कुशं विधुन्वन्यन्तारं न विगणयांचकार नागः ॥ ३२ ॥

अन्वयः—वनगजदानगंधि रोधः संप्राप्तं आयस्तः सुरसरिदोघरुद्धवर्त्मा नागः निहितशितांकुशं मूर्धानं विधुन्वन् यंतारं न विगणयांचकार ॥ ३२ ॥

32. The elephant, anxious to obtain the (other) bank full of the odour of the rut of a wild elephant, (but) obstructed in his way by the stream of the Ganges, shook (in anger) his trunk struck with the sharp goad and (thus) showed his contempt for (the endeavours of) the conductor (to curb him).

आरोढुः समवनतस्य पीतशेषे साशङ्कं पयसि समीरिते करेण ॥
संमार्जन्नरुणमदस्रुती कपोलौ सस्यन्दे मद इव शीकरः करेणोः ॥ ३३ ॥

अन्वयः—समवनतस्य करेणोः करेण पीतशेषे पयसि आरोढुः साशङ्कं (सति) शीकरः अरुणमदस्रुती कपोलौ संमार्जन् मद इव सस्यन्दे ॥ ३३ ॥

33. When the water in the trunk, that remained after the quenching of his thirst was thrown all round by the elephant, bent down (for drinking) and careful not to wet the conductor, the sprays, washing his tusks wet with the flow of reddish rut, trickled forth like flowing rut.

आघ्राय क्षणमतितृष्यतापि रोषादुत्तीरं निहितविवृत्तलोचनेन ॥
संपृक्तं वनकरिणां मदाम्बुसेकैर्नाचेमे हिममपि वारि वारणेन ॥ ३४ ॥

अन्वयः—अतितृष्यतापि क्षणम् आघ्राय रोषात् उत्तीरं निहितविवृत्तलोचनेन वारणेन हिमम् अपि वनकरिणां मदांबुसेकैः संपृक्तं वारि न आचेमे ॥ ३४ ॥

34. One of the elephants, though extremely thirsty, on smelling for a moment the water mixed with the drops of rut fallen from the tusks of wild elephants, angrily turned his rolling eyes to the other bank (with a view to see forest-elephants) and did not drink it though it was cold.

प्रश्च्योतन्मदसुरभीणि निम्नगायाः क्रीडन्तो गजपतयः पयांसि कृत्वा ॥
किंजल्कव्यवहितताम्रदानलेखैरुत्तेरुः सरसिजगन्धिभिः कपोलैः ॥ ३५ ॥

अन्वयः— क्रीडन्तः गजपतयः निम्नगायाः पयांसि प्रश्च्योतन्मदसुरभीणि कृत्वा किञ्जल्कव्यवहितताम्रदानलेखैः (अत एव) सरसिजगंधिभिः कपोलैः (उपलक्षिताः सन्तः) उत्तेरुः ॥ ३५ ॥

35. The elephants, sporting in the water, making it fragrant by their overflowing rut and with their temples, possessed of the fragrance of lotuses, the red lines of rut being screened by lotus plants, crossed the river (came out of the waters).

आकीर्णं बलरजसा घनारुणेन प्रक्षोभैः सपदि तरङ्गितं तटेषु ॥
मातङ्गोन्मथितसरोजरेणुपिङ्गं माञ्जिष्ठं वसनमिवाम्बु निर्बभासे ॥ ३६ ॥

अन्वयः—घनारुणेन बलरजसा आकीर्णं सपदि प्रक्षोभैः तटेषु तरंगितं (तथा) मातङ्गोन्मथितसरोजरेणुपिङ्गम् अंबु मांजिष्ठं वसनम् इव निर्बभासे ॥ ३६ ॥

36. The water of the heavenly river, covered with the extremely red dust (raised) by the army of nymphs, quickly running in ripples towards the banks being agitated (by elephants) and rendered tawny by the pollen of lotuses plucked by elephants, shone like a cloth dyed with madder.

श्रीमद्भिर्नियमितकंधरापरान्तैः संसक्तैरगुरुवनेषु साङ्गहारम् ॥
संप्रापे निसृतमदाम्बुभिर्गजेन्द्रैः प्रस्यन्दिप्रचलितगण्डशैलशोभा ॥ ३७ ॥

अन्वयः—श्रीमद्भिः नियमितकंधरापरान्तैः अगुरुवनेषु साङ्गहारं संसक्तैः निसृतमदांबुभिः गजेन्द्रैः प्रस्यंदिप्रचलितगण्डशैलशोभा संप्रापे ॥ ३७ ॥

37. The lordly elephants, that contracted their necks and the ends of their hinder legs, that moved about in the forest of sandal trees and made (attractive) movements of their limbs, that had the rut of their temples flowing down, and that looked very majestic, assumed the beauty of huge rocks thrown down from their positions, and trickling forth water.

निःशेषं प्रशमितरेणु वारणानां स्रोतोभिर्मदजलमुज्झतामजस्रम् ॥
आमोदं व्यवहितभूरिपुष्पगन्धो भिन्नैलासुरभिमुवाह गन्धवाहः ॥ ३८ ॥

अन्वय;,—गंधवाहः निःशेषं प्रशमितरेणु मदजलं स्रोतोभिः अजस्रम् उज्झतां वारणानां व्यवहितभूरिपुष्पगंधः भिन्नैलासुरभिम् आमोदम् उवाह ॥ ३८ ॥

38. The breezes, having slighted the copions fragrance of flowers, wafted the perfume agreeable like that of the cardamom-creeper, of the rut of elephants that incessantly flowed through their seven arteries, and that altogether settled down the dust.

सादृश्यं दधति गभीरमेघघोषैरुन्निद्रक्षुभितमृगाधिपश्रुतानि ॥
आतेनुश्चकितचकोरनीलकण्ठान्कच्छान्तानमरमहेभबृंहितानि ॥ ३९ ॥

अन्वयः—गभीरमेघघोषैः सादृश्यं दधति उन्निद्रक्षुभितमृगाधिपश्रुतानि अमरमहेभबृंहितानि कच्छान्तान् चकितचकोरनीलकण्ठान् आतेनुः ॥ ३९ ॥

39. The roaring of the elephants of Gods, resembling the deep thundering of clouds, and heard by lions awake and furious at the sound, made the startled partridges and peacocks in the morasses mistake it for thundering.

शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधूजनसेवितानाम् ॥
जज्ञे निवेशनविभागपरिष्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानाम् ॥४०॥

अन्वयः—शाखावसक्तकमनीयपरिच्छदानाम् अध्वश्रमातुरवधूजनसेवितानां निवेशनविभागपरिष्कृतानां वनपादपानां पुरोपवनजा लक्ष्मीः जज्ञे ॥ ४० ॥

40. The forest-trees from the branches of which rich clothes were suspended, which were resorted to by the celestial damsels fatigued by long journey and which were decorated with separate parts of camps, possessed the beauty of an artificial garden erected in the precincts of a city.

अष्टमः सर्गः

—o—

अथ स्वमायाकृतमन्दिरोज्ज्वलं ज्वलन्मणि व्योमसदां सनातनम् ।
सुराङ्गना गोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥

अन्वयः—अथ सुराङ्गनाः स्वमायाकृतमन्दिरोज्ज्वलं ज्वलन्मणि व्योमसदां सनातनं गोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥

1. The celestial damsels, from a desire to sport in forests, abandoned the ancient capital of the Gandharwas, splendid with mansions erected at will, abounding in bright jewels and possessed of arched gateways of various colours like the rainbow.

यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः ।
वनं विशन्त्यो वनजायतेक्षणाः क्षणद्युतीनां दधुरेकरूपताम् ॥ २ ॥

अन्वयः—यथायथं नभश्चरैः सहिताः प्रभाभिः उद्भासितशैलवीरुधः ताः वनजायतेक्षणाः वनं विशन्त्यः क्षणद्युतीनाम् एकरूपतां दधुः ॥ २ ॥

2. The lotus-eyed damsels when entering the forest, accompanied by their respective lovers the Gandharwas, brightening the creepers on the mountain by their lustre, flashed forth like a lightning.

निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तनिर्ह्रादिविभूषणारवः ।
नितम्बिनीनां भृशमादधे धृतिं नभःप्रयाणादवनौ परिक्रमः ॥ ३ ॥

अन्वयः—निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तनिर्ह्रादिविभूषणारवः अवनौ परिक्रमः नितम्बिनीनां नभःप्रयाणात् भृशं धृतिम् आदधे ॥ ३ ॥

3. The pleasure-walk on the mountain which beguiled the fatigue of their round thighs and breasts and which made the anklets and other ornaments tinkle, gave the broad-hipped damsels more pleasure than their descent from the sky.

घनानि कामं कुसुमानि बिभ्रतः करप्रचेयान्यपहाय शाखिनः ।
पुरोऽभिसस्रे सुरसुन्दरीजनैर्यथोत्तरेच्छा हि गुणेषु कामिनः ॥ ४ ॥

अन्वयः—घनानि करप्रचेयानि कामं कुसुमानि बिभ्रतः शाखिनः अपहाय सुरसुन्दरीजनैः पुरः अभिसस्रे हि कामिनः गुणेषु यथोत्तरेच्छाः ॥ ४ ॥

4. The heavenly nymphs passed on, overlooking the trees bearing numerous flowers that could be easily plucked by the hand. Verily the cupidity of those who are after sensual pleasures incessantly increases towards the objects of enjoyment.

तनूरलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमञ्जरीभृतः ।
विलासिनीबाहुलता वनालयो विलेपनामोदहृताः सिषेविरे ॥ ५ ॥

अन्वयः—विलेपनामोदहृताः वनालयः तनूः अलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमञ्जरीभृतः विलासिनीबाहुलताः सिषेविरे ॥ ५ ॥

5. The forest-bees, attracted by the fragrance of ointments, resorted to the creepers in the form of the slender arms of the amorous nymphs which had sprouts in the form of the hands red with the Alakta and which had flower-stalks in the form of the collections of the tremulous rays of their nails.

निपीयमानस्तबका शिलीमुखैरशोकयष्टिश्चलबालपल्लवा ॥
विडम्बयन्ती ददृशे वधूजनैरमन्ददष्टोष्ठकरावधूननम् ॥ ६ ॥

अन्वयः—शिलीमुखैः निपीयमानस्तबका चलबालपल्लवा (अत एव) अमन्ददष्टौष्ठकरावधूननम् विडम्बयन्ती अशोकयष्टिः वधूजनैः ददृशे ॥ ६ ॥

6. The damsels observed a branch of Ashoka tree, (the juice in) whose bunch of flowers was being licked up by bees, whose tender sprouts were tremulous and (hence) which resembled the movements of the hands (of a young lady), her lower lips being voraciously bitten (by her lover).

करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मा परिश्रमम् ॥
उपेयुषी कल्पलताभिशङ्कया कथं न्वितस्त्रस्यति षट्पदावलिः ॥ ७ ॥

अन्वयः—(अथकश्चिन्मधुकराक्रान्तां कांचिदाह) (हे) मानिनि ! नवपल्लवाकृती करौ धुनाना वृथा परिश्रमं मा कृथाः कल्पलताभिशङ्कया उपयुषी षट्पदावलिः कथं नु इतः त्रस्यति ॥ ७ ॥

7. (One youth addresses a lady pursued by bees) Do not O proud one ! tire yourself in vain by moving your hands that resemble tender sprouts (to drive off bees). How indeed should these bees that have approached you taking you for the all yielding tree, take a fright by these movements ?

जहीहि कोपं दयितोऽनुगम्यतां पुरानुशेते तव चञ्चलं मनः ॥
इति प्रियं कांचिदुपैतुमिच्छतीं पुरोऽनुनिन्ये निपुणः सखीजनः ॥ ८ ॥

अन्वयः—प्रियम् उपैतुम् इच्छतीं कांचित् निपुणः सखीजनः कोपं जहीहि दयितः अनुगम्यताम् (अन्यथा) चंचलं तव मनः पुरः अनुशेते इतिपुरा अनुनिन्ये ॥ ८ ॥

8. A certain female confidant, expert (in reading the minds of others) thus taught beforehand her friend, who herself longed to approach her lover " Give off anger, follow your lover, else your unsteady mind should afterwards repent ".

समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपङ्क्तिमेखलैः ॥
प्रतीरदेशैः सकलत्रचारुभिर्विभूषिताः कुञ्जसमुद्रयोषितः ॥ ९ ॥
विदूरपातेन भिदामुपेयुषश्च्युताः प्रवाहादभितः प्रसारिणः ॥
प्रियाङ्कशीताः शुचिमौक्तिकत्विषो वनप्रहासा इव वारिबिन्दवः ॥१० ॥
सखीजनं प्रेम गुरूकृतादरं निरीक्षमाणा इव नम्रमूर्तयः ॥
स्थिरद्विरेफाञ्जनशारितोदरैर्विसारिभिः पुष्पविलोचनैर्लताः ॥ ११ ॥
उपेयुषीणां बृहतीरधित्यका मनांसि जह्रुः सुरराजयोषिताम् ॥
कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्च चन्दनाः ॥ १२ ॥

अन्वयः—समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपंक्तिमेखलैः स्वकलत्रचारुभिः प्रतीरदेशैः विभूषिताः कुञ्जसमुद्रयोषितः विदूरपातेन भिदाम् उपेयुषः प्रवाहात् च्युताः (अत एव अभितः प्रसारिणः प्रियांकशीताः शुचिमौक्तिकत्विषः वनप्रहासाः इव (स्थिताः) वारिबिन्दवः स्थिरद्विरेफाञ्जनशारितोदरैः विसारिभिः पुष्पविलोचनैः प्रेमगुरूकृतादरं सखीजनं निरीक्षमाणाः इव (स्थिताः) नम्रमूर्तयः लताः मदारुणैः करिणां कपोलकाषैः उपाहितं शामरुचः चन्दनाः च बृहतीः अधित्यकाः उपेयुषीणां सुरराजयोषितां मनांसि जह्रुः ॥ ९ ॥ ॥ १० ॥ ११ ॥ १२ ॥

9-10-11-12. The forest-rivers (wives of the ocean) adorned with lofty banks, beautiful with the silken-garments in the form of the Kâsha flowers, possessed of girdles in the form of the rows of cackling swans; the sprays of water spreading all around as they became severed from the current separated by a mighty fall, cool like the thighs of beloveds and bright like pure diamonds, as if they were the loud laugh of the forest; the creepêrs, bent low, as if gazing at their friends-with a regard heightened by feelings of affection-with expanding eyes in the form of flowers whose interiors were speckled with collyrium in the form of steady bees; and the sandal trees, blackened by the scratches of the temples of elephants, reddish-brown with the flow of rut, all these captivated the minds of the celestial damsels as they approached the widening table-land.

स्वगोचरे सत्यपि चित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनाम् ॥
नभश्चराणामुपकर्तुमिच्छतां प्रियाणि चक्रुः प्रणयेन योषितः ॥ १३ ॥

अन्वयः—चित्तहारिणा शाखिनां प्रसवेन विलोभ्यमानाः योषितः स्वगोचरे (प्रसवे) सति अपि उपकर्तुम् इच्छतां नभश्चराणां प्रणयेन प्रियाणि चक्रुः ॥ १३ ॥

13. The damsels attracted by the charming flowers of trees, gratified, out of affection, the Gandharvas who desired to serve them (with flowers plucked by themselves) even though the flowers were within their reach.

प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता ॥
न किंचिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम् ॥ १४ ॥

अन्वयः—कुसुमानि प्रयच्छता दयितेन उच्चैः विपक्षगोत्रं लम्भिता मानिनी (अतएव) न किंचित् ऊचे (किन्तु) केवलं बाष्पाकुललोचना सती चरणेन भुवं लिलेख ॥ १४ ॥

14. A lady, loudly called by the name of her rival by her lover when presenting flowers did not utter a single syllable as she was proud, but she merely scratched the ground with her foot, her eyes being flooded with tears.

प्रियेऽपरा यच्छति वाचमुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया ॥
समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवम् ॥ १५ ॥

अन्वयः—वाचं यच्छति प्रिये निबद्धदृष्टिः (अतएव) उन्मुखी शिथिलाकुलोच्चया अपरा अंशुकं न समादधे, पुष्पेषु वृथा आहितं पाणिपल्लवं न विवेद ॥ १५ ॥

15. Another damsel, as her eyes were concentrated upon her lover, while he was conversing with her, did not fasten her (wearing) garment though its knot had become loose and disorderly; nor was she conscious of her hand vainly placed on flowers (for plucking them).

सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम् ॥
स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया ॥ १६ ॥

अन्वयः—आसक्तलतान्तभूषणं कुसुमावतंसकं सलीलं समासजन्त्या कान्तया कश्चित् स्तनोपपीडं नितंबिना घनेन जघनेन नुनुदे ॥ १६ ॥

16. A damsel, while sportively placing on her head the crest of flower beautified by the sprouts around it, enticed a certain lover by her broad well-sloped buttocks (hips) in a manner in which her breasts were pressed against (injured).

कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा ॥
बलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता ॥ १७ ॥
विलम्बमानाकुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया ॥
तरुप्रसूनान्यपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥ १८ ॥

अन्वयः—विलोलनीविना कलत्रभारेण, गलद्दुकूलस्तनशालिना उरसा, बलिव्यपायस्फुटरोमराजिना निरायतत्वात् ताम्यता उदरेण विलम्बमानाकुलकेशपाशया आविष्कृतबाहुमूलया कयाचित् तरुप्रसूनानि अपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥ १७ ॥ १८ ॥

17–18. A certain damsel, whose ornamented and untied hair were being shaken by breezes and who exposed to view the cavity of her arm–pit under the pretext of plucking flowers (from trees), captivated the heart of her lover, by her broad hips the knot of the garment on them being loosened, by her bosom beautified by her breasts the silken bodice on it having moved aside, and by her belly which was lean owing to its non–expansion and the line of hair on the abdomen of which was clearly visible owing to the absence of the three folds of skin.

व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः ॥
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥ १९ ॥

अन्वयः—उन्नतपीवरस्तनी काचित् लोचनतः पुष्पजं रजः मुखानिलैः व्यपोहितुम् अपारयन्तं किल प्रियम् उन्मना (सती अतएव) पयोधरेण उरसि जघान ॥ १९ ॥

19. A certain nymph of full plump breasts becoming impatient, struck with her breasts (closely embraced) her lover who (eager to touch her mouth and kiss her) pretended to be unable to blow off the pollen of flower from her eyes by his breath.

इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे ॥
विहाय निःसारतयेव भूरुहान्पदं वनश्रीर्वनितासु संदधे ॥ २० ॥

अन्वयः—यथाभिरामं कुसुमाग्रपल्लवे इमानि अमूनि इति शनैः अपवर्जिते (सति) वनश्रीः निःसारतया-इव भूरुहान् विहाय वनितासु पदं संदधे ॥ २० ॥

20. When the damsels had gradually finished gathering flowers and sprouts, pointing now to these and now to those according to their pleasure, the forest beauty left off the trees, as it were, owing to their worthlessness and went over to the damsels.

प्रवालभङ्गारुणपाणिपल्लवः परागपाण्डूकृतपीवरस्तनः ॥
महीरुहः पुष्पसुगन्धिराददे वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥ २१ ॥

अन्वयः—प्रवालभंगारुणपाणिपल्लवः परागपाण्डूकृतपीवरस्तनः पुष्पसुगंधिः अंगनाजनः महीरुहः वपुर्गुणोच्छ्रायम् इव आददे ॥ २१ ॥

10

21. The celestial damsels, whose delicate hands were reddened by plucking fresh shoots, whose plump breasts were made yellowish by pollen, and whose bodies became fragrant by flowers, seemed to borrow the excellence of their persons from the trees.

वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः ॥
समेऽपि यातुं चरणाननीश्वरान्मदादिव प्रस्खलतः पदे पदे ॥ २२ ॥
विसारिकाञ्चीमणिरश्मिलब्धया मनोहरोच्छ्रायनितम्बशोभया ॥
स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः ॥ २३ ॥
समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः ॥
दधन्ति मध्येषु वलीविभङ्गिषु स्तनातिभारादुदराणि नम्रताम् ॥ २४ ॥
समानकान्तीनि तुषारभूषणैः सरोरुहैरस्फुटपत्रपङ्क्तिभिः ॥
चितानि घर्माम्बुकणैः समन्ततो मुखान्यनुत्फुल्लविलोचनानि च ॥ २५ ॥
विनिर्यतीनां गुरुखेदमन्थरं सुराङ्गनानामनुसानुवर्त्मनः ॥
सविस्मयं रूपयतो नभश्चरान्विवेश तत्पूर्वमिवेक्षणादरः ॥ २६ ॥

अन्वयः—अनुसानुवर्त्मनः गुरुखेदमन्थरं विनिर्यतीनां सुराङ्गनानां वारणहस्तपीवरैः वरोरुभिः चिराय खिन्नान् नवपल्लवश्रियः (अत एव समे अपि यातुम् अनीश्वरान् (अत एव) मदात् इव पदेपदे प्रस्खलतः चरणान् ; विसारिकाञ्चीमणिरश्मिलब्धया मनोहरोच्छ्रायनितंबशोभया नवसैकतद्युतिं जित्वा स्थितानि श्रमातिरिक्तैः गौरवैः) उपलक्षितानि) जघनानि समुच्छ्वसत्पङ्कजकोशकोमलैः नाभिभिः उपनीवि उपाहितश्रीणि वलीविभङ्गिषु मध्येषु स्तनातिभारात् नम्रतां दधन्ति उदराणि ; च घर्माम्बुकणैः समन्ततः चितानि अनुत्फुल्लविलोचनानि (अत एव) तुषारभूषणैः अस्फुटपत्रपंक्तिभिः सरोरुहैः समानकान्तीनि मुखानि सविस्मयं रूपयतः नभश्चरान् तत्पूर्वम् इव ईक्षणादरः विवेश ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

22-23-24-25-26. Desire of intently gazing seemed for the first time to influence the minds of the Gandharwâs (1) who began amazingly to describe the feet that were fatigued on account of a long journey, that were beautiful like fresh sprouts, that stumbled at every step as if through intoxication, but that were really unable to move on level ground with their thighs–plump–like the trunks of elephants as they (the damsels) issued from the paths on the tops of the mountain slowly through excessive exhaustion; (2) the corpulent waists, all the heavier for fatigue, surpassing in beauty fair sandy banks by the charms of their attractively projecting hips produced by the rays of the jewels of their girdles; (3) the bellies, looking beautiful near the knots of their garments on account of their navels–tender–like the buds of opening lotuses, and bent under the pressure of breasts near the centre where there were no skin–folds; and (4) the faces, that had the eyes almost closed being on all sides covered with drops of perspiration and (hence) vying with lotuses adorned with sprays and full of the rows of leaves not fully opened.

अथ स्फुरन्मीनविधूतपङ्कजा विपङ्कतीरस्खलितोर्मिसंहतिः ॥
पयोऽवगाढुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥ २७ ॥

अन्वयः—अथ स्फुरन्मीनविधूतपङ्कजा विपङ्कतीरस्खलितोर्मिसंहतिः कलहंसनादिनी (अत एव) सुरापगा वधूः पयः अवगाढुं समाजुहाव इव ॥ २७ ॥

27. Then the heavenly river, the lotuses in which were being shaken by the gleaming fishes, the manifold ripples in which dashed against clean (enjoyable) banks, and which produced sounds resembling the cackling of swans, invited as it were, the damsels to bathe in.

प्रशान्तघर्माभिभवः शनैर्विवान्विलासिनीभ्यः परिमृष्टपङ्कजः ॥
ददौ भुजालम्बमिवात्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥ २८ ॥

अन्वयः—प्रशान्तघर्माभिभवः शनैः विवान् परिमृष्टपङ्कजः आत्तशीकरः तरङ्गमालान्तरगोचरः अनिलः विलासिनीभ्यः भुजालम्बं ददौ इव ॥ २८ ॥

28. The wind, removoing the trouble of heat, blowing gently, embracing lotuses (hence fragrant), loaded with sprays of water and staying in the intervals of the rows of waves, seemed to give the beautiful ladies the support of his hand.

गतैः सहावैः कलहंसविक्रमं कलत्रभारैः पुलिनं नितम्बिभिः ॥
मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः साम्यगुणान्निरासिरे ॥ २९ ॥

अन्वयः—सुरस्त्रियः सहावैः गतैः कलहंसविभ्रमं, नितम्बिभिः कलत्रभारैः पुलिनं, दीर्घलोचनैः मुखैः सरोजानि च साम्यगुणात् निरासिरे ॥ २९ ॥

29. On account of resemblance the celestial damsels defied the gait of swans by their graceful carriage (mode of walking), the beaches by their huge and expansive hips, and the lotuses by their faces having large eyes.

विभिन्नपर्यन्तगमीनपङ्क्तयः पुरो विगाढाः सखिभिर्मरुत्वतः ॥
कथंचिदापः सुरसुन्दरीजनैः सभीतिभिस्तत्प्रथमं प्रपेदिरे ॥ ३० ॥

अन्वयः—विभिन्नपर्यन्तगमीनपङ्क्तयः मरुत्वतः सखिभिः पुरः विगाढाः सभीतिभिः सुरसुंदरीजनैः तत्प्रथमं कथंचित् आपः प्रपेदिरे ॥ ३० ॥

30. The waters of the river, into which the friends of Indra (the Gandharwâs) had first entered (to see that there were no whirls or whales) and (hence) the shoal of fish in which was different by bent towards the bank, after great hesitations, entered in by the throng of the damsels.

विगाढमात्रे रमणीभिरम्भसि प्रयत्नसंवाहितपीवरोरुभिः ॥
विभिद्यमाना विससार सारसानुदस्य तीरेषु तरङ्गसंहतिः ॥ ३१ ॥

अन्वयः—प्रयत्नसंवाहितपीवरोरुभिः रमणीभिः अम्भसि विगाढमात्रे (सति) विभिद्यमाना तरंगसंहतिः तीरेषु सारसान् उदस्य विससार ॥ ३१ ॥

31. No sooner had the damsels, with their corpulent thighs moved with efforts, entered the waters, than the broken mass of ripples spread about the banks, driving the geese therefrom.

शिलाघनैर्नाकसदामुरःस्थलैर्बृहन्निवेशैश्च वधूपयोधरैः ॥
तटाभिनीतेन विभिन्नवीचिना रुषेव भेजे कलुषत्वमम्भसा ॥ ३२ ॥

अन्वयः—शिलाघनैः नाकसदाम् उरस्थलैः बृहन्निवेशैः वधूपयोधरैः च तटाभिनीतेन (अत एव) विभिन्नवीचिना अम्भसा रुषा इव कलुषत्वं भेजे ॥ ३२ ॥

32. The water, driven towards the bank by the broad and stone-hard chests of the damsels, and (hence) broken in its ripples, became muddy as if through anger.

विधूतकेशाः परिलोलितस्रजः सुराङ्गनानां प्रविलुप्तचन्दनाः ॥
अतिप्रसङ्गाद्विहितागसो मुहुः प्रकम्पमीयुः सभया इवोर्मयः ॥ ३३ ॥

अन्वयः—विधूतकेशाः परिलोलितस्रजः प्रविलुप्तचंदनाः अतिप्रसंगात् सुराङ्गनानां विहितागसः ऊर्मयः सभयाः इव मुहुः प्रकम्पम् ईयुः ॥ ३३ ॥

33. The waves, that tossed about the garlands (worn by them), that rubbed off the sandal-ornaments (applied to their bodies) and that offended the damsels on account of close contact, trembled now and then as if through fear.

विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममण्डनेन ये ॥
हृतस्य शेषानिव कुङ्कुमस्य तान्विकत्थनीयान्दधुरन्यथा स्त्रियः ॥ ३४ ॥

विपक्षचित्तोन्मथना ये नखव्रणाः विभ्रममण्डनेन तिरोहिताः हृतस्य कुंकुमस्य शेषान् इव विकत्थनीयान् तान् स्त्रियः अन्यथा दधुः ॥ ३४ ॥

34. The damsels exposed to view the scars of nails (made by their husbands) of which they felt proud, (but) which were painful to the sight of rival damsels, and concealed by decorations of saffron now showing them as if they were the spots of saffron remaining even after their bathing.

सरोजपत्रे नु विलीनषट्पदे विलोलदृष्टेः स्विदमू विलोचने ॥
शिरोरुहाः स्विन्नतपक्ष्मसंततेर्द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥ ३५ ॥
अगूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विकसन्नु पङ्कजम् ॥
इति प्रलीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः ॥ ३६ ॥

अन्वयः—अमू विलीनषट्पदे सरोजपत्रे नु विलोलदृष्टेः विलोचने स्वित्, नतपक्ष्मसंततेः शिरोरुहाः स्वित् निशब्दनिश्चलं द्विरेफवृन्दं नु, अगूढहासस्फुटदन्तकेसरं मुखं स्वित् एतत् विकसत्पङ्कजं नु, इति (संशयेन) नलिनीवने प्रलीनां सखीं योषितः सुचिरेण विदाम्बभूवुः ॥ ३५ ॥ ३६ ॥

35-36. "Are these, appearing in front of us, lotuses clung to by bees, or are they the eyes of our tremulous-eyed one? Are these the ornamented untied hair of our friend, whose eyelashes open and close every second or is it the hive of bees that hum not and move not? Is it her mouth with its filaments of teeth clearly visible by an open smile or is it a blooming lotus?" producing and solving such doubts, the damsels found out after a long time their friend that had hidden herself in the groves of lotuses.

प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ॥
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ ३७ ॥

अन्वयः—काचित् प्रियेण संग्रथ्य विपक्षसंनिधौ पीवरस्तने वक्षसि उपाहितां स्रजं जलाविलाम् (अपि) न विजहौ, हि गुणाः प्रेम्णि वसन्ति, वस्तुनि न ॥ ३७ ॥

37. A certain damsel did not throw off the garland strung by her lover and placed in the presence of her rivals on her bosom having plump breasts, though it was spoiled by water; for merits dwell in love and not in objects.

असंशयं न्यस्तमुपान्तरक्ततां यदेव रोद्धुं रमणीभिरञ्जनम् ॥
हृतेऽपि तस्मिन्सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियम् ॥ ३८ ॥

अन्वयः—रमणीभिः यत् अञ्जनं न्यस्तं तत् उपान्तरक्ततां रोद्धुम् एव (न्यस्तं) असंशयं, तस्मिन् सलिलेन हृते अपि रागः नयनेषु शुक्लतां निरास श्रियं न ॥ ३८ ॥

38. The collyrium applied by the damsels was undoubtedly applied to stop the redness from extending to the corners of the eyes (and not for adornment lest the redness would have obscured the brightness of the eyes). For even when the collyrium was wiped off by water, the redness removed the whiteness of the eyes but did not mar their beauty.

द्युतिं वहन्तो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः ॥
उपप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥ ३९ ॥

अन्वयः—द्युतिं वहन्तः वेगिभिः जलैः प्रलोभात् इव हृताः उपप्लुताः वनितावतंसकाः च्युताधिकाराः सचिवाः इव तत्क्षणशोचनीयताम् आययुः ॥ ३९ ॥

39. The beautiful flower–crests on the heads of damsels, being carried away as if covetously by the violent current of the Ganges, and bruised in the act, were reduced to a lamentable state as are powerful ministers, dismissed from office, when beaten by swift–running thieves, bent on depriving them of their valuables.

विपत्रलेखा निरलक्तकाधरा निरञ्जनाक्षीरपि बिभ्रतीः श्रियम् ॥
निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मण्डनम् ॥ ४० ॥

अन्वयः—विपत्रलेखाः निरलक्तकाधराः निरञ्जनाक्षीः अपि श्रियं बिभ्रतीः रामाः निरीक्ष्य नभश्चरैः तद्वपुषा एव मण्डनम् अलंकृतं बुबुधे ॥ ४० ॥

40. When the Gandharwâs saw that the damsels looked beautiful even though they were stripped of their decorations of paintings, though their lower lips were void of the Alakta dye, and though their eyes had no marks of collyrium in them, they concluded that it was their persons that adorned the ornaments (and not the ornaments that adorned them).

तथा न पूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः ॥
यथा जलार्द्रो नखमण्डनश्रिया ददाह दृष्टीश्च विपक्षयोषिताम् ॥ ४१ ॥

अन्वयः—विलासिनीजनः पूर्वं प्रियानुरागेण कृतभूषणादरः (सन्) विपक्षयोषितां दृष्टीः यथा जलार्द्रः सन् नखमंडनश्रिया (ददाह) तथा न ददाह ॥ ४१ ॥

41. The amorous damsels did not so distress the eyes of their rivals, when, before bathing, they decorated their persons to attract their lovers, as they did, when while bathing, they revealed the scars of nails (made by the lovers at the time of sexual enjoyment).

शुभाननाः साम्बुरुहेषु भीरवो विलोलहाराश्चलफेनपङ्क्तिषु ॥
नितान्तगौर्यो हृतकुङ्कुमेष्वलं न लेभिरे ताः परभागमूर्मिषु ॥ ४२ ॥

अन्वयः—शुभाननाः विलोलहाराः नितान्तगौर्यः भीरवः ताः साम्बुरुहेषु चलफेनपङ्क्तिषु हृतकुङ्कुमेषु ऊर्मिषु अलं परभागं न लेभिरे ॥ ४२ ॥

42. The exceedingly graceful and timid damsels, with beautiful faces and waving necklaces, could find no superior merit in the ripples, that had lotuses in them, that had the mass of foam tossed about, that looked pale-red with saffron stolen (from the persons of the damsels).

हृदाम्भसि व्यस्तवधूकराहते रवं मृदङ्गध्वनिधीरमुज्झति ॥
मुहुस्तनैस्तालसमं समाददे मनोरमं नृत्यमिव प्रवेपितम् ॥ ४३ ॥

अन्वयः—व्यस्तवधूकराहते ह्रदाम्भसि मृदंगध्वनिधीरं रवम् उज्झति (सति) मुहुः स्तनैः तालसमं मनोरमं नृत्यम् इव प्रवेपितं समाददे ॥ ४३ ॥

43. When the water of the lake, beaten alternately by the hands of the damsels, produced a sound deep like that of tabor, their breasts incessantly moved as if it was a charming dance in harmony with musical time.

श्रिया हसद्भिः कमलानि सस्मितैरलंकृताम्बुः प्रतिमागतैर्मुखैः ॥
कृतानुकूल्या सुरराजयोषितां प्रसादसाफल्यमवाप जाह्नवी ॥ ४४ ॥

अन्वयः—श्रिया कमलानि हसद्भिः सस्मितैः प्रतिमागतैः मुखैः अलंकृताम्बुः सुरराजयोषितां कृतानुकूल्या जाह्नवी प्रसादसाफल्यं अवाप ॥ ४४ ॥

44. The Ganges, whose waters shone with the reflection of the smiling faces of the damsels, that shamed the lotuses by their beauty, obtained the fruit of transparency by being serviceable to the celestial damsels.

परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ॥
उपाययुःकम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥ ४५ ॥

अन्वयः—परिस्फुरन्मीनविघट्टितोरवः (अत एव) त्रासविलोलदृष्टयः कम्पितपाणिपल्लवाः सुरांगनाः सखीजनस्य अपि विलोकनीयताम् उपाययुः ॥ ४५ ॥

45. The damsels, whose thighs were rubbed against by the sparkling fish, and (hence) whose eyes became tremulous through fear, and whose sprout-like delicate hands were trembling, engaged the attention of (bewitched) even their female friends.

भयादिवाश्लिष्य झषाहतेऽम्भसि प्रियं मुदानन्दयति स्म मानिनी ॥
अकृत्रिमप्रेमरसाहितैर्मनो हरन्ति रामाः कृतकैरपीहितैः ॥ ४६ ॥

अन्वयः—मानिनी अम्भसि झषाहते (सति) भयात् इव मुदा आश्लिष्य प्रियम् आनन्दयतिस्म, (हि) रामाः अकृत्रिमप्रेमरसाहितैः कृतकैः अपि ईहितैः मनः हरन्ति ॥ ४६ ॥

46. A proud damsel, looking at water struck against by a large fish, eagerly embraced her lover, as if through fear and delighted him. Verily women captivate the minds (of their lovers) by gestures, though affected, yet excited by feelings of genuine love.

तिरोहितान्तानि नितान्तमाकुलैरपां विगाहादलकैः प्रसारिभिः ॥
ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृन्दान्तरितैः सरोरुहैः ॥ ४७ ॥

अन्वयः—अपां विगाहात् नितान्तम् आकुलैः प्रसारिभिः अलकैः तिरोहितान्तानि वधूनां वदनानि द्विरेफ-वृन्दान्तरितैः सरोरुहैः तुल्यतां ययुः ॥ ४७ ॥

47. The faces of the damsels, covered on all sides by long and dishevelled hair by a plunge in water, resembled lotuses screened by swarms of bees.

करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसंभ्रमा ॥
सखीषु निर्वाच्यमधाष्टर्यदूषितं प्रियाङ्गसंश्लेषमवाप मानिनी ॥ ४८ ॥

अन्वयः—मानिनी पयसि अगाधे (सति) किल जात म्भ्रमा (अत एव) नवपल्लवाकृती करौ धुनाना सखीषु निर्वाच्यम् अधाष्टर्यदूषितं प्रियांगसंश्लेषम् अवाप ॥ ४८ ॥

48. A proud damsel, feigning fear as if the waters were deep, and (hence) shaking her sprout-like delicate hands, obtained her lover's close embrace, which was unobjectionable among female friends and not defiled by rudeness.

प्रियैःसलीलं करवारिवारितः प्रवृद्धनिःश्वासविकम्पितस्तनः ॥
सविभ्रमाधूतकराग्रपल्लवो यथार्थतामाप विलासिनीजनः ॥ ४९ ॥

अन्वयः—प्रियैः सलीलं करवारितः प्रवृद्धनिःश्व.सविकम्पितस्तनः सविभ्रमाधूतकराग्रपल्लवः विलासिनीजनः यथार्थताम् आप ॥ ४९ ॥

49. The amorous ladies, confounded by the water sportively thrown at them by lovers with their hands, whose breasts he ved with heavy respiration, and who playfully moved their sproutlike hands, obtained (proved) the significance of their title ' amorous '.

उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारिवारितम् ॥
मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे ॥ ५० ॥

अन्वयः—दयितेन धैर्यम् उदस्य सादरं प्रसादितायाः नतभ्रुवः करवारिवारितम् (अत एव) निमीलन्नयनं मुखं सपत्नीवदनात् इव श्रियम् आददे ॥ ५० ॥

50. The face of the damsel, respectfully propitiated by her lover who gave up harshness, with her eyes closed as it was being sprinkled with handfuls of water by him borrowed the beauty (sullenness) of the face of her rival.

विहस्य पाणौ विधृते धृताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः ॥
सखीव काञ्ची पयसा घनीकृता बभार वीतोच्चयबन्धमंशुकम् ॥ ५१ ॥

अन्वयः—धृताम्भसि पाणौ प्रियेण विहस्य विधृते (सति अत एव) मदनार्द्रचेतसः वध्वाः वीतोच्चय-बन्धम् अंशुकं पयसा घनीकृताकाञ्ची सखी इव बभार ॥ ५१ ॥

51. The under garment of a certain damsel, in whom amorous passions were excited, when her hand full of water (for throwing at her lover) was seized by him with a smile, was supported by her girdle-as if by a friend-which had become more compact by water.

निरञ्जने साचिविलोकितं दृशावयावकं वेपथुरोष्ठपल्लवम् ॥
नतभ्रुवो मण्डयति स्म विग्रहे बलिक्रिया चातिलकं तदास्पदम् ॥ ५२ ॥

अन्वयः—मतभ्रवः विमृह निरञ्जने दृशौ साचिविलोकितं मण्डयति स्म अयावकम् ओष्ठपल्लवं वेपथुः (मण्डयति स्म) अतिलकं तदास्पदं वलिक्रिया मण्डयति स्म ॥ ५१ ॥

52. On the person of a damsel, her eyes with their collyrium washed away (in bathing) looked charming by oblique glances; her tender lips, void of red dye, shone with tremor; and her forehead, bearing no Tilak mark was adorned by lines of skin-fold.

निमीलदाकेकरलोलचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः ॥
निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ॥ ५३ ॥

अन्वयः—प्रियोपकण्ठं निमज्जतीनां (अत एव) निमीलदाकेकरलोलचक्षुषां तासां कृतगात्रवेपथुः श्वसितोद्धतस्तनः श्रमः नु मदनः नु पप्रथे ॥ ५३ ॥

53. On the persons of damsels, who immersed in water in the presence of their lovers, and whose half-closed eyes were tremulous at the corners, was visible some sensation-whether due to exhaustion or to Cupid that filled their bodies with tremor and that caused the upheaving of their breasts by heavy breath.

प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तुतोष सान्त्वनैः ॥
जनस्य रूढप्रणयस्य चेतसः किमप्यमर्षोऽनुनये भृशायते ॥ ५४ ॥

अन्वयः—काचित् प्रियेण विपक्षतः चरमं सिक्ता (सती) चुकोप सान्त्वनैः न तुतोष (तथाहि) रूढप्रणयस्य जनस्य चेतसः अमर्षः किमपि अनुनये (सति) भृशायते ॥ ५४ ॥

54. A certain body, sprinkled by her lover from behind her rival (co-wife) became furious and could not be pacified, by soothing words. Naturally the anger of a person, in whom love is deep rooted, is strangely enhanced by words of conciliation.

इत्थं विहृत्य वनिताभिरुदस्यमानं पीनस्तनोरुजघनस्थलशालिनीभिः ॥
उत्सर्पितोर्मिचयलङ्घिततीरदेशमौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥ ५५ ॥

अन्वयः—पीवरस्तनोरुघनस्थलशालिनीभिः वनिताभिः इत्थं विहृत्य उदस्यमानम् उत्सर्पितोर्मिचयलङ्घिततीरदेशं वारि औत्सुक्यनुन्नम् इव पुरः प्रतस्थे ॥ ५५ ॥

55. The water of the Ganges, thrown out when the ladies beautiful with plump breasts, thighs and hips came out having thus sported in it and the mass of whose uprising waves had run beyond the banks, went before them as if distressed at their separation.

तीरान्तराणि मिथुनानि रथाङ्गनाम्नां
नीत्वा विलोलितसरोजवनश्रियस्ताः ॥
संरेजिरे सुरसरिज्जलधौतहारा-
स्तारावितानतरला इव यामवत्यः ॥ ५६ ॥

अन्वयः—रथाङ्गनाम्नां मिथुनानि तीरान्तराणि नीत्वा विलोलितसरोजवनश्रियः सुरसरिज्जलधौतहाराः ताः तारावितानतरलाः यामवत्यः इव संरेजिरे ॥ ५६ ॥

56. The damsels, whose necklaces were washed clean by the water of the Ganges, and who shook the beauties of lotuses by enticing couples of chakrawaka birds to the other banks, shone like nights bright with clusters of stars.

संक्रान्तचन्दनरसाहितवर्णभेदं
विच्छिन्नभूषणमणिप्रकरांशुचित्रम् ॥
बद्धोर्मि नाकवनितापरिभुक्तमुक्तं
सिन्धोर्बभार सलिलं शयनीयलक्ष्मीम् ॥ ५७ ॥

अन्वयः—संक्रान्तचन्दनरसाहितवर्णभेदं विच्छिन्नभूषणमणिप्रकरांशुचित्रं बद्धोर्मि नाकवनितापरिभुक्तमुक्तं सिन्धोः सलिलं शयनीयलक्ष्मीं बभार ॥ ५७ ॥

57. The water of the Ganges, full of waves, with its colour changed by being blended with sandal juice, variegated with the rays of jewels on ornaments broken (while bathing) and left by the celestial damsels after enjoyment, bore the beauty of a bed.

नवमः सर्गः

—o—

वीक्ष्य रन्तुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः ॥
तत्प्रियार्थमिव यातुमथास्तं भानुमानुपपयोधि ललम्बे ॥ १ ॥

अन्वयः—अथ भानुमान् आत्तचित्रपरिधानविभूषाः (अतएव) रन्तुमनसः सुरनारीः वीक्ष्य तत्प्रियार्थम् इव अस्तं यातुम् उपपयोधि ललम्बे ॥ १ ॥

1. Then (after the sport of splashing one another with water was over) observing the damsels, decorated with various garments and ornaments, and (hence) anxious for sexual enjoyments, the Sun hung on the western horizon ready for setting, as if desiring to oblige them.

मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ ॥
द्यौरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीम् ॥ २ ॥

अन्वयः—मध्यमोपलनिभे लसदंशौ भानौ एकतः च्युतिम् उपेयुषि (सति) द्यौः परिवृत्तिविलोलां वासरलक्ष्मीं हारयष्टिम् इव उवाह ॥ २ ॥

2. When the Sun, bright like the central jewel (of a necklace) and darting forth his rays, was going down the horizon on one side, the heaven shone with the light of the setting Sun, tremulous on account of the change, as if with a pearl necklace moving to and fro.

अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ॥
क्षीबतामिव गतः क्षितिमेष्यंल्लोहितं वपुरुवाह पतङ्गः ॥ ३ ॥

अन्वयः—पतङ्गः अतीव पिपासुः (सन्) अंशुपाणिभिः पद्मजं मधु भृशं रसयित्वा क्षीबतां गतः इव क्षितिम् एष्यन् लोहितं वपुः उवाह ॥ ३ ॥

3. Exceedingly thirsty, the Sun, sipping to satiation the juice of lotuses with his hands in the form of rays, and getting as it were intoxicated, had his person red, just when setting.

11

गम्यतामुपगते नयनानां लोहितायति सहस्रमरीचौ ॥
आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥ ४ ॥

अन्वयः—सहस्रमरीचौ लोहितायति (अतएव) नयनानां गम्यताम् उपगते (सति) अभितापः धरित्रीं विरहय्य चक्रवाकहृदयानि आससाद ॥ ४ ॥

4. When the thousand rayed (Sun) became exceedingly red and (hence) capable of being gazed at, extreme heat left the earth and entered the hearts of Chakrawâka birds (they got distressed at the separation of the Sun as much as the earth was heated during day time).

मुक्तमूललघुरुज्झितपूर्वः पश्चिमे नभसि संभृतसान्द्रः ॥
सामि मज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥ ५ ॥

अन्वयः—रवौ सामि मज्जति (सति) मुक्तमूललघुः उज्झितपूर्वः पश्चिमे नभसि संभृतसान्द्रः रश्मिसमूहः खिन्नजिह्मः इव न विरेजे ॥ ५ ॥

5. When half the orb of the Sun had gone down, the assemblage of rays, that had left their master the Sun and (hence) lost lustre, that leaving the east gathered in crowds in the west and that looked sunk with grief, lost all attractiveness as does the group of attendants that are lowered by forsaking their old master, that forsaking old relations gather in a wretched place and that look greatly dejected.

कान्तदूत्य इव कुङ्कुमताम्राः सायमण्डनमभि त्वरयन्त्यः ॥
सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः ॥ ६ ॥

अन्वयः—कुङ्कुमताम्राः सायमण्डनम् अभित्वरयन्त्यः सौधजालपतिताः रविभासः कान्तदूत्यः इव वनिताभिः सादरं ददृशिरे ॥ ६ ॥

6. The rays of the Sun, red like saffron-paints, entering through the windows of palaces, and hastening the ladies to evening decorations, were respectfully looked at by them as if they were female messengers sent forth by their lords.

अग्रसानुषु नितान्तपिशङ्गैर्भूरुहान्मृदुकरैरवलम्ब्य ॥
अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु ॥ ७ ॥

अन्वयः—विवस्वान् अग्रसानुषु भूरुहान् नितान्तपिशङ्गैः मृदुकरैः अवलम्ब्य अस्तशैलगहनं नु जलधिं नु महीं नु आविवेश ॥ ७ ॥

7. The Sun, taking hold of trees on the tops of Western mountains by his gentle rays, exceedingly red, seemed to enter now the forest, now the ocean or now the earth (so rapidly did the rays move on different parts of the globe).

आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः ॥
आययावहरिदश्वविपाण्डुस्तुल्यतां दिनमुखेन दिनान्तः ॥ ८ ॥

अन्वयः—चलपतत्रिकुलानाम् आरवैः आकुलः अनुदितौषसरागः (तिमिरानुदयात्) अहरिदश्वविपाण्डुः दिनान्तः दिनमुखेन तुल्यताम् आययौ ॥ ८ ॥

8. The close of the day, filled with the cries of numerous birds anxious for nests, not lighted by evening twilight, and dark because of there being no Sun (though darkness had not yet crept in), resembled the break of the day.

आस्थितः स्थगितवारिदपङ्क्त्या संध्यया गगनपश्चिमभागः ॥
सोर्मिविद्रुमवितानविभासा रञ्जितस्य जलधेः श्रियमूहे ॥ ९ ॥

अन्वयः—स्थगितवारिदपङ्क्त्या संध्यया आस्थितः गगनपश्चिमभागः सोर्मिविद्रुमवितानविभासा रञ्जितस्य जलधेः श्रियम् ऊहे ॥ ९ ॥

9. The western portion of the sky, pervaded by the evening twilight that covered the crowds of clouds, bore the beauty of an ocean tinged with the lustre of numerous corals reflected on its waves.

प्राञ्जलावपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा ॥
संध्ययानुविदधे विरमन्त्या चापलेन सुजनेतरमैत्री ॥ १० ॥

अन्वयः—प्राञ्जलौ नतमूर्ध्नि तत्प्रवणचेतसि अपि जने प्रेम हित्वा विरमन्त्या संध्यया चापलेन सुजनेतरमैत्री अनुविदधे ॥ १० ॥

10. Slighting the affections of even such persons as had folded their hands (for offering oblations), had bent down their heads (out of respect) and had fixed their affections on it, the twilight, in disappearing, imitated by its unsteadiness, the friendship of bad persons.

औषसातपभयादपलीनं वासरच्छविविरामपटीयः ॥
संनिपत्य शनकैरिव निम्नादन्धकारमुदवाप समानि ॥ ११ ॥

अन्वयः—औषसातपभयात् अपलीनं वासरच्छविविरामपटीयः अंधकारं शनकैः निम्नात् इव संनिपत्य समानि उदवाप ॥ ११ ॥

11. Darkness, that had concealed itself as if through fear of the morning light, and that is (ever) skilled in obscuring the beauty of the day, seemed to come out of the chasms in the low ground and gradually pervaded the whole level ground.

एकतामिव गतस्य विवेकः कस्यचिन्न महतोऽप्युपलेभे ॥
भास्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः ॥ १२ ॥

अन्वयः—एकतां गतस्य इव महतः अपि कस्यचित् पदार्थस्य विवेकः न उपलेभे, पतितेन भास्वता भुवनानां विशेषाः आत्मनि निदधिरे इव ॥ १२ ॥

12. (Darkness having enveloped the whole universe) no object could be distinguished from even great objects (like mountains), as if they had all formed one whole, and hence (one might conjecture) the Sun, while setting, had taken along with him all the characterestic distinctions of objects (such as earth, &c).

इच्छतां सह वधूभिरभेदं यामिनीविरहिणां विहगानाम् ॥
आपुरेव मिथुनानि वियोगं लङ्घ्यते न खलु कालनियोगः ॥ १३ ॥

अन्वयः—वधूभिः सह अभेदम् इच्छतां यामिनीविरहिणां विहगानां मिथुनानि वियोगम् आपुः एव (तथाहि) कालनियोगः न लङ्घ्यते खलु ॥ १३ ॥

13. The pairs of Chakrawáka birds, ever separated during night-time, but wishing union with their consorts, verily became separated; for, the law of fate is untransgressable.

यच्छति प्रतिमुखं दयितायै वाचमन्तिकगतेऽपि शकुन्तौ ॥
नीयते स्म नतिमुज्झितहर्षं पङ्कजं मुखमिवाम्बुरुहिण्या ॥ १४ ॥

अन्वयः—शकुन्तौ अन्तिकगते अपि दयितायै प्रतिमुखं वाचं यच्छति अम्बुरुहिण्या उज्झितहर्षं पङ्कजं मुखम् इव नतिं नीयते स्म ॥ १४ ॥

14. When the Chakrawáka male gave response to his female companion by turning his face to her, the lotus-plant bent down her mouth (head) in the form of the lotus, that had abandoned its bloom (out of sympathy for their wretched condition).

रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ॥
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥ १५ ॥

अन्वयः—तिमिरेण विविधाः तरुशैलाः रञ्जिता नु, गगनं नामितं नु (यद्वा) स्थगितं नु, धरित्री विषमेषु पूरिता नु, (तथा) ककुभः (च) संहृता नु ॥ १५ ॥

15. Were all trees and mountains painted with darkness ? 'was the sky bent low or was it veiled (with darkness) ? Were all the ups and downs on the surface of the earth levelled out ? Were all quarters removed ? (Whence then is this one complete mass of darkness ?).

रात्रिरागमलिनानि विकासं पङ्कजानि रहयन्ति विहाय ॥
स्पष्टतारकमियाय नभः श्रीर्वस्तुमिच्छति निरापदि सर्वः ॥ १६ ॥

अन्वयः—श्रीः रात्रिरागमलिनानि विकासं रहयन्ति पङ्कजानि विहाय स्पष्टतारकं नभः इयाय (तथाहि) निरापदि स्थातुं सर्वः इच्छति ॥ १६ ॥

16. Beauty left the lotuses, that were gloomy by the colour of the twilight (night) and that had given up their natural bloom, and went far off to the sky in which the stars were clearly discernible. Indeed all wish to stay in an undisturbed place.

व्यानशे शशधरेण विमुक्तः केतकीकुसुमकेसरपाण्डुः ॥
चूर्णमुष्टिरिव लम्भितकान्तिर्वासवस्य दिशमंशुसमूहः ॥ १७ ॥

अन्वयः—शशधरेण विमुक्तः केतकीकुसुमकेसरपाण्डुः लम्भितकान्तिः अंशुसमूहः चूर्णमुष्टिः इव वासवस्य दिशं व्यानशे ॥ १७ ॥

17. The multitude of rays darting from the Moon, pale like the pollen of ketakee flowers, and charged with light, pervaded the East as if it were a handful of pounded camphor.

उज्झती शुचमिवाशु तमिस्रामन्तिकं व्रजति तारकराजे ॥
दिक्प्रसादगुणमण्डनमूहे रश्मिहासविशदं मुखमैन्द्री ॥ १८ ॥

अन्वयः—ऐन्द्री दिक् तारकराजे अन्तिकं व्रजति (सति) आशु तमिस्रां शुचम् इव उज्झती प्रसादगुणमण्डनं रश्मिहासविशदं (मुखम् इव) मुखम् ऊहे ॥ १८ ॥

18. The East, dispelling darkness like grief, immediately on the approach of the Moon (the Lord of planets), bore its van (mouth), adorned by virtue of clearness and bright with the light of rays.

नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः ॥
खे रराज निपतत्करजालं वारिधेः पयसि गाङ्गमिवाम्भः ॥ १९ ॥

अन्वयः—शैलरुद्धवपुषः सितरश्मेः नीलनीरजनिभे खं निपतत् करजालं हिमगौरं वारिधेः पयसि (निपतत्) गाङ्गम् अम्भः इव रराज ॥ १९ ॥

19. The collection of the rays of the Moon with its orb screened behind the (eastern) mountain, spreading in the sky beautiful like a blue lotus, shone like the waters of the Ganges running into the water of the ocean.

द्यां निरुन्धदतिनीलघनाभं ध्वान्तमुद्यतकरेण पुरस्तात् ॥
क्षिप्यमाणमसितेतरभासा शंभुनेव करिचर्म चकासे ॥ २० ॥

अन्वयः—द्यां निरुध्यत् अतिनीलघनाभम् उद्यतकरेण असितेतरभासा पुरस्तात् क्षिप्यमाणं ध्वान्तं शंभुना (क्षिप्यमाणं) करिचर्म इव चकासे ॥ २० ॥

20. The darkness, pervading the sky and resembling black clouds, being thrown onward by the Moon with her white rising rays, looked as beautiful as the skin of an elephant thrown forward by God Shankar.

अन्तिकान्तिकगतेन्दुविसृष्टे जिह्मतां जहति दीधितिजाले ॥
निःसृतस्तिमिरभारनिरोधादुच्छ्वसन्निव रराज दिगन्तः ॥ २१ ॥

अन्वयः—अन्तिकान्तिकगतेन्दुविसृष्टे दीधितिजाले जिह्मतां जहति (सति) तिमिरभारनिरोधात् निःसृतः दिगन्तः उच्छ्वसन् इव रराज ॥ २१ ॥

21. When the multitude of rays, darting from the Moon, that had come very near, gave up their obliqueness, the horizon, relieved from the obstruction of the mass of darkness, seemed to breathe fresh and (hence) shone.

लेखया विमलविद्रुमभासा संततं तिमिरमिन्दुरुदासे ॥
दंष्ट्रया कनकटङ्कपिशङ्ग्या मण्डलं भुव इवादिवराहः ॥ २२ ॥

अन्वयः—इन्दुः विमलविद्रुमभासा लेखया संततं तिमिरम् आदिवराहः कनकटङ्कपिशङ्ग्या दंष्ट्रया भुवः मण्डलम् इव उदास ॥ २२ ॥

22. As the Boar-incarnation of Vishnu threw up this globular Earth with his fang reddish-brown like a golden hatchet, so the Moon dispelled dense darkness with her digit bright like a beautiful coral.

दीपयन्नथ नभः किरणौघैः कुङ्कुमारुणपयोधरगौरः ॥
हेमकुम्भ इव पूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः ॥ २३ ॥

अन्वयः—अथ किरणौघैः नभः दीपयन् कुङ्कुमारुणपयोधरगौरः तुहिनांशुः शनकैः पूर्वपयोधेः हेमकुम्भ इव उन्ममज्ज ॥ २३ ॥

23. Then the Moon, red like the breasts (of a woman) besmeared with saffron, shedding lustre over the sky by streams of rays, gradually came up like a golden pot from the eastern ocean.

उद्गतेन्दुमविभिन्नतमिस्रां पश्यति स्म रजनीमवितृप्तः ॥
व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः ॥ २४ ॥

अन्वयः—लोकः उद्गतेन्दुम् अविभिन्नतमिस्रां रजनीं व्यंशुकस्फुटमुखीं (तथापि) व्रीडया अतिजिह्मां नववधूम् इव अवितृप्तः (सन्) पश्यति ॥ २४ ॥

24. People look at the night, freed from darkness and shining with the rising Moon, without being completely satisfied, as they gaze at the newly married girl, whose face is clearly seen on the removal of the mantle and who is very pale or angry through shame.

न प्रसादमुचितं गमिता द्यौर्नोद्धृतं तिमिरमद्रिवनेभ्यः ॥
दिङ्मुखेषु न च धाम विकीर्णं भूषितैव रजनी हिमभासा ॥ २५ ॥

अन्वयः—हिमभासा द्यौः उचितं प्रसादं न गमिता, अद्रिवनेभ्यः तिमिरं न उद्धृतं, दिङ्मुखेषु धाम च न विकीर्णं तथापि रजनी भूषिता एव ॥ २५ ॥

25. The Moon had fully brightened the sky, she had neither dispelled darkness from mountains and forests, nor illumined the quarters; she was, nevertheless, an ornament of the sky.

मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन् ॥
मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥ २६ ॥

अन्वयः—उदितः शीतमयूखः उष्णबाष्पकलुषान् मानिनीजनविलोचनपातान् प्रतिगृह्णन् (अत एव) भीतभीत इव मन्दमन्दं खं प्रययौ ॥ २६ ॥

26. The rising Moon, collecting the glances of proud women (who repent of quarrels with lovers) unclean by hot tears (dropped through grief at their separation), and (hence) seeming fear-smit rose up in the sky by degrees.

श्लिष्यतः प्रियवधूरुपकण्ठं तारकास्ततकरस्य हिमांशोः ॥
उद्वमन्नभिरराज समन्तादङ्गराग इव लोहितरागः ॥ २७ ॥

अन्वयः—ततकरस्य तारका (एव) प्रियवधूः उपकण्ठं श्लिष्यतः हिमांशोः समन्तात् उद्वमन् लोहितरागः अङ्गराग इव अभिरराज ॥ २७ ॥

27. Like perfumed unguents shone the red colour spreading all round the Moon that extending her rays (hands) closely embraced the planets.

प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि ॥
क्षीरसिन्धुरिव मन्दरभिन्नः काननान्यविरलोच्चतरूणि ॥ २८ ॥

अन्वयः—शशधरेण प्रेरितः करौघः संहतानि अपि तमांसि मन्दरभिन्नः क्षीरसिंधुः अविरलोच्चतरूणि काननानि इव नुनोद ॥ २८ ॥

28. As the ocean, agitated by the Mandar mountain drives onward forests possessing thick and tall trees, so did the stream of rays flowing from the Moon dispel dense masses of darkness.

शारतां गमितया शशिपादैश्छायया विटपिनां प्रतिपेदे ॥
न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्ममहीभिः ॥ २९ ॥

अन्वयः—शशिपादैः शारतां गमितया विटपिनां छायया न्यस्तशुक्लबलिचित्रतलाभिः वसतिवेश्ममहीभिः तुल्यतां प्रतिपेदे ॥ २९ ॥

29. The shade under trees, speckled by the rays of the Moon, resembled the floor of dwellings, on which are dispersed white flowers and other offerings.

आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन ॥
सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम् ॥ ३० ॥

अन्वयः—आतपे वध्वा सह (अत एव) धृतिमता यामिनीविरहिणा विहगेन हिमरश्मेः किरणा न सेहिरे (तथाहि) दुःखिते मनसि सर्वम् असह्यम् ॥ ३० ॥

30. The Chakrawáka bird, that was delighted even in the heat of the Sun as he then enjoyed the company of his wife, but that was invariably separated during night, could not endure the rays of the cool-rayed (Moon). Verily, everything (however beautiful it be) is inendurable when the mind is not at peace (is vexed).

गन्धमुद्धतरजःकणवाही विक्षिपन्विकसतां कुमुदानाम् ॥
आदुधाव परिलीनविहङ्गा यामिनीमरुदपां वनराजीः ॥ ३१ ॥

अन्वयः—अपां कणवाही विकसतां कुमुदानां गन्धम् उद्धतरजः विक्षिपन् यामिनीमरुत् परिलीनविहङ्गा वनराजीः आदुधाव ॥ ३१ ॥

31. The night-breezes, charged with particles of water, and so dispersing the fragrance of blooming lotuses that their pollen was wafted away, gently shook the clusters of trees, in the hollows of which birds had slept.

संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः ॥
यामिनीवनितया ततचिह्नः सोत्पलो रजतकुम्भ इवेन्दुः ॥ ३२ ॥

अन्वयः—यामिनीवनितया मन्मथस्य अभिषेकं संविधातुं लसदंशुजलौघः ततचिह्नः इन्दुः सोत्पलः रजतकुम्भ इव उदासे ॥ ३२ ॥

32. The Moon, glittering with the stream of waters in the form of rays, and bearing visible marks, was held by Lady Night up like a silver jar with lotuses in it, to consecrate the Lord of Love by sprinkling water over his head (on his conquest of all the three worlds).

ओजसापि खलु नूनमनूनं नासहायमुपयाति जयश्रीः ॥
यद्विभुः शशिमयूखसखः सन्नाददे विजयि चापमनङ्गः ॥ ३३ ॥

अन्वयः—ओजसा अनूनम् अपि असहायं जयश्रीः न उपयाति खलु यत् विभुः अनङ्गः शशिमयूखसखः सन् विजयि चापम् आददे ॥ ३३ ॥

33. Indeed the glory of victory does not go up to a person, though full of lustre if he is not backed by friends; since the God of Love, though all powerful, took in his hands the triumphant bow (only) after befriending the lunar rays.

सद्मनां विरचनाहितशोभैरागतप्रियकथैरपि दूत्यम् ॥
संनिकृष्टरतिभिः सुरदारैर्भूषितैरपि विभूषणमीषे ॥ ३४ ॥

अन्वयः—संनिकृष्टरतिभिः सुरदारैः आहितशोभैः अपि सद्मनां विरचना ईषे, आगतप्रियकथैः अपि दूत्यम् (ईषे) तथा भूषितैः अपि विभूषणम् (ईषे) ॥ ३४ ॥

34. Of the celestial damsels who were soon to enjoy sexual pleasures, those that had already decorated their mansions, desired to decorate them still more; those that had learnt of their lovers, still wished to hear from female messengers, and those that had already beautified their persons, wished for still more decorations, (as they were all only too anxious to meet with and propitiate their lords).

न स्रजो रुरुचिरे रमणीभ्यश्चन्दनानि विरहे मदिरा वा ॥
साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम एव ॥ ३५ ॥

अन्वयः—विरहे स्रजे चन्दनानि मदिरा वा रमणीभ्यः न रुरुचिरे (हि) प्रियसमागमः एव रतेः साधनेषु रम्यताम् उपधत्ते ॥ ३५ ॥

35. During separation, garlands, perfumes and drinks were not attended to by the damsels. For, union with lovers alone gives charm to these means of enjoyment.

प्रस्थिताभिरधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः ॥
मानिनीभिरपहस्तितधैर्यः सादयन्नपि मदोऽवललम्बे ॥ ३६ ॥

अन्वयः—अधिनाथनिवासं प्रस्थिताभिः ध्वंसितप्रियसखीवचनाभिः मानिनीभिः अपहस्तितधैर्यः सादयन् अपि मदः अवललम्बे ॥ ३६ ॥

36. Proud ladies, who, disregarding the advice of friends, set out for the abodes of their lovers, assumed pride, though it paralysed their courage and worked on their health (brought on fatigue).

कान्तवेश्म बहु संदिशतीभिर्यातमेव रतये रमणीभिः ॥
मन्मथेन परिलुप्तमतीनां प्रायशः स्खलितमप्युपकारि ॥ ३७ ॥

अन्वयः—रतये बहु संदिशतीभिः रमणीभिः कान्तवेश्म यातम् एव (तथाहि) मन्मथेन परिलुप्तमतीनां स्खलितम् अपि प्रायः उपकारि (भवति) ॥ ३७ ॥

37. The handsome ladies, talking variously of enjoyment, suddenly came up to the abodes of their lovers. Indeed mistakes of persons, whose minds are enticed by love, generally do them good.

आशु कान्तमभिसारितवत्या योषितः पुलकरुद्धकपोलम् ॥
निर्जिगाय मुखमिन्दुमखण्डं खण्डपत्रतिलकाकृति कान्त्या ॥ ३८ ॥

अन्वयः—आशु कान्तम् अभिसारितवत्याः योषितः पुलकरुद्धं कपोलं खण्डपत्रतिलकाकृति मुखं कान्त्या अखण्डम् इन्दुं निर्जिगाय ॥ ३८ ॥

38. The face of a damsel, hastening to her lover, with her cheeks horripulated and with the form of the Tilak mark (lines of painting) wiped away, shamed in beauty the Moon of full digits.

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी ॥
आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥ ३९ ॥

अन्वयः—(सखीनायिकासंवादमाह) 'स (धूर्तः) अशेषं वचनीयम् उच्यताम्', 'हे सखि ! ईश्वरे परुषता न साध्वी', 'तर्हि एनम् अनुनीय आनय', 'विप्रियाणि जनयन् कथं वा अनुनेयः ?' ॥ ३९ ॥

39. (Dialogue between a lady and her friend) 'Reproach him with all strong words!'; 'Friend! harshness towards your Lord is not proper'; 'Then reconcile and bring him to me'; 'How can he, who does these unpleasant things, be reconciled?'.

किं गतेन न हि युक्तमुपेतुं कः प्रिये सुभगमानिनि मानः ॥
योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे ॥ ४० ॥

अन्वयः—'(तर्हि) गतेन किम्? अतः गन्तुं न युक्तं हि'; 'सुभगमानिनि! प्रिये कः मानः?' अथवा 'गतेन किम्?'; 'न हि, किन्तु गन्तुं युक्तम् सुभग मानिनि प्रिये कः मानः?' इति योषितां कथासु समेतैः कामिभिः बहुरसा धृतिः ऊहे ॥ ४० ॥

40. 'Then what is the use of going? It is better not to go'. 'O proud (beautiful) lady! what pride towards the Lord!' or 'what avails going?'. 'Don't say so! it is but proper to go. How can you be proud towards your dear lord!' such words of the ladies gave immense delight to the lovers who had been stealthily listening to them.

योषितः पुलकरोधि दधत्या घर्मवारि नवसंगमजन्म ॥
कान्तवक्षसि बभूव पतन्त्या मण्डनं लुलितमण्डनतैव ॥ ४१ ॥

अन्वयः—पुलकरोधि नवसंगमजन्म घर्मवारि दधत्या कान्तवक्षसि पतन्त्या योषितः लुलितमण्डनता एव मण्डनं बभूव ॥ ४१ ॥

41. The graceful decorations of a damsel reclining on the bosom of her lover and bearing drops of perspiration that obstucted horripulation and were due to the fresh union, greatly adorned her.

शीधुपानविधुरासु निगृह्णन्मानमाशु शिथिलीकृतलज्जः ॥
संगतासु दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ॥ ४२ ॥

अन्वयः—शीधुपानविधुरासु तथा दयितैः सङ्गतासु कामिनीषु आशु मानं निगृह्णन् शिथिलकृतलज्जः मदनः नु मदः नु उपलेभे ॥ ४२ ॥

42. Effects of Love or inebriety, that immediately restrains pride and slackens shame, were witnessed on ladies, maddened with spirituous liquor and united with their lovers.

द्वारि चक्षुरधिपाणि कपोलौ जीवितं त्वयि कुतः कलहोऽस्याः ॥
कामिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥ ४३ ॥

अन्वयः—द्वारि चक्षुः, अधिपाणि कपोलौ, (किम्बबहुना) त्वयि जीवितम्, (अतः) अस्याः कलहः कुतः इति कामिनां प्रीतये पुनरुक्तं वचः नवनवत्वम् इयाय ॥ ४३ ॥

43. 'Her eyes are fixed at the door (in expectation of your approach); her cheeks are resting on her palm (in anxiety); her very life depends on you! How can she, therefore, be angry with you? These words, repeated again and again (by the female messenger) for the propitiation of the lover, very much delighted him.

साचि लोचनयुगं नमयन्ती रुन्धती दयितवक्षसि पातम् ॥
सुभ्रुवो जनयति स्म विभूषां संगतावुपरराम च लज्जा ॥ ४४ ॥

अन्वयः—लोचनयुगं साचि नमयन्ती, दयितवक्षसि पातं रुन्धती, लज्जा सुभ्रुवः विभूषां जनयति स्म सङ्गतौ च उपरराम ॥ ४४ ॥

44. Bashfulness, that made her cast oblique glance (at her lover) and that prohibited her from reclining on the bosom of her lover (though she desired it, adorned the beautiful lady but ceased on her union with him.

सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन ॥
योषितः सुहृदिव स्म रुणद्धि प्राणनाथमभिबाष्पनिपातः ॥ ४५ ॥

अन्वयः—सव्यलीकम् अत एव अवधीरित खिन्नं सपदि कोपपदेन प्रस्थितं प्राणनाथं योषितः अभिबाष्पनिपातः सुहृद् इव रुणद्धि स्म ॥ ४५ ॥

45. Like a friend the flood of tears in the eyes of the damsel, stopped her lover who had set out (for going) under the pretext of anger, being sorry at the disrespect though merited (as he was really guilty).

शङ्कितायं कृतबाष्पनिपातामीर्ष्यया विमुखितां दयिताय ॥
मानिनीमभिमुखाहितचित्तां शंसति स्म घनरोमविभेदः ॥ ४६ ॥

अन्वयः—शङ्किताय दयिताय ईर्ष्यया विमुखिताम् (अत एव) कृतबाष्पनिपातां मानिनीं घनरोमविभेदः अभिमुखाहितचित्तां शंसति स्म ॥ ४६ ॥

46. The rise of sudden horripulation indicated total absence of anger in that proud lady who had through jealousy, made her faithless lover turn his back upon her and (hence) who had been shedding tears in grief.

लोलदृष्टि वदनं दयितायाश्चुम्बति प्रियतमे रभसेन ॥
व्रीडया सह विनीवि नितम्बादंशुकं शिथिलतामुपपेदे ॥ ४७ ॥

अन्वयः—प्रियतमे लोलदृष्टि दयिताया वदनं रभसेन चुम्बति (सति) विनीवि अंशुकं नितम्बात् व्रीडया सह शिथिलताम् उपपेदे ॥ ४७ ॥

47. When the lover forcibly kissed the mouth of his beloved having tremulous eyes, her under garment, with its knot removed, became slackened together with bashfulness.

ह्रीतया गलितनीवि निरस्यन्नन्तरीयमवलम्बितकाञ्चि ॥
मण्डलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥ ४८ ॥

अन्वयः—गलितनीवि अवलम्बितकाञ्चि अन्तरीयं निरस्यन् हृदयेशः ह्रीतया दयितया मण्डलीकृतपृथुस्तनभारं सस्वजे ॥ ४८ ॥

48. Throwing aside her under garment, whose knot was dropped, and which was hung down from the girdle, the lover, the lord of her heart, was embraced by his beloved smit with bashfulness, so that her plump breasts were rounded.

आदृता नखपदैः परिरम्भाश्चुम्बितानि घनदन्तनिपातैः ॥
सौकुमार्यगुणसंभृतकीर्तिर्वाम एव सुरतेष्वपि कामः ॥ ४९ ॥

अन्वयः—परिरंभाः नखपदैः आदृताः, चुम्बितानि घनदन्तनिपातैः (आदृतानि), सौकुमार्यगुणसंभृतकीर्तिः सुरतेषु अपि वामः एव ॥ ४९ ॥

49. Close embraces were respected by nail- marks, and kisses by deep teeth-wounds. Cupid, celebrated for the virtue of tenderness is indeed cruel even in unions (not to speak of his cruelty in separation).

पाणिपल्लवविधूननमन्तः सीत्कृतानि नयनार्धनिमेषाः ॥
योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य ॥ ५० ॥

अन्वयः—रहसि गद्गदवाचां योषितां पाणिपल्लवविधूननम् अन्तः सीत्कृतानि नयनार्धनिमेषाः मदनस्य अस्त्रताम् उपययुः ॥ ५० ॥

50. The constant movements of lotus-like hands, the sounds made by drawing in breath (for sighs), and the partial closing of eyes–all these of the youthful ladies who inwardly stammered–served as the weapons of Cupid.

पातुमाहितरतीन्यभिलेषुस्तर्षयन्त्यपुनरुक्तरसानि ॥
सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ॥ ५१ ॥

अन्वयः—युवानः आहितरतीनि (अतएव) अपुनरुक्तरसानि (अत एव) तर्षयन्ति सस्मितानि वधूनां वदनानि सोत्पलानि मधूनि च पातुम् अभिलेषुः ॥ ५१ ॥

51. The youths desired to drink liquors with lotuses in them and (kiss) the smiling faces of ladies, which enhanced love, and (hence) were ever fresh in taste, producing no satiation.

कान्तसंगमपराजितमन्यौ वारुणीरसनशान्तविवादे ॥
मानिनीजन उपाहितसंधौ संदधे धनुषि नेषुमनङ्गः ॥ ५२ ॥

अन्वयः—कान्तसङ्गमपराजितमन्यौ वारुणीरसनशान्तविवादे (अतः) उपाहितसंधौ मानिनीजने अनङ्गः धनुषि इषुं न संदधे ॥ ५२ ॥

52. Cupid did not fix his arrows to his bow (for discharging them) at the proud ladies, whose wrath subsidsed at their union with their lovers, whose wordy strifes had ended with their tasting wine and (hence) who had reconciled themselves with their lovers.

कुप्यताशु भवतानताचित्ताः कोपितांश्च वरिवस्यत यूनः ॥
इत्यनेक उपदेश इव स्म खाद्यते युवतिभिर्मधुवारः ॥ ५३ ॥

अन्वयः—' यूनः कुप्यत, आशु आनतचित्ता भवत, कोपितान् च वरिवस्यत ' इति अनेकः उपदेशः इव मधुवारः युवतिभिः खाद्यते स्म ॥ ५३ ॥

53. The young ladies tasted various draughts of liquor as several pieces of advice; thus:—' Anger the youths, submit to them immediately, and pacify them when angry'.

भर्तृभिः प्रणयसंभ्रमदत्तां वारुणीमतिरसां रसयित्वा ॥
ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः ॥ ५४ ॥

अन्वयः—भर्तृभिः प्रणयसम्भ्रमदत्ताम् (अत एव) अतिरसां वारुणीं रसयित्वा वधूभिः ह्रीविमोह विरहात् पाटवं नु हृदयं नु उपलेभे ॥ ५४ ॥

54. Having tasted the liquor, which was sweeter by reason of its being offered with feelings of love and respect by their lovers, the ladies, being freed from bashfulness and dullness, obtained agility and pleasure instead.

स्वादितः स्वयमथैधितमानं लम्भितः प्रियतमैः सह पीतः ॥
आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥ ५५ ॥

अन्वयः—स्वयं स्वादितः अथ प्रियतमैः एधितमानं लम्भितः (ततः प्रियतमैः) सह पीतः आसवः प्रमदानां प्रतिपदं नैकरूपरसतां भेजे इव ॥ ५५ ॥

55. The liquor, first quaffed by the ladies themselves and then caused to be drunk by their lovers in an affectionate manner, and lastly drunk by both together (in the same cup), produced as it were a variety of tastes on every occasion, in the drunk.

भ्रूविलाससुभगाननुकर्तुं विभ्रमानिव वधूनयनानाम् ॥
आददे मृदुविलोलपलाशैरुत्पलैश्चषकवीचिषु कम्पः ॥ ५६ ॥

अन्वयः—भ्रूविलाससुभगान् वधूनयनानां विभ्रमान् अनुकर्तुम् इव मृदुविलोलपलाशैः उत्पलैः चषकवीचिषु कम्पः आददे ॥ ५६ ॥

56. As if vying with the lovely movements of the glances of the damsels, attractive by the contraction of eyebrows, the lotuses, with their gracefully tremulous petals, took over the tremor of the waves on the wineglass.

ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणानाम् ॥
फुल्ललोचनविनीलसरोजैरङ्गनास्यचषकैर्मधुवारः ॥ ५७ ॥

अन्वयः—ओष्ठपल्लवविदंशरुचीनां रमणानां फुल्ललोचनविनीलसरोजैः अङ्गनास्यचषकैः मधुवारः हृद्यताम् उपययौ ॥ ५७ ॥

57. The drinking of liquor with the wineglasses in the form of the mouths of the ladies, having blue lotuses in the form of bright eyes, extremely delighted the lovers, anxious for biting (kissing) the blossom-like lower-lips of their beloveds.

प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः ॥
तत्तथा हि दयिताननदत्तं व्यानशे मधु रसातिशयेन ॥ ५८ ॥

अन्वयः—गुणवतापि आश्रयवशेन गुणानां विशेषः प्राप्यते व्यक्तं, तत्तथाहि दयिताननदत्तं मधु रसातिशयेन व्याप्तम् ॥ ५८ ॥

58. It is evident that even the virtuous obtain the excellence of their virtues through their supporters; and rightly so, for the drink from the mouth of the beautiful ladies was the most tasteful.

वीक्ष्य रत्नचषकेष्वतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीम् ॥
जज्ञिरे बहुमताः प्रमदानामोष्ठयावकनुदो मधुवाराः ॥ ५९ ॥

अन्वयः—रत्नचषकेषु अतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीं वीक्ष्य ओष्ठयावकनुदः मधुवाराः प्रमदानां बहुमताः जज्ञिरे ॥ ५९ ॥

59. Having observed the beauty (reflection) of the decorations of the teeth and the feet of their lovers as enhanced in the jewelled wine-glasses, the numerous drinks, that wash off the red lac of lower lips, were highly thought of by the ladies.

लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा ॥
वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ॥ ६० ॥

अन्वयः—लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा वारुणी परगुणात्मगुणानां व्यत्ययं नु विनिमयं नु वितेने ॥ ६० ॥

60. The spirituous liquor, that had reddened the eyes and stripped the lower lips of their (natural) redness, and that had its fragrance excelled by the scented mouths (of the ladies) effected their mutual interchange through mistake or intention.

तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा ॥
योषितः सुहृदिव प्रविभेजे लम्भितेक्षणरुचिर्मदरागः ॥ ६१ ॥

अन्वयः—अक्ष्णोः तुल्यरूपं योषितः कर्णगं असितोत्पलं निरुपकारि विदित्वा मदरागः सुहृद् इव लम्भितेक्षणरुचिः प्रविभेजे ॥ ६१ ॥

61. Knowing that the black lotus placed by a lady on her ear, borrowing beauty from her eyes, was still ungrateful-the redness of intoxication stopped the evil effect by adding to the beauty of her eyes.

क्षीणयावकरसोऽप्यतिपानैः कान्तदन्तपदसंभृतशोभः ॥
आययावतितरामिव वध्वाः सान्द्रतामधरपल्लवरागः ॥ ६२ ॥

अन्वयः—अतिपानैः क्षीणयावकरसः अपि कान्तदन्तपदसंभृतशोभः वध्वा अधरपल्लवरागः अतितरां सान्द्रताम् आययौ इव ॥ ६२ ॥

62. The redness of the lower lip of a lady with its lac diminished by over-drink, yet beautified by the wounds of the teeth of her lover, seemed to have greatly increased.

रागकान्तनयनेषु नितान्तं विद्रुमारुणकपोलतलेषु ॥
सर्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः ॥ ६३ ॥

अन्वयः—वनितानां सर्वगा अपि मदश्रीः रागकान्तनयनेषु विद्रुमारुणकपोलतलेषु मुखेषु दर्पणेषु इव नितान्तं ददृशे ॥ ६३ ॥

63. The beauty of intoxication, though covering the whole body of the ladies, was transparent on their faces, having eyes adorned by redness, and the cheeks red like coral as if on mirrors.

बद्धकोपविकृतीरपि रामाश्चारुताभिमततामुपनिन्ये ॥
वश्यतां मधुमदो दयितानामात्मवर्गहितमिच्छति सर्वः ॥ ६४ ॥

अन्वयः—बद्धकोपविकृतीः अपि रामाः चारुता अभिमतताम् उपनिन्ये मधुमदः दयितानां वश्यताम् (उपनिन्ये) (तथाहि) सर्वः आत्मवर्गहितम् इच्छति ॥ ६४ ॥

64. Natural beauty made the ladies, though inflamed with anger, agreeable to their lords; even the intoxication of drink served the same purpose. Indeed all wish good to their own tribe.

वाससां शिथिलतामुपनाभि ह्रीनिरासमपदे कुपितानि ॥
योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयम् ॥ ६५ ॥

अन्वयः—उपनाभि वाससां शिथिलतां, ह्रीनिरासम्, अपदे कुपितानि, गुणपक्षे विदधती मदिरा योषितां वचनीयं निर्ममार्ज ॥ ६५ ॥

65. The liquor, turning into excellences such faults as looseness of under-garment near the navel, abandonment of the sense of shame, and causeless fits of anger, freed the ladies from censure.

भर्तृषूपसखि निक्षिपतीनामात्मनो मधुमदोद्यमितानाम् ॥
व्रीडया विफलया वनितानां न स्थितं न विगतं हृदयेषु ॥ ६६ ॥

अन्वयः—उपसखि आत्मनः भर्तृषु निक्षिपतीनां मधुमदोद्यमितानां वनितानां हृदयेषु विफलया व्रीडया न स्थितं न विगतम् ॥ ६६ ॥

66. In the hearts of ladies (deeply attached to their lords), who, inflamed by liquor, threw themselves over their lords in the presence of female friends, bashfulness did not stay, nor did it leave them (the hearts).

रुन्धती नयनवाक्यविकासं सादितोभयकरा परिरम्भे ॥
व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैरनुजह्रे ॥ ६७ ॥

अन्वयः—नयनवाक्यविकासं रुन्धती परिरम्भे सादितोभयकरा युवतीनां क्षीबता बहुगुणैः व्रीडितस्य ललितम् अनुजह्रे ॥ ६७ ॥

67. The drunkenness of ladies, that obstructed the full expansion of eyes and (the expression) of words, and that wearied their arms in close embrace, imitated the amorous gestures of bashfulness by a variety of acts (such as contraction of eyebrows, &c.)

योषिदुद्धतमनोभवरागा मानवत्यपि ययौ दयिताङ्कम् ॥
कारयत्यनिभृता गुणदोषे वारुणी खलु रहस्यविभेदम् ॥ ६८ ॥

अन्वयः—उद्धतमनोभवरागा योषित् मानवती अपि दयिताङ्कं ययौ अनिभृता वारुणी गुणदोषे रहस्यविभेदं कारयति खलु ॥ ६८ ॥

68. A lady, though naturally proud, betook herself to the lap of her lover, being strongly influenced by love. Verily liquor, that generates fickleness causes the disclosure of secrets–merits as well as faults.

आहिते नु मधुना मधुरत्वे चेष्टितस्य गमिते नु विकासम् ॥
आबभौ नव इवोद्धतरागः कामिनीष्ववसरः कुसुमेषोः ॥ ६९ ॥

अन्वयः—मधुना चेष्टितस्य मधुरत्वे आहिते नु विकासं गमिते नु उद्धतरागः (अतएव) कुसुमेषोः कामिनीषु अवसर नव इव आबभौ ॥ ६९ ॥

69. The flower-eyed God, with intensified love, seemed to make his first attack on those ladies, when the sweetness of amorous gestures was borrowed or manifested by drink.

मा गमन्मदविमूढधियो नः प्रोज्झ्य रन्तुमिति शङ्कितनाथाः ॥
योषितो न मदिरां भृशमीषुः प्रेम पश्यति भयान्यपदेऽपि ॥ ७० ॥

अन्वयः—शङ्कितनाथा योषितः मदविमूढधियः नः प्रोज्झ्य रन्तुं मा गमन् इति (मनीषया) मदिरां भृशं न ईषुः (तथाहि) प्रेम अपदे अपि भयानि पश्यति ॥ ७० ॥

70. The youthful ladies, with their intellects overpowered by intoxication and full of suspicion about their lords, did not much wish for drink, being afraid that they might leave them and go off for enjoyment. Love, indeed, suspects dangers, even where they do not exist.

चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः ॥
संगमश्च दयितैः स्म नयन्ति प्रेम कामपि भुवं प्रमदानाम् ॥ ७१ ॥

अन्वयः—चित्तनिर्वृतिविधायि विविक्तं मन्मथः मधुमदः शशिभासः दयितैः (सह) संगमः च प्रमदानां प्रेम कामपि भुवं नयन्ति ॥ ७१ ॥

71. Privacy that delights the heart, love, the intoxication of liquor, union with lovers:—all these intensify the love of women to an inconceivable degree.

धाष्टर्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये ॥
मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ॥ ७२ ॥

अन्वयः—धाष्टर्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये मानिनीरतिविधौ कुसुमेषुः मत्तमत्त इव विभ्रमम् आप ॥ ७२ ॥

72. The God of love, as if extremely inebriated, acted wildly with regard to the enjoyments of the proud lady, in which hair and garlands were roughly handled, and in which modesty was displaced by insolence.

शीधुपानविधुरेषु वधूनां विघ्नतामुपगतेषु वपुःषु ॥
ईहितं रतिरसाहितभावं वीतलक्ष्यमपि कामिषु रेजे ॥ ७३ ॥

अन्वयः—शीधुपानविधुरेषु (अत एव) वपुःषु विघ्नताम् उपगतेषु सत्सु वधूनां रतिरसाहितभावं कामिषु ईहितं वीतलक्ष्य अपि रेजे ॥ ७३ ॥

73. The limbs, being emaciated by drink, and (hence) entirely subservient to the wishes of the lovers, their gestures (kissing, &c.) arising from deep love to their beloveds, looked extremely admirable though they were now unseasonable.

अन्योन्यरक्तमनसामथ बिभ्रतीनां चेतोभुवो हरिसखाप्सरसां निदेशम् ॥
वैबोधिकध्वनिविभावितपश्चिमार्धा सा संहृतेव परिवृत्तिमियाय रात्रिः ॥ ७४ ॥

अन्वयः—अथ हरिसखाप्सरसाम् अन्योन्यरक्तमनसां चेतोभुवः निदेशं बिभ्रतीनां वैबोधिकध्वनिविभावितपश्चिमार्धा रात्रिः संहृता इव परिवृत्तिम् इयाय ॥ ७४ ॥

74. While the Gandharwas and the Celestial damsels, strongly attached to each other, bore command of the God Cupid (were engrossed in sensual pleasures), the night, the close of which was indicated by the auspicious songs of bards, came to a sudden conclusion (the time of those, who are immersed in pleasures passes off very quickly).

अन्वयः—अवचयपरिभोगवन्ति हिंस्रैः सहचरितान्यमृगाणि काननानि समुदितसाध्वसविक्लवं चेतः वधूभ्यः अभितः मुनिम् अभिदधुः ॥ ५ ॥

5. The forests, which had indications of the plucking of flowers and enjoyments, in which innocent beasts like the deer moved with the beasts of prey like the tigers, and the hearts (of the damsels) that began to palpitate by apprehending fears, suggested to the damsels that the sage Arjuna was close by.

नृपतिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार तेजः ॥
उपहितपरमप्रभावधाम्नां न हि जयिनां तपसामलङ्घ्यमस्ति ॥ ६ ॥

अन्वयः—सा भूः नृपतिपरिग्रहेण सुरसचिवाप्सरसां तेजः जहार तथाहि उपहितपरमप्रभावधाम्नां जयिनां तपसाम् अलङ्घ्यं न (किमपि) अस्ति ॥ ६ ॥

6. The site, being presided over by the sage Arjuna, made the Gandharwas and the damsels pale (discoloured them). For nothing is unattainable to the penances of the heroes who possess uncommon prowess and lustre.

सचकितमिव विस्मयाकुलाभिः शुचिसिकतास्वतिमानुषाणि ताभिः ॥
क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि ॥ ७ ॥

अन्वयः—विस्मयाकुलाभिः ताभिः शुचिसिकतासु क्षितिषु उपहितकेतुरथाङ्गलाञ्छनानि अतिमानुषाणि जिष्णोः पदानि सचकितमिव ददृशिरे ॥ ७ ॥

7. The damsels, overcome with wonder, saw with feelings of awe, the footprints of Arjuna on the holy sands–footprints bearing the marks of a flag and a circular missile and (hence) super–human.

अतिशयितवनान्तरद्युतीनां फलकुसुमावचयेऽपि तद्विधानाम् ॥
ऋतुरिव तरुवीरुधां समृद्ध्या युवतिजनैर्जगृहे मुनिप्रभावः ॥ ८ ॥

अन्वयः—अतिशयितवनान्तरद्युतीनां फलकुसुमावचये अपि तद्विधानां तरुवीरुधां समृद्ध्या युवतिजनैः मुनिप्रभावः ऋतुः इव जगृहे ॥ ८ ॥

8. The prowess of the sage Arjuna was taken by the damsels as the season spring from the abundance of trees and creepers that excelled in brightness other groves and that did so even in the collection of flowers and fruits.

मृदितकिसलयः सुराङ्गनानां ससलिलवल्कलभारभुग्नशाखः ॥
बहुमतिमधिकां ययावशोकः परिजनतापि गुणाय सद्गुणानाम् ॥ ९ ॥

अन्वयः—ससलिलवल्कलभारभुग्नशाखः (अत एव) मृदितकिसलयः अशोकः सुराङ्गनानाम् अधिकां बहुमतिं ययौ सद्गुणानां परिजनता अपि गुणाय ॥ ९ ॥

9. The Ashoka tree, with the branches bent under the burden of a wet bark–garment, and (hence) with its tendrils bruised, was very highly thought of by the damsels. Verily even service under the virtuous leads to exaltation.

यमनियमकृशीकृतस्थिराङ्गः परिददृशे विधृतायुधः स ताभिः ॥
अनुपमशमदीप्ततागरीयान्कृतपदपङ्क्तिरथर्वणेव वेदः ॥ १० ॥

अन्वयः—यमनियमकृशीकृतस्थिराङ्गः विधृतायुधः सः अनुपमशमदीप्ततागरीयान् अथर्वणा कृतपदपङ्क्तिः वेद इव ताभिः परिददृशे ॥ १० ॥

10. Arjuna, with his strong limbs ematiated by the practice of self-control and ascetic observations and with a weapon in his hand was seen by the damsels as the Veda composed by Vashistha (the Atharwa Veda), exalted by Peacefulness (in the Abhyudaya Kánda) and Heroism (in Abhichár Kánda).

शशधर इव लोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः ॥
शिखरनिचयमेकसानुसद्मा सकलमिवापि दधन्महीधरस्य ॥ ११ ॥

अन्वयः—शशधर इव लोचनाभिरामैः गगनविसारिभिः अंशुभिः परितः एकसानुसद्मा महीधरस्य सकलं शिखरनिचयम् इव दधत् ॥ ११ ॥

11. Arjuna, surrounded, like the Moon, by rays extending to the sky and delighting the eyes (of seers); though dwelling on one peak yet covering the whole collection of peaks.

सुरसरिति परं ततोऽधिगच्छन्विधृतपिशङ्गबृहज्जटाकलापः ॥
हविरिव विततः शिखासमूहैः समभिलषन्नुपवेदि जातवेदाः ॥ १२ ॥

अन्वयः—सुरसरिति परं तपः अधिगच्छन् विधृतपिशङ्गबृहज्जटाकलापः (अत एव) उपवेदि शिखासमूहैः विततः हविः समभिलषन् जातवेदा इव (स्थितः) ॥ १२ ॥

12. Practising austere penance on the bank of the Ganges and bearing a tuft of tawny and long twisted hair, (Arjuna) resembling the Fire increased in volume by numerous flames on the altar and expectant of oblations of ghee, &c.

सदृशमतनुमाकृतेः प्रयत्नं तदनुगुणामपरैः क्रियामलङ्घ्याम् ॥
दधदलघु तपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिम् ॥ १३ ॥

अन्वयः—आकृतेः सदृशम् अतनुं प्रयत्नं दधत् (तथा) तदनुगुणाम् अपरैः अलङ्घ्यां क्रियां (दधत्) क्रियानुरूपम् अलघु तपः (दधत्) विजयवतीं तपःसमां समृद्धिं (च दधत्) ॥ १३ ॥

13. Making lofty endeavours befitting his noble form, doing impossibilities worthy of his endeavours, practising austere penance fitting his deeds and surrounded by the halo of triumphant lustre, well-matched to his penance.

चिरनियमकृशोऽपि शैलसारः शमनिरतोऽपि दुरासदः प्रकृत्या ॥
ससचिव इव निर्जनेऽपि तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः ॥ १४ ॥

अन्वयः—चिरनियमकृशः अपि शैलसारः शमनिरतः अपि प्रकृत्या दुरासदः निर्जने तिष्ठन् अपि ससचिव इव मुनिः अपि त्रिलोकभर्तुः तुल्यरुचिः ॥ १४ ॥

14. Strong like a mountain, though ematiated by continuous penances, naturally unassailable though full of quietism; surrounded, as it were, by attendants though sitting in a desolate forest, and vying with the Lord of three worlds (Indra) in lustre though sage-like.

तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयन्त्यः ॥
अवययुरमरस्त्रियोऽस्य यत्नं विजयफले विफलं तपोधिकारे ॥ १५ ॥

अन्वयः—अवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां तनुं विलोकयन्त्यः अमरस्त्रियः विजयफले तपोधिकारे अस्य यत्नं विफलम् अवययुः ॥ १५ ॥

15. The celestial damsels, looking at his person that defied tne prowess and lustre of all and that seemed capable of protecting the three worlds, looked upon his endeavours in the austere penance with a view to gain success (over enemies) as vain i.e. unnecessary.

मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि ॥
अलघुनि बहु मेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगम् ॥ १६ ॥

अन्वयः—प्रतनुबलानि तपांसि अधितिष्ठतः मुनिदनुतनयान् सद्यः विलोभ्य कुलिशभृता अलघुनि पदे विहितं स्वं वियोगं बहु मेनिरे ॥ १६ ॥

16. Having instantly enticed many youths among sages and demons practising common penances, the damsels thought highly of their present appointment to a high purpose made by Indra.

अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन ॥
प्रसभमवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः ॥ १७ ॥

अन्वयः—अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन चित्तजन्मा प्रसभम् अवततार तथाहि मधुरा यौवनश्रीः मनः हरति ॥ १७ ॥

17. At the sight of Arjuna, the God of Love unconsciously took hold of the damsels who wished to spread allurements (before him), for the sweet charm of youth captivates the mind.

सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदङ्गैः ॥
युगपदृतुगणस्य संनिधानं वियति वने च यथायथं वितेने ॥ १८ ॥

अन्वयः—सपदि वधूनिदेशात् ध्वनितमनोरमवल्लकीमृदंगैः हरिसखैः वियति वने च युगपत् ऋतुगणस्य संनिधानं यथायथ वितेने ॥ १८ ॥

18. All at once, the Gandharwas who began to play upon lutes and beat drums at the instance of the damsels, spread simultaneously both in the sky and in the forest the six different seasons in regular order.

सजलजलधरं नभो विरेजे विवृतिमियाय रुचिस्तडिल्लतानाम् ॥
व्यवहितरतिविग्रहैर्वितेने जलगुरुभिः स्तनितैर्दिगन्तरेषु ॥ १९ ॥

अन्वयः—सजलजलधरं नभः विरेजे, तडिल्लतानां रुचिः विवृतिम् इयाय, व्यवहितरतिविग्रहैः जलगुरुभिः स्तनितैः दिगन्तरेषु वितेने ॥ १९ ॥

19 (In the rainy season) the sky shone with clouds saturated with water, the lightenings manifested their light, and all the quarters were filled with thunderings, that were accompanied by rain-fall and that instantly put an end to all love quarrels.

परिसुरपतिसूनुधाम सद्यः समुपदधन्मुकुलानि मालतीनाम् ॥
विरलमपजहार बद्धबिन्दुः सरजसतामवनेरपां निपातः ॥ २० ॥

अन्वयः—परिसुरपतिसूनुधाम सद्यः मालतीनां मुकुलानि समुपदधत् विरलं बद्धबिन्दुः अपां निपातः अवनेः सरजसताम् अपजहार ॥ २० ॥

20. Round the abode of Arjuna, a shower of rainfall, dispersing in small particles and producing instantly the buds of Malati flowers, washed off all the dust on the ground.

प्रतिदिशमभिगच्छताभिमृष्टः ककुभविकाससुगन्धिनानिलेन ॥
नव इव विबभौ सचित्तजन्मा गतधृतिराकुलितश्च जीवलोकः ॥ २१ ॥

अन्वयः—प्रतिदिशम् अभिगच्छता ककुभविकाससुगन्धिना अनिलेन अभिमृष्टः (अतएव) अचित्तजन्मा गतधृतिः आकुलितः च जीवलोकः नव इव विबभौ ॥ २१ ॥

21. The living beings, coming in contact with the wind blowing in all quarters and rendered fragrant by the opening of Arjuna flowers, (hence) being inspired by Cupid, losing courage and being over-anxious for enjoyment, looked very different.

व्यथितमपि भृशं मनो हरन्ती परिणतजम्बुफलोपभोगहृष्टा ॥
परभृतयुवतिः स्वनं वितेने नवनवयोजितकण्ठरागरम्यम् ॥ २२ ॥

अन्वयः—व्यथितम् अपि मनः हरन्ती परिणतजम्बुफलोपभोगहृष्टा परभृतयुवतिः नवनवयोजितकण्ठराग-रम्यं स्वनं वितेने ॥ २२ ॥

22. The female cuckoos, delighting even distressed minds and pleased with the taste of the ripe rose apple, uttered notes, that were attractive by newly devised melodies.

अभिभवति मनः कदम्ववायौ मदमधुरे च शिखण्डिनां निनादे ॥
जन इव न धृतेश्चचाल जिष्णुर्न हि महतां सुकरः समाधिभङ्गः ॥ २३ ॥

अन्वयः—कदम्बवायौ मदमधुरे शिखण्डिनां निनादे च मनः अभिभवति (सति) जिष्णुः जन इव धृतेः न चचाल तथाहि महतां समाधिभङ्गः सुकरः न ॥ २३ ॥

23. When the wind, charged with the odour of Kadamba flowers, and the notes of the peacocks, sweet by intoxication, captivated men's minds, Arjuna was not affected like ordinary men. Indeed, the interruption to the meditation of great persons is not a joke.

धृतबिसवलयावलिर्वहन्ती कुमुदवनैकदुकूलमात्तबाणा ॥
शरदमलतले सरोजपाणौ घनसमयेन वधूरिवाललम्बे ॥ २४ ॥

अन्वयः—धृतबिसवलयावलिः कुमुदवनैकदूकुलं वहन्ती आत्तबाणा शरद् वधूः इव घनसमयेन अमलतले सरोजपाणौ आललम्बे ॥ २४ ॥

24. The Autumal season, like a bride, having many bangles in the form of fibres, wearing a silken garment in the form of moon-lotuses and possessed of feathered arrows in the form of zinti shrubs, was taken hold of (in marriage) by the rainy season in his hand in the form of a lotus, whose surface (palm) was transparent.

समदशिखिरुतानि हंसनादैः कुमुदवनानि कदम्बपुष्पवृष्ट्या ॥
श्रियमतिशयिनीं समेत्य जग्मुर्गुणमहतां महते गुणाय योगः ॥ २५ ॥

अन्वयः—समदशिखिरुतानि हंसनादैः कुमुदवनानि कदम्बपुष्पवृष्ट्या समेत्य अतिशयिनीं श्रियं जग्मुः गुणमहतां योगः महते गुणाय ॥ २५ ॥

25. The cries of intoxicated peacocks were joined to the cries of swans, and the moon-lotuses to the shower of Kadamba flowers-and attained (in both cases) unsurpassed beauty. Verily the union of objects of superior quality is most excellent.

सरजसमपहाय केतकीनां प्रसवमुपान्तिकनीपरेणुकीर्णम् ॥
प्रियमधुरसनानि षट्पदाली मलिनयति स्म विनीलबन्धनानि ॥ २६ ॥

अन्वयः—प्रियमधुः षट्पदाली उपान्तिकनीपरेणुकीर्णं सरजसं केतकीनां प्रसवम् अपहाय विनीलबंधनानि असनानि मलिनयति स्म ॥ २६ ॥

26. The swarms of bees, eager for honey, abandoned the Ketaka flower, covered by the pollen of Kadamba flowers near at hand and by its own pollen, and darkened the Priyangu flower full of juice (eager to taste it).

मुकुलितमतिशय्य बन्धुजीवं धृतजलबिन्दुषु शाद्वलस्थलीषु ॥
अविरलवपुषः सुरेन्द्रगोपा विकचपलाशचयश्रियं समीयुः ॥ २७ ॥

अन्वयः—धृतजलबिन्दुषु शाद्वलस्थलीषु अविरलवपुषः सुरेन्द्रगोपाः मुकुलितं बन्धुजीवम् अतिशय्य विकचपलाशचयश्रियं समीयुः ॥ २७ ॥

27. On green meadows, moist with drops of water, the big Indragopa insects excelled the bud of Bandhujeeva flower and resembled the collection of fully opened Kinshuka flower (now the poet describes Winter).

अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः ॥
गुणमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः ॥ २८ ॥

अन्वयः—अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धि गन्धवाहः विरलतुषारकणः तुषारकालः चिराय असमयजं गुणं लेभे ॥ २८ ॥

28. The Winter, in which there are a few dew drops, in which the Priyangu flowers grow luxuriant, and which is charged with the fragrance of Kunda flowers, attained excellence even before the proper time.

निचयिनि लवलीलताविकासे जनयति लोध्रसमीरणे च हर्षम् ॥
विकृतिमुपययौ न पाण्डुसूनुश्चलति नयान्न जिगीषतां हि चेतः ॥ २९ ॥

अन्वयः—निचयिनि लवलीलताविकासे लोध्रसमीरणे हर्षं च जनयति (सति) पाण्डुसूनुः विकृतिं न उपययौ हि जिगीषतां चेतः नयात् न चलति ॥ २९ ॥

29. Notwithstanding that the Lawali creepers bloomed luxuriantly and that the breezes charged with the fragrance of Lodhra creepers, made men anxious (for enjoyment) Arjuna remained unaffected. For the minds of those who desire glory do not swerve from the right path.

कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः ॥
सुरभिमुखहिमागमान्तशंसी समुपययौ शिशिरः स्मरैकबन्धुः ॥ ३० ॥

अन्वयः—कतिपयसहकारपुष्परम्यः तनुतुहिनः अल्पविनिद्रसिन्धुवारः सुरभिमुखहिमागमान्तशंसी स्मरैकबन्धुः शिशिरः समुपययौ ॥ ३० ॥

30. Then comes the cold Season, charming with some blossom of mango trees, with abated chilluess, full of many flowers of Nirgundi-indicating the approach of spring and the close of winter.

कुसुमनगवनान्युपैतुकामा किसलयिनीमवलम्ब्य चूतयष्टिम् ॥
क्वणदलिकुलनूपुरा निरासे नलिनवनेषु पदं वसन्तलक्ष्मीः ॥ ३१ ॥

अन्वयः—कुसुमनगवनानि उपैतुकामा वसन्तलक्ष्मीः किसलयिनीं चूतयष्टिम् अवलम्ब्य क्वणदलिकुलनूपुरा सती नलिनिवनेषु पदं निरास ॥ ३१ ॥

31. The beauty of spring, desirous of ascending the flowery trees and mountains, caught hold of the fully-blossomed mango and with anklets in the form of humming bees, placed her foot on (first was visible on) the lotus groves.

विकसितकुसुमाधरं हसन्तीं कुरबकराजिवधूं विलोकयन्तम् ॥
ददृशुरिव सुराङ्गना निषण्णं सशरमनङ्गमशोकपल्लवेषु ॥ ३२ ॥

अन्वयः – विकसितकुसुमाधरम् हसन्तीं कुरबकराजिवधूं विलोकयन्तम् (अत एव) अशोकपल्लवेषु निषण्णं सशरम् अनङ्गं सुराङ्गनाः ददृशुः इव । ३२ ॥

32. The celestial damsels as it were saw Cupid with an arrow in his hand, sitting on the (bed of blossom of Ashoka tree and ardently looking at the bride in the form of Kúrabaka trees, smiling so as to show her lower lip in the form of flowers (opened).

मुहुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन ॥
अलिकुलमलकाकृतिं प्रपेदे नलिनमुखान्तविसर्पि पङ्कजिन्याः ॥ ३३ ॥

अन्वयः—अनुपतता दक्षिणानिलेन मुहुः विधूयमानम् (अत एव) विरचितसंहति पङ्कजिन्याः नलिनमुखान्तविसर्पि अलिकुलम् अलकाकृतिं प्रपेदे ॥ ३३ ॥

33. The multitude of bees, forming into clusters as they were constantly shaken by the southern breezes, and moving near the mouth of a lotus on a lotus plant, resembled braided hair?

श्वसनचलितपल्लवाधरोष्ठे नवनिहितेर्ष्यमिवावधूनयन्ती ॥
मधुसुरभिणि षट्पदेन पुष्पे मुख इव शाललतावधूश्चुचुम्बे ॥ ३४ ॥

अन्वयः—षट्पदेन शाललतावधूः श्वसनचलितपल्लवाधरोष्ठे मधुसुरभिणि पुष्पे मुखे इव नवनिहितेर्ष्यम् इव अवधूनयन्ती चुम्बिता ॥ ३४ ॥

34. The bride in the form of the Shála creeper, trembling as it were with fresh anger, was kissed by the bee, in his mouth, in the form of flower fragrant with drink or honey, with the lower lip in the form of blossom throbbing by heavy sighs or wind.

प्रभवति न तदा परो विजेतुं भवति जितेन्द्रियता यदात्मरक्षा ॥
अवजितभुवनस्तथा हि लेभे सिततुरगे विजयं न पुष्पमासः ॥ ३५ ॥

अन्वयः—परः तदा विजेतुं न प्रभवति यदा जितेन्द्रियता आत्मरक्षा भवति तथा हि अवजितभुवनः पुष्पमासः सिततुरगे विजयं न लेभे ॥ ३५ ॥

35. An enemy is not then able to conquer when self-control is for the self defence. For spring that triumphs over the world could not prevail upon (gain victory) over Arjuna.

कथमिव तव संमतिर्भवित्री सममृतुभिर्मुनिनावधीरितस्य ॥
इति विरचितमल्लिकाविकासः स्मयत इव स्म मधुं निदाघकालः ॥ ३६॥

अन्वयः—विरचितमल्लिकाविकासः निदाघकालः ऋतुभिः समं मुनिना अवधीरितस्य तव संमतिः कथमिव भवित्री इति मधुं स्मयते स्म इव ॥ ३६ ॥

36. The Summer, which expands the (white) Mallikā flowers, seems to laugh at the Spring with these words; " How will you, slighted by the sage (Arjuna) in common with other seasons, gain admiration from the world ? "

बलवदपि बलं मिथोविरोधि प्रभवति नैव विपक्षनिर्जयाय ॥
भुवनपरिभवी न यत्तदानीं तमृतुगणः क्षणमुन्मनीचकार ॥ ३७ ॥

अन्वयः—बलवत् अपि मिथोविरोधि बलं विपक्षनिर्जयाय नैवप्रभवति यत् भुवनपरिभवी ऋतुगणः तदानीं तं क्षणमपि न उन्मनीचकार ॥ ३७ ॥

37. An army, however powerful, is unable to vanquish a foe, if it is divided between itself by rivalry, since the seasons, though overpowering the whole universe, could not then disturb Arjuna even for a moment.

श्रुतिसुखमुपवीणितं सहायैरविरललाञ्छनहारिणश्च कालाः ॥
अविहितहरिसूनुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः ॥ ३८ ॥

अन्वयः—सहायैः श्रुतिसुखम् उपवीणितम् अविरललाञ्छनहारिणः कालाः अविहितहरिसूनुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः ॥ ३८ ॥

38. The singing of the land harwas, in accompaniment to the lute, agreeable to the ears; the different seasons, that were attractive by reason of their respective marks (flowers, fruits, &c.) and the failures in exciting Arjuna all these served only to enhance the passion of love in the damsels.

न दलति निचयेतथोत्पलानां न च विषमच्छदगुच्छयूथिकासु ॥
अभिरतिमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥ ३९ ॥

अन्वयः—आसां लोचनानि यथा हरितनयावयवेषु अभिरतिम् उपलेभिरे तथा दलति उत्पलानां निचये (तथा) विषमच्छदगुच्छयूथिकासु न ॥ ३९ ॥

39. The eyes of these damsls could not be delighted at the sight of the numerous blooming lotuses or of the clusters of Saptaparno blossoms or of Kallikàs as they were at the graceful limbs of Arjuna.

मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन ॥
मदनमुपदधे स एव तासां दुरधिगमा हि गतिः प्रयोजनानाम् ॥ ४० ॥

अन्वयः—याः कमनीयतागुणेन मुनिम् अभिमुखतां निनीषवः समुपययुः तासां स एव मदनम् उपदधे तया-हि प्रयोजनानां गतिः दुरधिगमा ॥ ४० ॥

40. Those, who desired to vanquish Arjuna by virtue of their beauty, were (on the contrary) inflated with the passion of love by him. Indeed, unknowable is the course of events.

प्रकृतमनुससार नाभिनेयं प्रविकसदङ्गुलि पाणिपल्लवं वा ॥
प्रथममुपहितं विलासि चक्षुः सिततुरगे न चचाल नर्तकीनाम् ॥ ४१ ॥

अन्वयः—विलासि चक्षुः प्रकृतम् अभिनेयं न अनुससार प्रविकसत् अंगुलि पाणिपल्लवं (न अनुससार) (किंतु) प्रथमं सिततुरगे उपहितं (सत्) न चचाल ॥ ४१ ॥

41. The sportive eyes of the damsels did not follow the dance that was commenced, or the beautiful hands that were waved in gesticulations but, being at the outset fixed upon Arjuna, could not move therefrom.

अभिनयमनसः सुराङ्गनाया निहितमलक्तकवर्तनाभिताम्रम् ॥
चरणमभिपपात षट्पदाली धृतनवलोहितपङ्कजाभिशङ्का ॥ ४२ ॥

अन्वयः—अभिनयनमसः सुराङ्गनायाः अलक्तकवर्तनाभिताम्रं निहितं चरणं षट्पदाली धृतनवलोहितपङ्कजाभिशङ्का अभिपपात ॥ ४२ ॥

42. A swarm of bees fell upon the foot of a damsel, intently engaged in the dance, foot which was red by the application of the Alakta dye, taking it for a fresh red coloured lotus.

अविरलमलसेषु नर्तकीनां द्रुतपरिषिक्तमलक्तकं पदेषु ॥
सवपुषमिव चित्तरागमूहुर्नमितशिखानि कदम्बकेसराणि ॥ ४३ ॥

अन्ववः—नमिताशिखानि अदम्बकेसराणि अविरलं द्रुतपरिषिक्तं नर्तकीनाम् अलसेषु पदेषु अलक्तकं सवपुषं चित्तरागम् इव ऊहुः ॥ ४३ ॥

43. The kesara-filaments, with their ends bent low (bruised), bore the Alakta dye, thick and spreading quickly on all sides, on the gently moving feet of the dancing-girls, which was, as it were their attachment incarnate (to the sage Arjuna).

नृपसुतमभितः समन्मथायाः परिजनगात्रतिरोहिताङ्गयष्टेः ॥
स्फुटमभिलषितं बभूव वध्वा वदति हि संवृतिरेव कामितानि ॥ ४४ ॥

अन्वयः—नृपसुतम् अभितः परिजनगात्रतिरोहिताङ्गयष्टेः समन्मथायाः वध्वाः अभिलषितं स्फुटं बभूव तथाहि संवृतिः एव कामितानि वदति ॥ ४४ ॥

44. The longing (for Arjuna) of a certain damsel, who was excited by the passion of love and who concealed her body behind that of her female friend, just before Arjuna became known to all; for skilful concealment itself speaks for sincere attachment.

अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे ॥
चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥ ४५ ॥

अन्वयः—अभिमुनि घनमरुता जघनांशुकैकदेशे सहसा हृते (सति) सत्रपायाः परस्याः अवसनोरु चकितं प्रतियुवतीः अपि विस्मयं निनाय ॥ ४५ ॥

45. One part of the garment on the hips of another body being taken away by strong wind just before the sage, she smit with shame, was seized with consternation at her hips being uncovered, which amazed even her rivals.

धृतबिसवलये निधाय पाणौ मुखमधिरूषितपाण्डुगण्डलेखम् ॥
नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ ॥ ४६ ॥

अन्वयः—अपरा स्मराभितापात् धृतबिसवलये पाणौ अधिरूषितपाण्डुगण्डलेखं मुखं निधाय अमधुमदालसलोचनं नृपसुतं निदध्यौ ॥ ४६ ॥

46. A third damsel, placing her face which had its cheeks pale and besmeared with sandal juice, on her hand having lotus fibres serving as bracelets, being distressed by passion gazed at Arjuna in a manner by which her eyes seemed not intoxicated by drink but languid.

(Now a confidante addresses the sage).

सखि दयितमिहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता ॥
हृदयमहृदया न नाम पूर्वं भवदुपकण्ठमुपागतं विवेद ॥ ४७ ॥

अन्वयः—कुसुमेषुणा अभितप्ता सा हे सखि दयितम् इह आनय इति मां प्रहितवती, अहृदया (अत एव) पूर्वं भवदुपकण्ठम् उपागतं हृदयं न विवेद ॥ ४७ ॥

47. My friend, infatuated by passion, sends me to you with these words ' friend, get my love here '. She was indeed absent minded and (hence) did not know that her heart had already come to you.

चिरमपि कलितान्यपारयन्त्या परिगदितुं परिशुष्यता मुखेन ॥
गतघृण गमितानि सत्सखीनां नयनयुगैः सममार्द्रतां मनांसि ॥ ४८ ॥

अन्वयः-चिरं कलितानि अपि परिशुष्यता मुखेन परिगदितुं अपारयन्त्या (तया) गतघृण! सत्सखीनां मनांसि नयनयुगैः समम् आर्द्रतां गमितानि ॥ ४८ ॥

48. She, unable to express, with her mouth that had dried up (by sleeplessness) words of message, though long thought of, made, O cruel one ! the minds and eyes of friends wet (with tears and anguish).

अचकमत सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्याम् ॥
भृशमरतिमवाप्य तत्र चास्यास्तव सुखशीतमुपैतुमङ्कमिच्छा ॥ ४९ ॥

अन्वयः—मृदुसुरभिं पुष्पशय्यां विरहय्य सपल्लवां धरित्रीम् अचकमत, अस्याः तत्र भृशम् अरतिम् अवाप्य सुखशीतं तव अङ्कम् उपैतुम् इच्छा (वर्तते) ॥ ४९ ॥

49. Leaving a soft and fragrant bed of flowers, she wished for ground strewn with flowers; but finding no pleasure there, she longed for a place on your pleasant and cool lap.

तदनघ तनुरस्तु सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे ॥
पुनरपि सुलभं तपोऽनुरागी युवतिजनः खलु नाप्यतेऽनुरूपः ॥ ५० ॥

अन्वयः—तत् (हे) अनघ ! तनुः सा सकामा अस्तु, हि त्वदर्थे परासुतां पुरा व्रजति, पुनरपि तपः सुलभम् अनुरागी अनुरूपः युवतिजनः न आप्यते खलु ॥ ५० ॥

50. Therefore, O sinless one! let that damsel who is become ematiated (for you) have her desires fulfilled, or she will die for you. Penance is easy to practise once more, but a lady attached and worthy is indeed a rarity.

जहिहि कठिनतां प्रयच्छ वाचं ननु करुणामृदु मानसं मुनीनाम् ॥
उपगतमवधीरयन्त्यभव्याः स निपुणमेत्य कयाचिदेवमूचे ॥ ५१ ॥

अन्वयः—कठिनतां जहिहि, वाचं प्रयच्छ, मुनीनां मानसं करुणामृदु ननु, अभाग्याः उपगतम् अवधीरयन्ति, एवं सः कयाचित् एत्य निपुणम् ऊचे ॥ ५१ ॥

51. "Give up this harshness, unite yourself to her, the heart of sages is indeed compassionate; it is only the unlucky who despise (good fortune) come to them" thus was Arjuna cleverly addressed by a certain female messenger.

सललितचलितत्रिकाभिरामाः शिरसिजसंयमनाकुलैकपाणिः ॥
सुरपतितनयेऽपरानिरासे मनसिजजैत्रशरं विलोचनार्धम् ॥ ५२ ॥

अन्वयः—सललितचलितत्रिकाभिरामा शिरसिजसंयमनाकुलैकपाणिः अपरा सुरपतितनये मनसिजजैत्रशरं विलोचनार्धं निरासे ॥ ५२ ॥

52. Another damsel, looking beautiful by the playful movements of her hips (lit- part above the hips) and having her hand employed in fastening her hair, cast a side-glance, which is the triumphant arrow of Cupid at the son of Indra (Arjuna).

कुसुमितमवलम्ब्य चूतमुच्चैस्तनुरिभकुम्भपृथुस्तनानताङ्गि ॥
तदभिमुखमनङ्गचापयष्टिर्विसृतगुणेव समुन्ननाम काचित् ॥ ५३ ॥

अन्वयः—इभकुम्भपृथुस्तनानताङ्गी काचित् तनुः कुसुमितम् उच्चैः चूतम् अवलम्ब्य विसृतगुणा अनङ्गचापयष्टिः इव तदभिमुखं समुन्ननाम ॥ ५३ ॥

53. One delicate damsel, bent low under the weight of her breasts, broad like the temples of elephants, caught hold of a tall blossomed (branch of a) mango tree, and stretched herself before Arjuna, as if she were the tender bow of Cupid, with its string extended.

सरभसमवलम्ब्य नीलमन्या विगलितनीवि विलोलन्तरीयम् ॥
अभिपतितुमनाः ससाध्वसेव च्युतरशनागुणसंदितावतस्थे ॥ ५४ ॥

अन्वयः—अन्या विगलितनीवि (अत एव) विलोलं नीलम् अन्तरीयम् अवलम्ब्य सरभसम् अभिपतितुमनाः ससाध्वसा इव च्युतरशनागुणसंधिता अवतस्थे ॥ ५४ ॥

54. Another damsel, catching with her hand her dark-blue under garment, with its knot loosened and (hence) waving about, wishing to go away, yet seeming confused, stood on the same place, obstructed by the girdle that dropped down at the same time.

यदि मनसि शमः किमङ्ग चापं शठ विषयास्तव वल्लभा न मुक्तिः ॥
भवतु दिशति नान्यकामिनीभ्यस्तव हृदये हृदयेश्वरावकाशम् ॥ ५५ ॥

अन्वयः—'मनसि यदि शमः (भोः) चापं किम्? शठ! तव विषयाः वल्लभाः न मुक्तिः, तव हृदये हृदयेश्वरा अन्यकामिनीभ्यः अवकाशं न दिशति' ॥ ५५ ॥

ॐ

साहित्याचार्यवर्याय श्रीमते विदुषे नमः ।
साकाराद्वैतवादाय प्रमाणाद्वयमानिने ॥
ईश्वरोऽस्ति जगत्कर्ता सर्वज्ञः सर्वशक्तिमान् ।
प्रमाणानीति षडेवात्र साध्यसाध्यविवेचने ॥
इति मे स्थापनं तस्माद्विपरीतं भवन्मतम् ।
यस्मात्प्रायो वदन्त्येके परमार्थत्वदर्शनम् ।
विज्ञानसाधकं गाढतर्केऽर्पितं भवत्कृतम् ॥
तत्प्रमाणप्रमेयार्थविवेकाय समुद्यतैः ।
भाव्यं भवद्भिर्मध्यस्थैः स्थापनायेति प्रार्थये ॥
वदन्तीति यतस्तर्हि वादे भूयात् प्रथामति ।
सर्वथा प्रस्तुतोऽस्त्यत्र शास्त्रार्थः कालाज्ञया ।

श्री पं. रामावतार शर्मा M.A.
साहित्याचार्य का यह पत्र
शास्त्रार्थ की चैलेञ्ज रूप से
पं. नृसिंहदेव शास्त्री (लाहौर वालों) जब वे कांगड़ी
गुरुकुल में थे, भेजा गया था।